ॐ ह्रीं अर्हं श्री शंखेश्वर पार्श्वनाथाय नमः

॥ चान्द्रकुल तपागच्छसंविग्नशाखाग्रणी तीर्थोद्धारक आचार्य श्री विजयनीति-हर्ष-महेन्द्रसूरिसद्गुरुभ्यो नमः ॥

॥ श्री वर्द्धमान—सत्य—नीति—हर्षसूरि जैनग्रन्थमाला नं.... ४० ॥

# सटिक-श्रीदानादिकुलक संग्रहः

(मूलकर्ता . तपागच्छाधिराज श्री देवेन्द्रसूरि महाराज)

(टीकाकार...पण्डित श्री लाभकुशलगणी)

आद्यसंपादक-प्रेरक — स्व. प. पू. गच्छाधिपति आचार्यदेवेश श्री विजयमहेन्द्रसूरीश्वरजी महाराज साहेब

संपादक — मुनि हेमप्रभविजयः

प्रकाशक — शा. हीरालाल भोगीलाल ठे; घुसापारेखनी पोळ, अहमदाबाद १

वीर सं. २४९५
वि. सं. २०२५

मूल्य —

सत्य सं. २६९
ईस्वी सं. १९६९

## ☒ परमेष्टि-स्तुतिः ☒

अर्हन्तो भगवन्त इन्द्रमहिताः, सिद्धाश्च सिद्धिस्थिता,
आचार्या जिनशासनोन्नतिकराः, पूज्या उपाध्यायकाः;
श्री सिद्धान्त सुपाठका मुनिवरा, रत्नत्रयाराधकाः,
पञ्चैते परमेष्ठिनः प्रतिदिनं, कुर्वन्तु वो मङ्गलम् ॥ १ ॥

## ☒ गुरु-स्तुतिः ☒

श्री तपागच्छ संविज्ञशाखाना पट्टधरोनी शुभनामावली

क्रियोद्धारकरः श्रीसत्यविजयः पन्न्यासपद्धारकः,
कर्पूरश्च क्षमायुतो जिनमुनिः प्रज्ञोत्तमो साधुराट् ।
तत्पट्टे कविराट् सु-पद्मविजयो रूपाऽमीसौभाग्यकाः,
श्रीमद्-रत्न-सुभावका नीतियुता हर्षान्महेन्द्रानताः ॥ २ ॥

तीर्थोद्धारकर सुदर्शनयुतः श्रीनीतिसूरीश्वरः,
ज्ञानानन्दमयः सदा विजयते श्री हर्षसूरिस्तथा ।
चारित्रादिगुणान्वितश्च जयते श्रीमन्महेन्द्रः सूरिः,
तत्त्वानन्दमयान् सदा सुखमयान् वन्दे गुरून् भावतः ॥ ३ ॥

प्राचीन तीर्थोद्धारक चारित्रचूडामणि प. पू. आचार्यदेवश्री विजय **नीतिसूरीश्वरजी** महाराज साहेबना पट्टधर सकलागमरहस्यवेदी प. पू. आचार्यदेवश्री विजय **हर्षसूरीश्वरजी** महाराज साहेबना पट्टधर प्रशांतमूर्ति गच्छाधिपति आचार्यदेवश्री विजय **महेन्द्रसूरीश्वरजी** महाराज साहेब.

卐

| | | |
|---|---|---|
| जन्म | : | १९५३ आसो वद ३ रतलाम |
| दीक्षा | : | १९६९ कारतक वद ४ अमदावाद |
| गणिपद | : | १९८६ मागसर सुद ५ अमदावाद |
| पंन्यासपद | : | १९८७ कारतक वद ८ सीपोर |
| आचार्यपद | : | १९९९ फागण वद ६ अमदावाद |
| स्वर्गवास | : | २०२२ वैशाख वद १० अमदावाद |

# वन्दना

जेमना प्रथम दर्शने ज मारा हृदयमां सद्भावनुं बीजारोपण कर्युं,
जेमना वचनामृते मारा अनादिना कर्ममळने हळवा कर्या,
जेमना अनुपम वात्सल्ये मने आ भूमिका प्राप्त करावी
जेमना अप्रतिम ऊपकारे अबुध एवा मने आ
ग्रन्थनुं संपादन करवा प्रेरणा अर्पी ते
स्व. गच्छाधिपति प. पू. गुरुदेव श्री

**विजयमहेन्द्रसूरीश्वरजी महाराज साहेब**

ना चरण कमळमां कोटि कोटि वन्दना

मुनि हेमप्रभविजय

# समर्पण

जेओश्रीनो त्याग अनुपम छे।

तप अति अनुमोदनीय छे।

संयम अति प्रेरणादायक छे।

ते श्री वर्त्तमान गच्छनायक अनुयोगाचार्य प. पू. पंन्यासप्रवर श्री

**मंगळविजयजी गणीन्द्र महाराज साहेब**

ना पुनीत करकमळमां सादर समर्पण

मुनि हेमप्रभविजय

# प्रकाशकीय....

श्री वर्द्धमान सत्य-नीति-हर्षसूरि जैन ग्रंथमाला पोतानो आ चालीशमो प्रकाशन ग्रंथ श्री संघना करकमलमां अर्पण करतां खुबखूब आनंद अनुभवे छे।

प. पू. पं. श्री मानविजयजी गणि म. सा. (स्व. आचार्यश्री विजय महेन्द्रसूरीश्वरजी म. सा.)नी शुभप्रेरणाथी आ ग्रंथमालानी स्थापना थयेल। जेनां वहार पाडेल प्राचीन-अलभ्य संस्कृत-गुर्जर प्रकाशनोनुं संपादन कार्य पण प्रायः पुज्यश्रीअे ज करेल।

पू. आचार्यश्री देवेन्द्रसूरीश्वरजी म. सा. विरचित आ ग्रंथमां दान-शील-तप अने भाव कुलक उपर पंडितश्री लाभकुशलगणिअे सरल गद्य संस्कृत भापामां सुंदर टीका वनावेल छे। जेमां आ चारेनुं सुंदर स्वरुप छे। तेमज ते उपर उपयोगी दृष्टान्तो आपी तेने खूब हृदयंगम बनावेल छे। जे अति उपयोगी अने अलभ्य मानी प.पू. स्व. आचार्य-देवश्री विजय महेन्द्रसूरीश्वरजी महाराज साहेबे अमने तेनुं प्रकाशन करवा प्रेरणा करेल। जेनो आ ग्रंथमालाअे सहर्ष स्वीकार करेल छे। आ ग्रंथनुं संपादन कार्य पण प. पू. आचार्यदेवश्रीअे ज करेल अे बदल आ ग्रन्थमाला तेओश्रीनी खूब ऋणी छे। प. पू. आचार्यदेवश्रीअे छ फर्मानुं संपादन कर्युं त्यां ज तेओश्रीना अकाळ स्वर्गगमनथी आ ग्रन्थनुं कार्य अटकी पडयुं। परंतु पू. गुरुदेवश्रीना अधुरा कार्यने तेओश्रीना शिष्य प. पू. मुनिराजश्री हेमप्रभविजयजी म. साहेबे संभाळी लीधुं। अने अमे आ ग्रन्थ प्रकाशित करवा सद्भाग्यशाळी बन्या।

आ ग्रन्थना प्रकाशनमां प. पू. आचार्यदेवश्रीनी प्रेरणाथी :—

रु. २००० / श्रेष्ठिवर्यश्री चंदुलालजी हजारीमलजी कोठारी वांकलीवाळा हस्ते ईन्द्रमलजी चंदुलालजी तथा रु. १००० / श्री वांकली जैन संघ तरफथी तेमज बीजा पण भाग्यशाळीओ तरफथी खूटती रकम मेळवी आ ग्रन्थ प्रकाशित कर्यो छे ।

पोतानी शुभ लक्ष्मीनो सद्व्यय करी जेओ अमने सहायकर्ता बन्या छे । तेमना धर्मप्रेमनी पण अमे खूब खूब अनुमोदना करीअे छीअे ।

आ ग्रन्थनुं प्रुफ संशोधनादि कार्य पं. हरजीवनदास भाईचंदे काळजीपूर्वक करेल छे । तेथी तेमनो तेमज आ ग्रन्थनुं सुंदर छापकाम करवा बदल 'वात्रीसी अमृत प्रिन्टींग प्रेस' जेतपुरना व्यवस्थापकोनो पण आ स्थळे आभार मानीअे छीअे । आ सिवाय पण श्रीमद् यशोविजयजी जैन संस्कृत पाठशाळा महेसाणाना अध्यापक पंडितवर्यश्री रतिलाल ची. दोशी तेमज जेओ प्रत्यक्ष अथवा परोक्ष सहायकर्ता बन्या छे । ते सर्वनो पण अमे आभार मानीअे छीअे ।

आ ग्रन्थना प्रकाशनमां प्रेसदोषथी अथवा दृष्टिदोषथी जे कंई क्षतिओ रही गई होय ते बदल श्री संघ साक्षीअे मिच्छा मि दुक्कडं ।

संवत २०२५
वीर संवत २४९५
सत्य संवत २६९

लि० श्री संघ सेवक,
शा. हीरालाल भोगीलाल

दाना दि- ६

कुल- कम्

॥ ॐ ह्रीं अर्हं श्री शंखेश्वरपार्श्वनाथाय नमः ॥



# 卐 गुरुगुणोपेताचार्यश्री–महेन्द्रसूरीश्वराणाम् जीवनयशोगाथा 卐

अस्मिन्नसारे संसारे सर्वं गतिशीलमेव न किमपि स्थिरं शाश्वतं वा येन कारणेनैवमुक्तं संसरणशीलोऽयं संसारः । अत एव स्थिरतां प्राप्तुं य इच्छति स संसारं त्यजत्येव । किन्तु संसारं त्यक्तुं स एव प्रवर्तते यस्यान्तः संसारस्यासारता स्थिरीभूता । यस्य संसारस्यासारता चेतसि दृढीभूता स महात्मा जीवनमेतादृशं जीवति येन स आत्मीयार्थे परं न कदापि दूनोति हिंसादिमहारम्भं परिग्रहकारणेभ्यश्च दूरमेवावतिष्ठते परोपकारप्रवणश्च स सिद्धिसौधसाधनशुभयोगे हि प्रवर्तते येन शाश्वतस्थानमचिरादेवावाप्यते । अयं महात्माऽप्येतादृश एव यस्य निर्मलयात्मसाधनयाकृष्टा–बहुजनाः संसारसुखानि त्यक्त्वा शिवसुखसाधनाम् विमलसंयमयोगस्याराधनामद्यापि कुर्वन्ति ।

रतलामपुर नाम नगरं महात्मनो जन्मस्थानमासीत् । श्री चेनाजीदारादलीकुक्षौ एकोनविंशतिशताधिक त्रिपञ्चाशत्तमे (१९५३) विक्रमाब्द असिते मार्गशीर्षतृतीयादिनेऽस्य महात्मनो जन्माऽभूत् । पितृभ्यां 'मिश्रीमल' इति नाम दत्तम् । ज्येष्ठबन्धुना केसरीमलेन सह परिपाल्यमानोऽयं बालो यदा चतुर्वर्षीयोऽभूत्तदा दैवयोगेन

पिता दिवंगतः । यदा तु नववर्षीयोऽभूत्तदा दुर्दैवेन माताऽपि विनष्टा । बालकाविमौ मातापितृहीनावन्योन्यमधि-कस्नेहपूर्वकं कालं व्यतिकुरुतः किन्तु तदपि दुर्दैवाय न रुचितम् येन यदा मिश्रीमल एकादशवर्षीयोऽभूत्तदा दुर्भाग्ययोगेन ज्येष्ठबन्धुः केसरीमलोऽपि मृत्युमगात् । बालकमिश्रीमलस्य शिरस्यापद्गगनं त्रुटितम् । कालुरामेण नाम्ना पैतृव्यभ्रात्रा स्वगृहं नीत्वा सुरक्षितोऽयमपि करालकालचपेटां विस्मर्तुं न समर्थोऽभूत् । एवमेव कतिपयं कालं निर्गमयन् स तत्रैव तिष्ठति ।

एकदा तत्रैव चातुर्मासस्थितस्य गणिवर्यश्रीमत्सिद्धिविजयाख्यमुनेर्वाचं निशम्य करालकरालविडम्बनया विह्वलमनसो मिश्रीमलस्य चेतसि शीतलता संजाता । ततः सोऽहरहस्तेषां वचनानि श्रोतुमागच्छति तत्प्रभावेन तेषाञ्च संस्तवेन बालकस्य हृदि संसारस्यासारता स्थिरीभूता । असारं संसारं त्यक्तुं प्रवृत्तमनाः स चातुर्मासा-नन्तरं महेसाणास्थ – श्रीमद्यशोविजय जैन–संस्कृत–पाठशालाया–मध्येतुमागतः कञ्चितकालं तत्राभ्यस्य पुनर्गुरु-समीपे भृगुपुरं गतवानयम् । तत्र च चातुर्मासं स्थित्वोपधानक्रियां कृत्वा मुक्तिमालां परिधाय स ततोऽहमदावा-दक्रमागतः । तत्र च ऋणानुबन्धेन मुनिप्रवरश्रीमद्धर्षविजयस्य संस्तवेन तं गुरुपदे संस्थापितवानयम् ।

एकोनविंशतिशताधिकैकोनसप्ततितमस्य (१९६९) विक्रमसंवत्सरस्य मार्गशीर्षस्य कृष्णे चतुर्थेऽह्नि श्रीहर्ष-विजयगुरुपादमूले प्रव्रज्यामसौ प्रतिपन्नः । पंन्यासप्रवरश्रीमद्भावविजयगुरुचरणे योगोद्वहनं कृत्वा निरतिचारनामकं

छेदोपस्थापनीयं चारित्रं स्वीकृतवानयम् नाम्ना मुनिमानविजयोऽभवत् । गुरुसकाशे व्याकरणाऽऽगम-काव्यकोश-न्याया-दीनाञ्चाध्ययनं कृत्वाऽयं संयमयोगेऽप्रमत्तो भूतः त्यागने तपसा चात्मानमोजस्विनं कृतवान्, ज्ञान-ध्यान स्वाध्याययोगेन च निर्मलीकृतवान् । गौरवर्णदेह-विशालललाट-प्रसन्नवदनानि तेषां प्रतिभासूचकान्यभवन् । योग्यो ऽयमिति ज्ञात्वा योगोद्वहनञ्च कारयित्वा श्रीमदाचार्या नीतिसूरीशास्तेभ्यः राजनगरे रसाष्टनवभूमिते (१९८६) विक्रमवर्षे मार्गमासे सिते पक्षे पञ्चमीदिवसे गणिपदं दत्तवन्तः । सीपोरसंघाग्रहेण सप्ताष्टनिधिमहीमिते (१९८७) विक्रमवत्सरे मार्गमासे कृष्णपक्षे दशम्यां तिथौ श्रीमद्धर्षविजयगुरुणा स पंन्यासपदारूढः कृतः ।

प्रशान्त-मुखमुद्रा परमवात्सल्यसंयुतं हृदयं शमसुधाकिरोवाचो बहुजनाकृष्टिकारणानि समपद्यन्त । नव-दशशताधिके नवनवतितमे (१९९९) वैक्रमीये वत्सरे स्वशिष्याग्रण्ये धीरताद्यनेकगुणालङ्कृताय मुनिमानविजयाय गुरुवर्यश्रीहर्षसूरिराट् चैत्रमासस्य कृष्णाष्टम्यां तिथावनेकग्रामाग्रण्याग्रहेणाचार्यपदवीम् प्रदत्तवान् । मानविजयो मुनि-राचार्यमहेन्द्रसूरिरभूत् । सूरिपदवीं सम्प्राप्य योग्याञ्जनान् विबोधयन् स महात्मा महाराष्ट्र-गुर्जर-मालवादिदेशेषु विहृत्य पृथ्वीतलं पुण्यीकृतवान् ।

पूज्योपदेशेनानेकभव्यात्मानोऽसारसंसारं त्यक्त्वा सर्वविरतिधर्मं स्वीकृतवन्तः । कतिचिज्जना विरताविरतं सम्यक्त्वञ्च प्राप्तवन्तः । अनेकस्थल-उपधानाञ्जनशलाका प्रतिष्ठाष्टाह्निका-बृहल्लघुशान्तिस्नात्राद्यनेकमहोत्सवाः शास-

नस्योद्योतसूचका अभवन् ।

एवं भव्याञ्जनान् वाक्सुधां पाययन्तः आचार्यश्रीमहेन्द्रसूरिवरा राजनगरस्य लुहाराख्यप्रतोलिकास्थसंघस्या ग्रहेण मरुधरदेशाद्विहृत्य राजनगरमागच्छन्तो मादलपुरोपाश्रयमायाताः ।

विधिसंकेतान्ज्ञातुं कः समर्थः ? कालकरालगत रक्षितुं क ईश्वर ? वैशाखकृष्णदशमीदिने सूर्यास्तसमये स्थण्डिलभूमिं गता आचार्या यदा तदा नाङ्गे काऽपि वेदना, नासीद् हृदये काऽपि चिन्ता, तथापि स्थण्डिलभूम्याः प्रत्यागच्छन्तस्ते भूमौ निपतिताः । किमभूत्तन्न ज्ञातम्, ज्ञातमेतादृशमेवम् आचार्या देहं विहाय दिवङ्गताः सानंदौ सहगतौ मुनी सशोकौ प्रत्यागतौ । संदेश--गुजरातसमाचारादिपत्रेभ्यो वाचिकं ज्ञात्वा बहुस्थले श्रेयोर्थं बृहच्छान्तिस्नात्राद्यनेकमहोत्सवादि अभवत् ।

सूरिवरो विजयनीतिसूरिसाम्राज्ये गच्छाधिपतिरभूत्, तेषां देहविलयेन जिनशासनगगनाङ्गण एकस्तेजस्तारको विलीनः श्री नीतिसूरीशानां परिवारेणैकगच्छाधिपते र्विरहोऽनुभूयत ।

संपादकः

गुरुवियोगार्त्तहृदयो मुनिहेमप्रभविजयः

# श्री दानादिकुलकान्तर्गतकथासूचिः

दाना वि- १२

## तपःविषये कथानकम्



## भावविषये कथानकम्



कुल॰ कम्

॥ श्रीवर्द्धमान–सत्य–नीति–हर्षसूरिजैनग्रन्थमाला नं. ४० ॥

॥ ॐ ह्रीं अर्हं श्री शंखेश्वर पार्श्वनाथाय नमः ॥

चान्द्रकुल तपागच्छसंविग्नशाखाग्रणी तीर्थोद्धारक आचार्यश्री विजयनीति—हर्षसूरिसद्‌गुरुभ्यो नमः

# सटिक-श्रीदानादिकुलक संग्रह: प्रारभ्यते

( मूलकर्ता–तपागच्छाधिराज श्री देवेन्द्रसूरिमहाराज ) ( टीकाकार–पण्डित श्री लाभकुशलगणी )

श्री महावीरं नमस्कृत्य । सर्वसिद्धिप्रदायकं ॥
वेक्ष्य बालावबोधार्थं । दानादिकुलकं वरं ॥१॥

व्याख्या—इहचेदानादिकूलकानां पूर्वपंडितैर्बहुकथाः सूत्रचरित्रादेरानीय संयोजिता लिखिताश्च. मयापि मद्बुद्ध्यनुसारेण तेषां कतिचित्कथाः, श्री देवेंद्रसूरिकृतमूलगाथाक्रममाश्रित्य प्रारभ्यंते.

तत्र पुर्वं श्रीतीर्थंकरेण भगवता चतुर्धा धर्मः प्रकाशितः स कः चतुर्धा– दानं १ शीलं २ तपः ३ भावनाख्यश्चतुर्विधः, तत्र पुर्वं दानधर्मो मुख्यो ज्ञातव्यः,

तस्माद्दानकुलकं प्रथमं. शासननायकेनासन्नोपकारिणा श्रीमहावीर स्वामिना स प्रकाशितः. प्रथमं श्रीमहावीरेणात्मना दानं दत्तं. तस्याद्या गाथा

मूलम्—परिहरिअ रज्जसारो । उप्पाडिअसंजमिक्कगुरुभारो ॥
खंधाउं देवदूस्सं । वियरंतो जयउ वीरजिणो ॥१॥

व्याख्या—राज्यसारं राज्यरहस्यं राज्यभारं द्रव्यं वा परिहृत्य संयमैकगुरुभारमुत्पाट्य ईदृशः श्रीमहावीरः स्कंधा-द्देवदूष्यं वस्त्रं ददानः सन् जयवान् प्रवर्त्ततु, एतच्चरित्रं प्रसिध्धमेव, श्री कल्पसूत्रवृत्त्यनुसारतो ज्ञेयं, तथापि अल्पचरित्रं लिख्यते, यथा—

क्षत्रियकुंडग्रामनगरे सिद्धार्थराजापरिवसति, तस्य पट्टराज्ञी त्रिशला, तया चतुर्दशस्वप्नसूचित- श्री वर्धमानः प्रसवितः, अनुक्रमेण यौवनं प्राप्तः सन् स मालवनरपतिक्षत्रियस्य यशोदानाम्नीं पुत्रीं मातापित्रोराग्रहेण परिणीतवान्, तया सह विषयसुखं भुंजानोऽस्ति, ततो वीरस्य प्रियदर्शना नाम्नी पुत्री जाता, सा च प्रवरनरपतिसुतस्य स्वभागिनेयस्य जमालेः परिणायिता, तस्यापि शेषवती नाम्नी पुत्री जाता, सा च भगवतो दौहीत्रीत्यर्थः, ततोऽनंतरं भगवतोऽष्टाविंशतिवर्षातिक्रमे पितरौ तुर्यं स्वर्गं माहेन्द्रं गतौ, ततो वीरः संपूर्णाभिग्रहः सन् नंदिवर्द्धन ज्येष्टभ्रातरं

दीक्षार्थमनुज्ञापितवान्ः स गाथातो भणति—

मूलम्—जिठभाया मम जणणी—जणयविरहदुहियस्स ॥
तुहविरहअग्गि सुंदर । सयंवि खारोवमो होई ॥ १ ॥

व्याख्या—ततो वीरं प्रति भणति ज्येष्टभ्राता नंदिवर्धनः हे भ्रातः जननीजनकमरणदुःखितस्य मम त्वद्विरहाग्निः हे सुंदर स्वयमपि क्षारोपमो भवति, विरक्तात्मा स्वाम्याह, गाथा—

मूलम्—पिअमाइभाइभइणी–भज्जापुत्तत्तणेण सव्वेवि ॥
जीवा जाया बहुसो । जीवस्स एगमेगस्स ॥ २ ॥

व्याख्या—पितृमातृभ्रातृभगिनीभार्यापुत्रत्वेन सर्वेऽपि जीवा जाता बहुवारं जीवस्यैकैकस्य. ततो भ्रातु र्विशेषाग्रहेण समधिकं वर्षद्वयं विरागी सन् भगवांस्तस्थौ. ततो द्विवर्षानंतरं वार्षिकदानं दत्वा सुरासुरनरेंद्राणां महामहोत्सवपूर्वकं नंदिवर्धनमनुज्ञाप्यैकं देवदूष्यं वस्त्रमादाय सर्वालंकारवस्त्रादिरहितः सन् श्रीवीर एकाकी दीक्षां गृहीतवान् अथानेकतपःसंयमानि निरतीचारतयाऽप्रमत्तः सन् स पालयति. अथ

दीक्षितस्याऽपि भगवतो दानाधिकारो यथा-

तत्र सोमिलाभिधो द्विजो भगवत्पितृमित्रीभूतोऽप्यभाग्यवशाऽऽजन्मदरिद्री कुत्रचिद्भिक्षावृत्तिं कुर्वन् देशांतरे गतः, पश्चाद्भगवतो दीक्षा गृहीता, ततः स द्विजो देशांतरं परिभ्रम्य किमप्यप्राप्तः सन् यथा गतस्तथा आगतः स्वगृहंप्रति. ततः स्वभार्यया कर्कशया तं निर्द्रव्यं समागतं दृष्ट्वा कर्कशवचनैर्निर्भर्त्सितः, तदा सा कथयति रे निर्भाग्यशिरोमणे, हे आजन्मदरिद्र, रे दुर्भग, रे निर्गुण, हे कुत्सितत्रेप त्वं कथं स्वमुखं लात्वा गृहं समागतः? अहं त्वां धनं विना साक्षाद्दरिद्ररूपं किं करोमि? तव अभाग्यवशादद्य गृहे किमपि नास्ति, यतः—

अन्नं नास्त्युदकं नास्ति । नास्ति गेहे युगंधरी ॥
न शाकमध्ये लवणं । यन्नास्ति तन्न भुज्यते ॥१॥

अतो मद्गृहे त्वत्प्रसादात्किमपि नास्ति, केवलं दारिद्र्यमेवास्ति, पुनः सा प्राह रे निर्भाग्य? त्वयि देशांतरे गते सति श्रीवीरो मेघवत्परिवृष्टः सर्वेऽपि धनिनो जाताः, एवं सति त्वं परदेशं गतः, इत्थं भार्यया तर्जितः सन् स निर्वेदमापन्नः, पुनः भार्या प्राह रे दरिद्र एनमेव स्वामिनं पश्चात् परिभ्रम, येनैतावंति वस्तूनि दत्तानि स एव त्वांप्रति दास्यति इति श्रुत्वा सोमिलद्विजः श्री महावीरं प्रति मार्गयितुं गवेषमाणः सन् पश्चादागतः, भगवतोऽग्रे च करौ योजयित्वा तेन बहु प्रार्थनां कर्तुमारब्धा, हे स्वामिन् दुःखितोऽस्मि, निराधारोऽस्मि, जन्मदरिद्री चास्मि, मया

अनेकशो जनाः प्रार्थिताः, परं केनापि ममाशा न पूरिता, त्वं स्वामिन् पुष्करावर्त्तवत्परिवृष्टः, तदा अभाग्यशेखरोऽहं गृहे नाऽभूवं, तस्मादधुना त्वच्छरणे समागतोऽस्मि, हे स्वामिन्! सांप्रति किंचित्प्रदेहि, ममाशां निष्फलां मा कुरु? मम दारिद्यं चूरयेत्युक्त्वा ब्राह्मणजातित्वाद्बहुदिनवचनानि लपयितुं लग्नः, ततो भगवतोऽनुकम्पा समुत्पन्ना, वीरेण विचारितं किं ददामि, मम निर्ग्रंथस्य पार्श्वे किमपि नास्ति, प्रार्थनाभंगेऽपि लघुता स्यात्, यतः—

तिण लहुअं तुस लहुअं । तिणलहुअं च पत्थणा लहुअं ॥
तत्तो वि सो य लहुअं । पत्थणभंगो कओ जेण ॥ ४ ॥

व्याख्या—सर्वेषां पदार्थानां मध्ये लघु तृणं, तृणादपि लघु तुषं, तृणतुषादिभ्योऽपि लघु प्रार्थनं, तस्मादपि लघु प्रार्थनाभंगः कृतो येन. ॥ ४ ॥

इति विचार्य सदयो वीरो देवदूष्यार्द्धं वस्त्रं ब्राह्मणाय दत्तवान् अन्ये चेति कथयामासुः, यतः—

जा संपत्त तां देहु धन । इम कहे श्री महावीर ॥
पितामित्रबांमणभणी ॥ आधो दीधो चीर ॥ १ ॥

विप्रोऽपि महापसाय इति कृत्वा पश्चाद्वलितः, स्वगृहसमीपे समागच्छंतं सचीरं स्वभर्त्तारं दृष्ट्वा हर्षिता सती ब्राह्मणी प्राह हे प्राणनाथ! हे स्वामिन्! हे भर्त्तः! सुखं समागतं? एवं बहुशिष्टवचनैः प्रमुदितो विप्रस्तून्नारकसमीपमागतः, तून्नारकेणोक्तं केनायं दत्तः? तनोक्तं महावीरेण दत्तः, ततस्तून्नारकेणोक्तं भो विप्र वीरात्तदर्धमपि समानय? संधिते सति तस्य लक्षमूल्यं समागमिष्यति, तदा तव च मम दारिद्र्यनाशो भविष्यति. ततो विप्रो व्याघुट्य स्वामिनः पश्चात् परिभ्रमणं कृतवान्.

एकदा ऋजुवालिकानदीकंठे वायुयोगेन प्रभुस्कंधात्तद्वस्त्रं पतितं कंटके लग्नं, श्रीमहावीरेण सिंहावलोकनवत्पश्चाद्विलोकितं, कंटके पतितं च तद्विलोक्य विचारितं मम शासनं कंटकबहुलं भविष्यति. द्विजोऽपि कटंकाद्वस्त्रं गृहीत्वा तून्नारकसमीपे गतस्तून्नारकेणापि स्वविज्ञानचातुर्येण तत्तूणितं. विक्रये च तस्य लक्षैकदीनारं समागतं, ताभ्यामर्द्धमर्द्धं विभज्य च तद्द्रव्यं गृहीतं, स ब्राह्मणः सुखी जातश्च. भगवता दिक्षानंतरं दानेन लोकाः सुखिनो विहिताः, ततोऽनंतरं स्वामिना बहुषष्टाष्टमादितपांसि कृत्वा अनेकोपसर्गाश्च सहिताः, द्वादशवर्षानंतरं केवलज्ञानं प्राप्तं, देवैः समवसरणादिमहिमा कृतः, एकादशगणधराश्चतुर्दशसहस्र प्रमाणाः साधवः, षट्त्रिंशत्सहस्रसंख्याकाः साध्व्यः, एकोनषष्टिसहस्रोत्तरं लक्षैक श्रावकप्रमाणं, त्रिलक्षाऽष्टादशसहस्रप्रमाणाः श्राविकाश्चेत्यादिपरिवार परिवृतो वीरोऽनेकजीवान् प्रतिबोधयन् सन् त्रिंशद्वर्षाणि केवलपर्यायं पालयित्वा सर्वं द्वासप्ततिवर्षायुः प्रतिपाल्य मध्यमपापायां नगर्यां चतुर्थारकप्रांते मोक्षं गतः, ॥ इति दानविषये श्री महावीर दृष्टांतः ॥ १ ॥

卐 अथ द्वितीयदृष्टांतः, 卐

मूलं—धम्मत्थकामभेया । तिविहंदाणं जयंमि विक्खायं ॥
तहवि अ जिणंदमुणिणो । धम्मदाणं पसंसंति ॥ २ ॥

व्याख्या—धर्मदान १ अर्थदान २ कामदान ३ रूपं त्रिधादानं जगति प्रसिध्धं. तद्दर्शयति—सुपात्रे यद्दानं दीयते तध्धर्मदानं १, द्रव्यादिकवांछया यत्प्रथमदानं तदर्थदानं २, स्त्र्यादीनां भोगनिमित्तं यद्दानं तत्कामदानं ३, ऐतेषां त्रयाणां दानानां मध्येजिनेंद्रैर्मुनीश्वरैश्च धर्मदानं प्रशंसित, धर्मवति पात्रबुद्ध्या मोक्षनिमित्तं भक्तत्वेन यद्दीयते तद्दानं श्रेष्टं ज्ञातव्यमिति भावार्थः २,

मूलम्—दाणं सोहग्गकरं । दाणं आरुग्गकारणं परमं ॥
दाणं भोगनिहाणं । दाणं ठाणं गुणगणाणं ॥ ३ ॥

व्याख्या—दानं सौभाग्यकरं दातुः सौभाग्य सर्वत्रविस्तारयति १, दानं पुनः आरोग्यादि कारणं परममुत्कृष्टं. दाता हि सर्वेषां दुःखानि स्फोटयति ततोऽसौ नीरोगशरीरं लभते २, पुनः दानं भोगनिधानं, दानात् सर्वेऽपि भोगं प्राप्नुवंति ३, दानं स्थानकं गुणसमूहानां, दानमध्ये सर्वे गुणाः समागताः ॥४॥

त्र

मूलम्—दाणेण फुरइ कित्ती । दाणेण होइ निम्मला कांति॥
दाणावज्जीअहिअओ । वैरिवि हु पाणिअं वहइ ॥ ४ ॥

व्याख्या—दानेन कृत्वा कीर्त्तिः प्रस्फुरति, जगन्मध्ये बहुकीर्त्तिर्जायते १, पूनः दानेन कृत्वा शरीरस्य निर्मला कांतिर्भवति २, तथा दानेनावर्जितहृदय. सन् वैरी अपि पानीयं वहति, पाठांतरे " वैरीविहु पाणिअं वहइ " इति पाठे क्रोधानलज्वालया तप्तो वैरी दानात्पानीयोपमो भवति ॥ ४ ॥

मूलम्—धणसच्छावाहजम्मे । जं घियदाणं कयं सुसाहूणं ॥
तक्कारणमुसभजिणो । तेलुक्कपिआमहो जाओ ॥ ४ ॥

व्याख्या—धनसार्थवाहभवे यद् घृतदानं दत्तं त्रयोदशमभवे सुसाधून्प्रति, तत्कारणात् ऋषभजिनस्वामी त्रैलोक्ये पितामहोपमो जातः, पितुः पितामहसकथ्यते. अथश्री आदिनाथस्य त्रयोदशभवपूर्वकं चरित्रं व्याख्यायते, यथा

इहात्र जंबूद्वीपे पश्चिममहाविदेहक्षेत्रे क्षितिप्रतिष्ठं नाम नगरं, प्रसन्नचंद्रराजा राज्यं करोति, तत्र नगरे राजमान्यो धननामा सार्थवाहः परिवसति, स च दाताशिरोमणिः परोपकारनिपुणो महाधनवांश्च, तेनैकदा नगरमध्ये

क्षमापात्रेण गुरुणा प्रोक्तं हे महानुभाव ! साधूनामाहाराद्यलब्धौ तपसां वृद्धिः, लब्धौ च देहस्य धारणा, तस्मात्त्वं चिंतां मा कुरु? ततः सार्थवाहेनोक्तं स्वामिन् ममस्थानके साधवः प्रेषणीयाः, गुरुणापि सार्थवाहस्यातिभावं ज्ञात्वा द्वौ साधू तत्र प्रेषितौ, सार्थवाहेनस्वस्थानकमानीतौ, तत्रान्नादिकं किंचिदपि तौ निरवद्यं न पश्यतः, इतस्ताभ्यां तत्र निरवद्यं, घृतं दृष्टं. तेनापि बहुभक्तिना साधुपात्राणि घृतेन भृतानि, ततश्च तत्र तेन बोधिबीजं प्राप्तं. तद्दिनादारभ्य प्रतिदिनं गुरुशुश्रूषणां कुर्वतस्तस्य धर्मसद्दहणा संजाता अथानुक्रमेण स सुखेन वसंतपुरे संप्राप्तः, तत्र च कतिचिद्दिनानि स्थित्वा स सार्थवाहः पुनः प्रतिष्ठानपुरे समागतः,

सुखेन स्वायुः प्रतिपाल्य जिनधर्मसहितः समाधिना मृत्वा कालं गतः, इति प्रथमो भवः १

द्वितीयभवे उत्तरकुरुक्षेत्रे युगलत्वमापन्नः, तत्रापि त्रिपल्योपमायुर्भुक्त्वा मृतः, इति द्वितीयो भवः २.

ततः सौधर्मे देवलोके देवो जातः, इति तृतीयो भवः ३.

सौधर्मदेवलोकाच्च्युत्वा पश्चिममहाविदेहे गंधिलावतिविजये वैताढ्यपर्वते महाबलनामा विद्याधरो जातः, तत्र च तेन विद्याधरस्य पदवी भुक्ता, अन्ते नाटकावसरे स्वयंबुद्धमंत्रिणा भणितं. किं तेन भणितमित्याह—

गाथा—सव्वं विलविअं गीअं । सव्वंनट्टं विडंबणा ॥
सव्वे आभरणा भारा । सव्वे कामा दुहावहा ॥ १ ॥

उद्घोषणा दापिता, वसंतपुरंप्रति वयं गमिष्यामो यस्य कस्याप्यागमनेछा भवेत्तदा सोऽस्मत्सार्थे सुखेनायातु. अन्यच्च येषां केषामपि संबलादि न स्यात्ते मत्साकाशात्संबलादिवस्तूनि गृह्णंतु. इत्यादि कथिते सति बहवो लोकास्तत्सार्थे समागमयितुमारब्धाः, तस्मिन्समये श्रीधर्मघोषसूरयोऽपि धनसार्थवाहसमीपे समागताः, सार्थवाहेन गुरवो वंदिताः, पृष्टं च स्वामिन् किमर्थं समागताः? गुरुभिः प्रोक्तं वयमपि वसंतपुरे भवत्सार्थे समागमिष्यामः, इति गुरुवचः श्रुत्वा सार्थवाहेनोक्तं हे स्वामिन् मम भाग्यं महत्संजातं, इत्युक्त्वा तेन स्वसूपकाराय प्रोक्तं गुरुनिमित्तं भोजनादिर्चिंतां कुरु? गुरुणा प्रोक्तं तद्भोजनमस्माकमकल्पनीयमस्ति.

अथास्मिन्प्रस्तावे तत्र सार्थवाहसमीपे केनचित्सेवकेनाम्राण्यानीय ढौकितानि. तान्याम्राणी स गुरुभ्यो दातुं लग्नः, तदा गुरुभिः प्रोक्तं एतान्यप्यकल्पनीयानि, वयं सचित्तफलानि न भक्षयामः. एवं गुरूणां निस्पृहत्वादिगुणरंजितः सन् स धनसार्थवाहः स्वचित्तेऽत्यंतमानंदितः, ततोऽनंतरं स सार्थवाहो गुरुसहितश्चलितः, पथि गच्छति सति कतिचिद्दिनेषु व्यतिक्रांतेषु सत्सु वर्षाऋतुः समायाता, तदा सर्वेऽपि लोकास्तत्रारण्यमध्ये एव स्थिताः, केनचित् सार्थवाहमित्रेण श्रावकेणात्मवसनार्थं तृणगृहं कृतं, तत्र श्रीधर्मघोषसूरय सुखेन स्थिताः स्वाध्यायादिधर्मध्यानं कुर्वंतः कालं निर्गमयंतिस्म. अथ वर्षाऋतौ व्यतिक्रांते सति सार्थः प्रस्थितुं लग्नः, सार्थवाहेन रात्रौ सुप्तेन सता चिंतितं मया सर्वसार्थचिंता कृता, परं न कोऽपि विस्मृत इति चिंतिते सति श्रीधर्मघोषसूरयः संस्मृताः, अथ रात्रौ गतायां प्रभाते जैनधर्मिणा माणिभद्रनाम्ना मित्रेण सार्द्धं स सार्थवाहः गुरुसमीपे समागतः, गुरुन् वंदित्वा सापराधं च क्षमयति, हे स्वामिन्! एतावद्भिर्दिवसैर्मया भवतां भोजनादिचिंता नि कृता तन्मेऽपराधं क्षमध्वं?

इति भणिते सति राज्ञा प्रोक्तं हे मंत्रिन् रागरंगस्थाने कथं विषादवचः? स्वयंबुद्धमंत्रिणा प्रोक्तं, हे स्वामिन् ज्ञानिनो मुखात्तवायुर्मासैकप्रमाणं मया श्रुतमस्ति. राजा तद्वचनं श्रुत्वा वैराग्येण चिंतां कर्त्तुं लग्नः, तदा स्वयंबुद्धमंत्री कथयति स्वामिन् चिंतां मा कुरु ? एकदिनप्रतिपालितापि दीक्षा मोक्षप्रदायिनी भवति, ततः स मासैकानशनं प्रतिपाल्य मृतः इति चतुर्थो भवः ४.

ततः ईशानदेवलोके ललितांगनामा देवो जातः, तत्र तस्य स्वयंप्रभा नाम्नी देवी वर्त्तते, तया सहातिप्रेमवान् स संतिष्ठते, अथैकदायुषि पूर्णे सति सा स्वयंप्रभा देवी प्रच्युता. ततः पश्चात्स ललितांगनामा देवो बहु विरहदुःखं कर्त्तुं लग्नः, तदवसरे स्वयंबुद्धमंत्रिजीवो धर्मं पालयित्वा ईशानदेवलोके सामान्येंद्रो जातः, स तं प्रतिबोधयितुं लग्नः परं स्नेहवशात्स न प्रतिबुध्यति. ततोऽनंतरं स सामानिकः सुरो यदा ज्ञानेन विलोकयति तदा धातकीखंडे पूर्वमहाविदेहे नंदिग्रामे नागिलनामा दरीद्री परिवसति, तस्य गृहे नागश्रीभार्या, तया षण्णां पुत्रीणामुपरि सप्तमी पुत्री प्रसुता. सा चाऽवल्लभत्वेन निर्नामिकेति नाम्ना ख्यातिं गता, वृद्धा जाता. अन्यदैकस्मिन् महोत्सवे धनवतां लोकानां पुत्र्यः श्रृंगारादिपरिवेष्टितास्तया दृष्टाः, ताश्च सुखभक्षिकादींश्च भक्षयंतीर्दृष्ट्वा निर्नामिकया स्वमातुरग्रे श्रृंगारादिवस्तु मार्गितं, दुःखिनी माताब्रवीत्, रे गच्छ ! अंवरतिलकनामपर्वतोपरि चटित्वा झंपापातं कुरु ? इति श्रुत्वा निर्नामिका दुःखिनी सती गृहान्निर्गत्य अंवरतिलकपर्वतोपरि चटित्वा यावन्निपतति तावद्युगंधराचार्येण सा निवारिता, प्रोक्तं च बाले ! बालमरणं मा कुरु ? तदा सा गुरुसमीपमागत्य दूरात्तच्चरणे लग्ना. गुरुणा प्रतिबोधिता सती परमश्राविका जाता. सुखेन गृहे समागत्यानेकतपांसि कुर्वाणा तिष्ठति. परं दौर्भाग्यत्वात्तां कोऽपि परिणेतुं नेच्छति,

वैराग्येण जिनधर्ममाराध्य प्रांते तयाऽनशनं कृतं.

इतश्च स सामानिकसुरो ललितांगंप्रति वक्ति, अहो ललितांग! त्वं तस्याः स्वकीयं रुप दर्शय? तव रूपं दृष्ट्वा सा ते चिंतनं करिष्यति, तेनैव ध्यानेन मृत्वा च तव भार्या भविष्यति. ललितांगेन तथेति प्रतिपद्य निर्नामिकाय स्वं रूपं दर्शितं. सापि तं दृष्टवा तद्ध्यानवशान्मरणं प्राप्यतत्स्थाने स्वयंप्रभां नाम्नी देवी समुत्पन्ना अथ तौ देवदंपती विषयसुखानि भुंजानौ तिष्ठतः, अनुक्रमेणायुःप्रांते ततश्च्युतौ, इति पंचमो भवः ५.

इहैव जंबूद्वीपे पूर्वमहाविदेहे पुष्कलावतीविजये लोहार्गलनाम्नि पुरवरे सुवर्ण जंघराजा, लक्ष्मी भार्या, तयोः पुत्रो वज्रजंघनामा स जातः, देवी स्वयंप्रभापि तत्रैव विजये पुंडरीकिण्यां नगर्यां वज्रसेनचक्रवर्त्ती, गुणवती भार्या, तयोः पुत्री श्रीमती जाता, सर्वकलाभ्यासतः सा प्रवीणा जाता. एकदा स्वमंदिरगवाक्षस्था सती मनोरमाख्ये उद्याने सुस्थित नाम्नः साधोः केवलज्ञानसमुत्पत्तितो महोत्सवार्थं समागतानां देवानां वृन्दं दृष्टवा जातिसरणं प्राप्य ललितांगस्वयं-प्रभादेवीत्वादि सर्वं सस्मार. तदा तया चिंतितं यावदहं तं प्राणनाथं न लभे तावन्मुखेन न वदिष्यामीति तया मूकत्वमादृतं. पित्रा. अनेके उपायाः कृताः, परं सा न जल्पति, कार्यावसरे हस्तसंज्ञया तथा पट्टकेऽक्षराणि लिखित्वा ज्ञापयति. तदेकांते धात्रमात्रा पृष्टं हे पुत्रि! त्वं कस्मान्न ब्रवीषि? श्रीमत्या प्रोक्तं हे मात र्मम जातिस्मरणं समुत्पन्नं, पूर्वभवो दृष्टः, अतस्तं भर्तारं प्राप्य ब्रविष्यामि. ततस्तया स्वपूर्वभवस्य निखिला वार्त्ता धातुः पुरः कथिता. ततस्तया चतुरधात्र्या तद्वृत्तान्तं चक्रिणे निरूप्य चित्रकारपार्श्वे तस्याः सर्वं पूर्वभवचरित्रं लिखापितं, तच्चित्रपट्टश्च सर्वनृपेभ्यो

दर्शितः, परं न कोऽपि तत्संकेतं पूरयति. ततो वज्रसेनचक्रिणा लोहार्गलपुरस्य सुवर्णजंघराज्ञः पुत्राय वज्रजंघाय तत्पट्टो दर्शितः, तं दृष्ट्वा तस्यापि जातिस्मरणं समुत्पन्नं, एवं पूर्वभवसंकेतपूरणेन श्रीमत्यपि संतुष्टा पित्रा महोत्सवपूर्वकं तयोः पाणिग्रहणं कारितं. ततः सुवर्णजंघेनापि वज्रजंघाय राज्यं दत्वा दीक्षा गृहीता, उत्तमार्थश्च साधितः, वज्रसेनचक्र्यपि दीक्षां गृहीत्वा तीर्थंकरपदवीं प्राप्य मोक्षं गतः. वज्रजंघराज्ञो राज्यं पालयतः सतः श्रीमतीकुक्षौ पुत्रो जातः. अथैकदा तस्मिन् पुत्रे वृद्धिं प्राप्ते सति रात्रौ तौ नृपराज्ञ्यौ चिंतयतः स्म, प्रातः पुत्राय राज्यं दत्वाऽवां दीक्षां गृहीष्यावः, इतश्च राज्यलोभी पुत्रश्चिंतयति वृद्धोऽपि पिता मम राज्यं न ददाति, इति विचिंत्य तेन विषधूमप्रयोगेण तौ मारितौ, इतिषष्टो भवः ६.

॰राजाराज्ञ्यौ मृत्वोत्तरकुरुक्षेत्रे युगलिकौ जातौ, इति सप्तमो भवः ७,

॰ततो मृत्वा सौधर्मे देवलोके तौ देवौ जातौ, इति अष्टमो भवः ८.

॰ततश्च्युत्वा तौ जंबूद्वीपे महाविदेहे क्षेत्रे क्षितिप्रतिष्ठितनगरे सुविधनामा वैद्यस्तस्य स जीवानंदनामा पुत्रो जातः, स चातिपंडितः परोपकारी च, तस्मिन्नेव नगरे श्रीमती जीवोऽपीश्वरदत्तव्यवहारिणः केशवनामा पुत्रो जातः पुनस्तस्मिन्नेव नगरे राज्ञः पुत्रो महीधरो जातः, मंत्रीश्वरपुत्रो सुबुद्धिनामा जातः. सार्थवाहपुत्रो पूर्णभद्रो जातः, नगरश्रेष्ठिनः पुत्रश्च गुणाकरो जातः, एते षडपि सहैव जाताः सहैव संवर्द्धिताश्च. तेषां बाल्यादारभ्य बहुप्रीतिर्जाता एकत्र स्थाने ते तिष्ठन्ति रमते भुंजंति, च तेषां षण्णां क्षणमपि विरहो न भवति. सुखेन विषयसुखं भुंजानः सत्

कालं निर्गमयंति. अथैकदा कश्चित्साधुः कुष्टरोगग्रस्ति, तच्छरीरे क्रमयः पतिताः सति, सः साधुः षष्टम पारणे आहारार्थं वैद्यगृहे समागतः, जीवानंदेनापि साधोः शरीरं रोगातुरं कृमिभिश्च संकुलं दृष्ट्वा पंचानां मित्राणां कथितं, यदि यूयं रत्नकंबलं गोशीर्षचंदनं च मेलयेत तदाहं साधुशरीरं नीरोगं करोमि. इति श्रुत्वा ते पंचापि मित्राणि श्रेष्ठिनो हट्टे गतानि, तत्र च तैः श्रेष्ठिने कथितं, त्वं दीनारलक्षद्वयं गृहाण ? अस्माकं च गोशीर्षचंदन रत्नकंवलं च देहि ? तदा श्रेष्ठिना प्रोक्तं किं करिष्यथ ? तैः प्रोक्तं जीवानंदवैद्यो मुनिशरीरं चिकित्सयिष्यते, तदा श्रेष्ठिना कथितं यूयं बालका अपि एतादृग्बुद्धिवंतो धर्मधिया परोपकारिणो धन्या एव, अहं च वृद्धोऽस्मि, तेनाहमप्यमूल्यफलप्राप्तये तन्मूल्यं नो गृह्णामि.

इत्युक्त्वा श्रेष्ठिना तेभ्यो रत्नकंबलं गोशीर्षचंदनं च दत्तं. ततः स श्रेष्ठी तत्पुण्यमहिम्ना प्रांते चारित्रं प्रतिपाल्य मोक्षं गतः, अथ ते पंचापि सखायो रत्नकंबलं गोशीर्षचंदनं च गृहीत्वा जीवानंदवैद्यगृहे समागताः, जीवानंदोऽपि लक्षपाकतैलं गृहीत्वा पंचमित्रसहितो यत्र वने साधुः कायोत्सर्गेण स्थितस्तत्रायातः, ततो मुनिं वंदित्वा तदाज्ञां च मार्गयित्वा ते षडपि तस्य शुश्रूषां कर्तुं लग्नाः, प्रथमं सर्वशरीरे तैललेपः कृतः समीपे मृततिर्यक्कलेवरं च समानीतं, अथ तदभ्यंगात्साधोर्मूर्च्छा समागता, तावता तै रत्नकंबलेन तत्शरीरं वेष्टितं, तदा सर्वे क्रमयो बहिर्निर्गत्य तद्रत्नकंबले लग्नाः, तांश्च मृतकलेवरे परिष्ठापितवंतः, पुनस्तथैव कृतं, पुनस्तृतीयवारकेऽस्थिमध्यस्थाः क्रमयोऽपिनिर्गताः, एवं सर्वानपि कीटकान्निर्गतान् ज्ञात्वा, ततोऽनंतरं चंदनेन साधुशरीर विलिप्तं नीरोगं च जातं कुष्टरोगश्च गतः संरोहिण्यौषध्या च शरीरत्वक्समागता, शरीरं च सौवर्णवर्णं जातं, ततस्तैस्तत्कलेवरं तु तरुच्छायायां परिष्ठापितं,

ततः साधुं वंदित्वा ते षडपि सखायः स्वस्वगृहे समागतास्तत्पुण्यं चानुमोदयितुं लग्नाः, शेषचंदनरत्नकंवलं च विक्रिय तद्द्रव्येण सुवर्णमयो जिनप्रासादः कारापितः, ततोऽनुक्रमेण कालांतरे तैः षड्भिर्दीक्षा गृहीता. निर्मलचारित्रं च पतिपाल्य प्रांतेऽनशनं कृत्वा कालं प्राप्ताः, इति नवमो भवः ९.

❀अथ ते षडपि जीवा द्वादशमे देवलोके द्वाविंशतिसागरोपमोत्कृष्टायुषो देवा जाताः, इति दशमो भवः १०.

❀ततश्च्युत्वा जंवूद्वीपे पूर्वमहाविदेहे पुष्कलावतीविजये पुंडरीकिण्यां नगर्यां तीर्थंकरजीवो वज्रसेनराजा राज्यं भुनक्ति, तस्य गृहे धारिणी पट्टराज्ञी, तस्याः कुक्षौ पंच पुत्रा अनुक्रमेण समुत्पन्नाः,

❀प्रथमो जीवानंदवैद्यजीवश्चतुर्दशस्वप्नसूचितश्चक्रवर्तिपदवीयोग्यो वज्रनाभनामा जातः १.

❀द्वितीयो राजपुत्रो महीधरजीवो वाहुनामा जातः २.

❀तृतीयो मंत्रीपुत्रः सुवुद्धिजीवः सुबाहुनामा जातः ३

❀चतुर्थः सार्थवाहपुत्रः पूर्णभद्रजीवः पीठनामा पुत्रो जातः ४.

❀पंचमः श्रेष्ठिपुत्रो गुणाकरजीवो महापीठनामा जातः ५.

❀एवं पंच पुत्रा जाताः, षष्ठः केशवजीवः सामन्तनाम्नो राज्ञो गृहे पुत्रत्वेन सुयशानामा जातः ६.

※स सुयशाः पूर्वभवस्नेहाद्वज्रनाभंप्रति बहु सेवते. ततोऽनंतरं वज्रसेनतीर्थंकरो वार्षिकदानं दत्वा वज्रनाभाय राज्यं प्रदाय दीक्षां गृहीत्वा केवलज्ञानं प्राप्य तीर्थं च स्थापयित्वा विचरतिस्म. वज्रनाभेन राज्ञा चतुर्णां भ्रातृणां देशान् विभज्य समर्पिताः सुयशाश्च सेनानीः कृतः अथैकदायुधशालायां चक्ररत्नं समुत्पन्नं, चतुर्दश रत्नानि नवनिधानानि च प्रादुर्भूतानि. ततः स षट्खंडं साधयित्वा चक्रवर्तिपदवीं भुंजानः सुखेनायुः प्रतिपालयति.

※अथैकदा वज्रसेनो भगवान् पुंण्डरीकिण्यां नगर्यां समवसृतः, वज्रनाभचक्रिणा च बहुमहोत्सवपूर्वकं वंदितः, भगवता देशना दत्ता तां श्रुत्वा वैराग्यं प्राप्य चक्री कथयति हे तात ! यदि भवत्पुत्रत्वं प्राप्याप्यहं संसारे भ्रमेयं तदा ममाप्यभाग्यं ज्ञातव्यं. एतावंति दिवसानि भवद्दत्तं राज्यं मया पालितं, तथैवाधुना संयमप्रसादं कुरु ? यथा पालयामि. ततश्चक्रिणा चतुर्भ्रातृसहितेन सेनानीप्रमुखपरिवृतेन च पुत्राय राज्यं दत्वा दीक्षा गृहीता. चक्रिणा चतुर्दश पूर्वाण्यधीतानि, बाहुप्रमुखैः पंचभिश्चैकादशांगानि पठितानि. अथानुक्रमेण वज्रसेनभगवान् मोक्षं गतः, श्रीवज्रनाभश्चाचार्य-पदवीं भुनक्ति, विंशतिस्थानकतपः कुर्वता च तेन तीर्थंकरगोत्रं समुपार्जितं. बाहुनामा साधुश्च पंचशतसाधूनामन्न-पानादिभक्तिं करोति, सुबाहुमुनिश्च पंचशतसाधूनां वैयावृत्त्यं करोति, पीठमहापीठौ च तपांसि कुर्वंतः वज्रनाभ आचार्यो बाहुसुबाहूप्रति वैयावृत्त्यादिगुणरंजितः सन् प्रशंसति, ततः पीठमहापीठौ स्वचेतसीरीर्ष्यां, बिभृतो यद् गुरुरावयोः प्रशंसां न करोति, केवलं स्वसेवाहेतोरेतौ द्वौ प्रशंसति एताहगीर्ष्यावशात्ताभ्यां स्त्रीवेदत्वमुपार्जितं, बाहुसुबाहुभ्यां च वैयावृत्त्यादि गुणेन भोग्यफलं बाहुबलं च समुपार्जितं. षडपि चतुर्दशलक्षपूर्वं चारित्रं प्रतिपाल्य प्रांते पादपोपगमसंस्थारकं कृत्वा सर्वायुश्चतुरशीतिलक्षमितं पालयित्वा सर्वार्थसिद्धविमाने गताः, तत्र त्रयस्त्रिंशत्सागरोपमायुरस्ति, श्रीआवश्यकसूत्रे एवं

प्रोक्तमस्ति– पूर्वं श्रीवज्रनाभः समाधिना मृत्वा सर्वार्थसिद्धौ गतः, ततोऽनंतरं षट्पूर्वलक्षगमनानंतरं ते पंचापि सर्वार्थसिद्धौ गताः, यदीत्थं नो चेत्तदा कथं संबंधो भवति ? तस्मात्सवार्थसिद्धिविमानात्पूर्वं श्रीवज्रनाभजीवश्च्युत्वा ऋषभत्वेनोत्पन्नः, तेऽपि च षट्पूर्वलक्षानंतरं च्युत्वा भगवत्पुत्रत्वेन भरतादयो जाताः, इति द्वादशमो भवः १२.

ॐअथात्रावसर्पिण्यां जंबूद्वीपे भरतक्षेत्रे प्रथमारको व्यतिक्रांतः, द्वितीयारकोऽपि व्यतिक्रांतः, तृतीयारकस्य च प्रांते तत्र सप्त कुलकरा जाताः, विमलवाहन १ चक्षुष्मान् २ यशस्वी ३ अभिचंद्र ४ प्रसेनजित् ५ मरुदेव ६ नाभयश्च ७ नाभेर्भार्या मरुदेवी, तस्याः कुक्षौ वज्रनाभजीवः सर्वार्थसिद्धिविमानाच्च्युत्वाषाढमासस्य कृष्णचतुर्थ्यामुत्तराषाढानक्षत्रे चतुर्दशस्वप्नसूचितोऽवतीर्णः, तस्मिन् समये स्वप्नपाठका न संति, स्वन एव नाभिराजा स्वप्नविचारकृत् पूर्णदिने चैत्रकृष्णाष्टमीनिशायाश्चार्धे उतराषाढानक्षत्रे प्रभोर्जन्माभवत्. षट्पंचाशद्दिक्कुमारीभिश्चतुःषष्टिभिरिंद्रैश्च जन्ममहोत्सवकरणानंतरं प्रथमं ऋषभस्वप्नदर्शनत ऋषभ इति स्वामिनोऽभिधानं कृतं, तत्सार्धं या युगलिनी जाताः तस्या नाम च सुमंगलेति दत्तं. पंचधातृदेवांगनाभिः परिवृतः स्वामी वृद्धिं गतः. देवाश्चोत्तरकुरुक्षेत्रात्कल्पवृक्षफलान्यानीय तस्मै ददति, स्वामी च तानि भक्षयति, क्षीरसमुद्रानीतानि पानीयानी च पिवति. एवं वर्षैकं जातं. तत इक्षुयष्टिं गृहीत्वेंद्रो भगवत्समीपे समागतस्तदा पितुरुत्संगस्थितेन प्रभुणेक्षुयष्ट्यर्थं हस्तः प्रसारितस्तत इंद्रेण प्रभोरीक्ष्वाकुवंशः स्थापितः एकदा किंचिद्युगलं विहर्तुं गतं, तन्मध्यात्पुरुषो मस्तकोपरि तालफलपतनान्मृतः, तस्य भार्या सुनंदानाम्नी युगलिनी परैर्युगलिभिर्नाभिराजसमीपे समानीता, कथितं च स्वामिन्नियं युगलिनी निराधारास्ति नाभिना प्रोक्तं मदंतःपुरे मोचनीया, ऋषभभार्या भविष्यति. अथ स्वाम्यपि यौवनवयः संप्राप्तः, इंद्रेणापि तं पाणिग्रहणयोग्यं विज्ञाय

सर्वदेवदेवीकृतमहोत्सवपूर्वकं सुमंगलासुनंदाभ्यां सह भगवतो विवाहः कृतः, अत्र ये एवं कथयंति यत् श्रीआदिप्रभुणापि पुनर्विवाहः कृतस्ते मूढा ज्ञातव्याः, पुनर्ये कथयंति भगवता भगिनी परिणीता तदपि तेषां मूर्खत्वं, यतस्तस्मिन् काले युगलधर्मस्थितिरासीत्, या स्थितिर्भवेत्तां पालयतां सतां न कोऽपि दोषः, ततः श्रीऋषभदेवेन सुनंदासुमंगलयोः शुभलग्ने पाणिग्रहणं कृतं, इंद्राणीभिर्गीतगानं कृतं, गंधर्वकिन्नरैर्वादित्राणि वादितानि. तदादितो लोके विवाहस्थितिर्जाता स्वाम्यप्यनासक्त्या सुखानि भुनक्ति, षट्पूर्वलक्षगमनानंतरं सर्वार्थसिद्धिविमानाच्च्युत्वा बाहुपीठजीवौ सुमंगलाकुक्षौ. भरतब्राह्मीयुगलतयोत्पन्नौ, सुबाहुमहापीठजीवौ च सुनंदायाः कुक्षौ बाहुबलसुंदरीयुगलौ प्रसवितौ. पुनः सुमंगलया युगलानामेकोनपंचाशत्प्रसूतं. एवं पुत्रशतं द्वे पुत्र्यौ च सर्वेऽप्यनुक्रमेण वृद्धिं गताः, अथ विंशतिपूर्वलक्षाणि व्यतिक्रांतानि. तदा युगलिका अन्योऽन्यं विवादं कर्तुं लग्नाः, कल्पवृक्षा . अपि कालदोषात्स्वल्पफलदा जाताः, हकार मकारधिक्काररुपनीतित्रय्यपि विलुप्ता, तदा युगलिकाः स्वामिनमुच्चैः संस्थाप्य राज्याभिषेकार्थं पानीयमानयितुं गताः, तस्मिन्नवसरे सौधर्मेंद्रस्यासनं प्रकंपितं. तदा स्वसमयं ज्ञात्वेंद्रेणागत्य प्रभो राज्याभिषेकः कृतः, सर्वशृंगारैः शरीरं मंडितं, देवदेवांगनानां पर्षन्मिलिता. इतस्ते युगलिका जलमादाय समागताः, तैः प्रभोः शरीरमलंकारादिभिर्भूषितं दृष्ट्वा विनयेन प्रभोश्चरणयोर्जलं सिंचितं. तेषां तद्विनयेन संतुष्टेनेंद्रेण तत्र विनीताभिधाना द्वादशयोजनविस्तीर्णा नवयोजनपृथुला च नगरी स्थापिता. तस्यां वापीकूपसरोवरमंडितायां त्रिभूमिकचतुर्भूमिकसप्तभूमिकैकविंशतिभूमिकप्रासादा अशोभंत. पुनस्तत्र द्वात्रिंशत्कोटिसुवर्णानां वृष्टिः कृता, उग्रा १ भोगा २ राजन्याः ३ क्षत्रियाश्च ४ स्थापिताः, पर्ट लोका अन्नेन विना बुभुक्षितास्तिष्टंति. कल्पवृक्षा अपि किंचिन्न ददति. तदा स्वामिना तेभ्यः शालिप्रमुखधान्यान्यु-

प्रदर्शितानि, लोकास्तान्यादाय भक्षयंति, परमपक्वत्वेन न जीर्णयंति प्रत्युत तेषामुदराणि तुदंति, प्रभोरग्रे चागत्य स्वजठराणि ते दर्शयंति.

इतश्च तत्र वंशघर्षणतोऽग्निरुत्पन्नस्तदा भगवता तेषां प्रोक्तमेतानि धान्यान्यस्मिन्नग्निमध्ये पाचयित्वा यूयं भक्षयत ? तदा तैः शालिप्रमुखं सर्वमप्यग्नौ प्रक्षिप्तं ज्वलितं च. तदा तैः प्रभोरग्रे समागत्य प्रोक्तं स्वामिन्नयं वेतालस्तु सर्वमपि भक्षयति, नः किंचिदपि पश्चान्न ददाति, तदा भगवतामृत्तिकातो घटादिनिर्माणं तेभ्यो दर्शितं. एवं प्रभुणा प्रथमं तेभ्यः पंच विज्ञानानि शिक्षापितानि. कुंभकार १ लोहकार २ चित्रकार ३ कर्षक ४ नापितविज्ञानं ५ च. तेषां प्रत्येकानां विंशतिभेदा भवंति, एवं भेदशतं. शिक्षापितं पुरुषाणां द्वासप्ततिकला भरतादीनां शिक्षापिताः, स्त्रीणां चतुःषष्टिकला ब्राह्मीसुंदर्योः शिक्षापिताः, अष्टादशलीप्यक्षरकलागणितकलाप्रमुखसर्वमपि प्रदर्शितं. अथ ते सर्वेऽपि लोकाः सुखेन स्वकार्यपरास्तिष्टंति. भगवता त्रिषष्टिलक्षपूर्वं राज्यं पालितं, एवं सर्वं त्र्यशीतिलक्षपूर्वं जातं, ततो लोकांतिकदेवाः समागताः, दीक्षाया अवसरश्च कथितः, स्वामिना ज्ञानेन दीक्षावसरं विज्ञाय वार्षिकदानं दत्तं, प्रतिदिनमेका कोटिरष्टौ लक्षांश्च सौवर्णिकान् ददाति. वार्षिकदानमिलने त्रिकोटिशतं चाष्टाशीतिकोट्यधिकमशीतिलक्ष-दानं जातं, इदं सर्वमपि दानद्रव्यमिंद्रादेशाद्धनदः समानीय पूरयति. ततो भरतादिभ्यो राज्यं विभज्य स्वामी कच्छमहाकच्छादिचतुःसहस्रपरिवारपरिवृतो महोत्सवपूर्वकं चतुःषष्टिभिरिंद्रैर्निर्मितां शिबिकामारुह्य नगराद्बहिर्निर्गत्य अयोध्याया उपवनेऽशोकवृक्षतले चतुर्मुष्टिकं लोचं कृत्वा चैत्रकृष्णाष्टमीदिने उत्तराषाढानक्षत्रे पश्चिमार्धे दीक्षांगृहीतवान्. इन्द्रादयः स्वस्थाने गताः, भरतादयोऽपि पुत्रा भगवद्विरहेणाश्रुपातपूर्वकं गृहे समायाताः, अथ स्वामिनो वर्षं यावदन्नादिकं

नो मिलित, ते सर्वचतुःसहस्रमुनयो ऽप्याहाराऽभावेन तापसा जाताः, कच्छ महाकच्छ पुत्रौ नमिविनमी दीक्षावसरे स्वामिनिर्देशात्परदेशं गतावास्तां, पश्चादागतौ च स्वामिनं तथाभूतं श्रुत्वा प्रभुसमीपे समागत्य विज्ञप्तिं चक्रतुः, हे स्वामिन्नावयो राज्यं देहि? कतिचिद्दिवसानंतरं धरणेंद्रो भगवद्वंदनार्थं समायातस्तेन नमिविनमिभ्यां प्रोक्तं कथं युवां सेवां कुरुथः? ताभ्यामुक्तं राज्यप्राप्त्यर्थं धरणेंद्रेणोक्तं यदा भगवता दानं दत्तं तदा युवां क्व गतौ? ताभ्यां प्रोक्तं परदेशं गतौ, अन्यस्य कस्यापि चाग्रे याचनां न कुर्वः, आवयोस्तु स्वामी दानं दास्यति. ततो धरणेंद्रेणोक्तमहं पातालवासी धरणेंद्रः स्वामिनः सेवकोऽस्मि, युवामपि तत्सेवकौ, अत आवयोर्भ्रातृत्वेन स्वामिन आज्ञया वैताढ्यपर्वते विद्याधरपदवीं स्वीकुरुतं. ततस्ताभ्यामपि तद्वचोंगीकृतं, ततो धरणेंद्रेण प्रज्ञप्तीप्रमुखविद्यास्ताभ्यां दत्ताः, नमिविनमी स्वामिनं प्रणम्य स्वस्वपरिवारमादाय वैताढ्ये समागतौ. तत्र दक्षिणश्रेण्यां नमिराज्ञा पंचाशन्नगराणि वासितानि, विनमिना चोत्तरश्रेण्यां पष्ठिनगराणि वासितानि, तेषां नगराणां नामानि श्रीहेमचंद्रसूरिकृत श्रीआदिनाथचरित्राद् ज्ञेयानि. अथ भगवानाहारार्थं सर्वत्र परिभ्रमति, परं कोऽपि न ददाति. एवं वर्षैकं जातं परं प्रभुर्मनसापि न क्षुब्धः. अथ भगवत आहाराधिकारमाह—

तस्मिन् समये बाहुबलेः पुत्रः सोमयशा गजपुरस्य राज्यं पालयति. अथ पूर्वं भगवज्जीववज्रनाभचक्रिणो यः सुयशानामा सेनानीरभूत्, तेनापि वज्रनाभेन सह दीक्षा गृहीतासीत्, चारित्रं प्रपाल्य पंचमेऽनुत्तरविमाने गतः तत्र त्रयस्त्रिंशदायुर्भुक्त्वा स सोमयशसः श्रेयांसनामा पुत्रो जातोऽस्ति. अथ श्रीऋषभस्वामी विहरन् सन् गजपुरे समागतः, गृहे गृहे लोका अनेककन्यासुवर्णमणिमुक्ताफलादीनि ददति परं स्वामी किमपि न गृह्णन् पश्चाद्व्याघुट्यति. ततो गवाक्ष-

स्थस्य श्रेयांसकुमारस्यैतादृशं भगवत्स्वरूपं वीक्ष्य जातिस्मरणमुत्पन्नं. अथ तस्यां निशायां श्रेयांसेन सोमयशसा सुबुद्धिनाम्ना नगरश्रेष्ठिना च स्वप्नानि लब्धानि. प्रातः काले सभायां तैः स्वस्वस्वप्नानि कथितानि. सोमयशसा राज्ञा प्रोक्तं वैरिभिर्वेष्टितोऽहं श्रेयांससाहाय्येन वैरिणोऽजयं. सुबुद्धिश्रेष्टिना प्रोक्तं त्रुट्यमाना सूर्यकिरणा मया श्रेयांसहस्तसाहाय्येन रक्षिताः, श्रेयांसेनोक्तं मेरुपर्वतो मयाऽमृतेन धौतः, तदा राज्ञा प्रोक्तं त्रीण्यप्येतत्स्वप्नफलानि श्रेयांसाय भविष्यंति. श्रेयासोऽपि हृष्टः सन् गृहे समायातः, इतश्च मध्याह्नावसरे प्रभुविलोकनानंतरं जातिस्मरणात्साधुदानविधिं जानन् स गवाक्षादुत्तीर्य स्वामिनं वंदित्वा निमंत्र्य च स्वगृहे समानीतवान्. भगवदग्रे चेक्षुरसानां घटा ढौकिताः, भगवतापि तन्निरवद्यं ज्ञात्वा स्वकीयहस्तौ प्रसारितौ. पाणिपतद्ग्रहलब्धिमहिम्ना तस्यैकोऽपि बिंदुरधो न पतति. श्रेयांसो रसं निक्षिपति तच्छिखोर्ध्वं वर्धते. एवं स्वामिना वैशाखशुक्लतृतीयादिवसे पारणं कृतं, तदादितो लोकेऽक्षयतृतीया जाता. श्रेयांसगृहे पंच दिव्यानि च प्रकटितानि, भगवता तत्र पारणं कृत्वा विहृतं श्रेयांसेन च सर्वलोकेभ्यः साधूनां भिक्षादानविधिः शिक्षापिता. स्वामी चानुक्रमेण सहस्रवर्षं यावच्छद्मस्थत्वं पालयन् पुरिमतालनगरे समागतः, तत्र फाल्गुनकृष्णैकादश्यां भगवतः केवलज्ञानं समुत्पन्नं. चतुःषष्टिभिरिंद्रैः समागत्य समवसरणं कृतं. तदा भरतस्य यमकशमकाभ्यां द्वे वर्धापनिके दत्ते. एकेन भगवत्केवलज्ञान-वार्ता कथिता. अपरेण चायुधशालायां चक्ररत्नोत्पत्तिः कथिता. तदा भरतः क्षणं विमृश्य धर्मधिया स्वामिकेवलज्ञानमहिमानं कर्तुं पुत्रविरहदुःखेनांधीभूतया हस्तिस्कंधाधिरूढया मात्रा मरुदेव्या सह चलितः, मार्गे वादित्रादिध्वनिं श्रुत्वा तत्कारणं मरुदेवी पप्रच्छ, तदा भरतेनोक्तं हे मातः श्रीऋषभदेवस्य केवलज्ञानं समुत्पन्नमस्ति, ततो देवैस्तस्य समवसरणादिमहिमा कृतोऽस्ति,

तत्कृतोऽयं गीतगान-वादित्रादि-ध्वनिः श्रूयते. तत् श्रुत्वा मरुदेवी-माता विरागतां प्राप्ता सती चिंतयत्यहोऽहं तु यन्मोहवशादंधीभूतास्मि स त्वयमीदृशानि सुखानि भुनक्ति. ततो नास्ति कोऽपि कस्येति ध्यायंत्यास्तस्याः चक्षुःपटलानि ध्वस्तानि. कर्मक्षयतः केवलज्ञानं प्राप्य सा मोक्षं गता. भरतेन स्वामी वंदितः, प्रभुणा च देशना दत्ता, तदा भरतस्य पंचशतपुत्रसप्तशतपौत्रैश्च दीक्षा गृहीता, पुंडरीक-प्रमुखाश्च-तुरशीतिगणधराः स्थापिताः, ब्राह्मी-प्रमुखाभिरपि दीक्षा गृहीता, श्रेयांसप्रमुखाः श्रावका जाताः, सुभद्रा-प्रमुखाश्च श्राविका बभुवुः, भरतेनापि सम्यक्त्वं स्वीकृतं. ततस्तेन प्रभुं वंदित्वा गृहे समागत्य चक्ररत्न-स्याष्टाह्निकामहोत्सवः कृतः, ततः सुषेणं सेनानीं कृत्वा तेन षट्खण्डानि साधितानि गंगोपकंठे गंगादेवी-गृहे च स सहस्रैकवर्षं यावत्स्थितः, नवनिधानानि प्राप्तानि, अनुक्रमेण गृहे समागत्य राज्याभिषेकः कृतः, परं चक्ररत्नमायुधशालायां न प्रविशति. तदा भरतेन प्रधानादिभ्यश्चक्ररत्नाऽप्रवेशकारणं पृष्टं, तैः कथितं हे स्वामिन् भवदीय-नवनवतिभ्रातरो यदि भवदाज्ञामंगीकृत्य भवंतं प्रणमिष्यंति तदैव चक्ररत्नमपि प्रविक्ष्यति. तदा भरतेन स्वाज्ञास्वीकारकृते तेभ्यो दूताः प्रेषिताः, ततस्तेऽष्टनवतिभ्रातरः संमील्य स्वामिपार्श्वे समागताः. स्वामिनं वंदित्वा च कथयामासुर्हे स्वामिन् भरतेन सार्धं वयं किं युद्धं कुर्मो वा प्रणामं कुर्मः? भगवता तु धर्मोपदेशो दत्तः, तत् श्रुत्वा वैराग्य-मासाद्य तैः सर्वैर्दीक्षा गृहीता.

अथ वाहुबलिना तां वार्तां श्रुत्वा दुःखमापन्नेन भरताय कथापितं त्वयैतदयुक्तं कृतं. तदा भरतेन कथापितं त्वमपि मम सेवां कुरु? नो चेद्राज्यं त्यज? वाहुबलिस्तां वार्तां नांगीकरोति, ततश्चक्रमपि गृहे न प्रविशति.

ततो भरतेन बाहुबलिप्रति दुतं प्रेषयित्वा चतुरंगसेनासहितेन बाहुबलि देशत्रिजयार्थं प्रस्थानं कृतं. बाहुबलिरपि सैन्य सहितः सन्मुखमागतः, अनेकानि युद्धानि जातानि, बहुमनुष्याणां संहारश्च जात., तदा सौधर्मेंद्रः समागत्य तौ निवारया-मास, परमेकोऽपि न निवर्त्तते. तदेंद्रेणोक्तं युवामेव द्वंद्वयुद्धं कुरुतं, येन जनसंहारो न जायते. ताभ्यामपि तत्प्रतिपन्नं, तत्र वाग्युद्धं. १ दृष्टियुद्धं. २ बाहुयुद्धं. ३ मुष्टियुद्धं. ४ दंडयुद्धं. ५ चेति पंच युद्धानि स्थापितानि. ततस्तैर्युद्ध्यमान-योस्तयोर्मध्ये भरतो हारितः, तदा खिन्नमानसेन तेन बाहुबलेरुपरि चक्र—रत्नं मुक्तं, चक्रं तु गोत्रिणं न पराभवति, ततो बाहुबलिः क्रुद्धः सन् मुष्टिमुत्पाट्य भरतंप्रति मारणार्थं धावितः सन् मनसि चिंत-यति, अहो वृद्धभ्रातरं कथं मारयामीती विमृश्य तेन स्वमस्तकात्पंच-मुष्टिलोचं कृत्वा दीक्षा गृहीता. अहंकारं धृत्वा कायोत्सर्गेण स्थितः, ब्राह्मया. प्रतिबोधिते सति कायोत्सर्गं पारयित्वा यावत् स चलति तावत्तस्य केवळज्ञानं समुत्पन्नं. स्वामिनं वंदित्वा स केवलिपर्षदि स्थितः अथानुक्रमेण स्वामी चैकलक्षपूर्वं चारित्रं केवळिपर्यायं च पालयित्वाऽष्टापदपर्वते दशसहस्र-साधुभिः सह मोक्षं गतः. भरतचक्रिणा तस्मिन् स्थाने चतुर्मुखो जिनप्रासादः कारितः, अथ राज्यं भुंजानस्य भरतस्य त्र्यशीतिलक्षपूर्वाणि सुखेन गतानि. एकदा भरत आदर्शगृहस्थितः सन्मुद्रि कापतनेनाऽनित्यभावनां भावयन् केवळज्ञानं प्राप्तः, तत्र देवतादत्तसाधुवेषो भरतमुनिर्दशसहस्र-मुकुटबद्धराजर्षिपरिवृत्त-सहस्रपत्रकमळासनमारुह्य धर्मदेशनां ददौ, लक्षैकपूर्वं केवळपर्यायं पाळयित्वा मोक्षं गतः, एवं श्रीमानादीश्वरो भगवान धर्मकार्यादिलोकस्थिती-करणात्त्रैलोक्य-पितामहो जात., इती श्रीदानकुलके ऋषभजिनकथा ॥

मूलम्—करुणाइदिन्नदाणो । जम्मंतरगहिअपुन्नकिरिआणो ॥
तित्थयरचक्किरिद्धिं । संपत्तो संतिनाहोवि ॥ ६ ॥

व्याख्या—करुणया अनुकंपया कृत्वा दत्तं दानं येन, तत्कीदृशं दानं ? जन्मांतरे गृहीतानि पुण्यकृत्यानि यस्मात्, तन्महिम्ना तीर्थंकरचक्रवर्तीऋद्धिं प्राप्तः श्रीशांतिनाथः ॥ ६ ॥

विशेषार्थः कथानकाद् ज्ञातव्यो यथा—

जंबूद्वीपे पूर्वमहाविदेहे पुष्कलावतीविजये पुष्करिण्यां नगर्यां घनरथतीर्थंकरो राज्यं भुनक्ति. तस्य प्रीतिमतीमनोहर्याख्ये द्वे भार्ये, प्रीतिमत्या मेघस्वप्नसूचितो मेघरथनामा पुत्रो जातः, मनोहर्याश्च रथस्वप्नसूचितो दृढरथनामा पुत्रो जातः, अनुक्रमेण तौ यौवनं प्राप्तौ, मेघरथस्य प्रियमित्रामनोरमाख्ये द्वे भार्ये आस्तां, दृढरथस्यापि सुमतीनाम्नी भार्या जाता मेघरथस्य नंदिषेणमेघसेनौ पुत्रौ जातौ, दृढरथस्य च रथसेननामा पुत्रोऽभूत्. कालांतरे घनरथतीर्थंकरेण वार्षिकदानं दत्वा मेघरथाय ज्येष्ठपुत्राय च राज्यं दत्वा दीक्षा गृहीता, केवलज्ञानं प्राप्य तीर्थं स्थापयित्वा घनरथभगवान् मोक्षं गतः. अथ मेघरथो राज्यं पालयति, सुश्रावकत्वेनाष्टमीपर्वणि पौषधानि करोति, जिनाज्ञां चाऽविराधित्वेन पालयति.

अथैकदा पौषधशालायां पौषधं कृत्वा सर्वान् राज्ञःप्रति स धर्मोपदेशं ददाति, इतस्तत्रैकः पारापतः कंपमानः

सन् तत्रागत्य तस्योत्संगे स्थित्वा मनुष्यभाषया ब्रूते, हे मेघरथराजन्! त्वं मां रक्ष रक्ष? इति श्रुत्वा राजा प्राह त्वं मा भयं कुरु? तावता तत्पृष्ठे एकः सिंचाणकः समागतः कथयितुं लग्नश्च हे राजन् मह्यं मद्भक्ष्यं देहि? राजा कथयति हे भद्र! शरणागतः कथं समर्प्यते? अन्यच्च परप्राणैः स्वकीयप्राणा न पोषणीयाः, पुनर्हे पक्षिन् तव पक्षैकदेशग्रहणाकर्षणादि ते पीडा जायते तदान्येषां तत्प्राणविनाशात्कथं पीडा न भवेत्? तव तु क्षणमात्रा तृप्तिर्भविष्यत्यस्य च प्राणसंहारो भविष्यति. पंचेंद्रियहननाज्जीवो दुर्गतिं गच्छति. तदा सींचाणको वदति हे राजन् सुख्येन धर्माधर्मविचारं करोति, किंच यथाऽयं पारापतस्त्वच्छरणमागतोऽस्ति तथाहमपि समागतोऽस्मि, अतो ममोपरि कृपां कुरु? यदि त्वमस्य रक्षां करोषि तदा मम प्राणनाशो भविष्यति, एवं च तव कृपा कथं स्थास्यति? राजा प्राह यदि त्वं बुभुक्षितोऽसि तदाहं त्वां विशेषसरसाहारं दास्यामि. सींचाणकेनोक्तमहमामिषं विनाऽन्यन्न भक्षयामि. राज्ञोक्तं मम राज्ये मांसं कुतः? यदि किंचिन्मृतकलेवरं भविष्यति तदा तस्यामिषं ते दास्यामि. सींचाणकेनोक्तं जीवत्प्राणिमांसमेवाहं भक्षयामि, राज्ञा प्रोक्तं यावद्भारोऽस्य पक्षिणो भविष्यति तावद्भारमितं मम शरीरमांसमहं ते दास्यामि, सींचाणकेनापि तदंगीकृतं. अथ राज्ञा तुलां समानीय तदेकपुटे पारापतो मुक्तो द्वितीये च स्वशरीरमांसं छेदित्वा छेदित्वा मुक्तं, परं यथा यथा स मांसं मुंचति तथा तथा पारापतपुटकमधस्ताद् व्रजति. एवं तस्य बहुभारं ज्ञात्वा साहसिको राजा स्वयमेव तुलायां स्थितः, तदा राज्ञः समस्तपरिवारो हाहारवं कुर्वन्नश्रुपातं चकार, चिंतयामास च हा अकस्मादनिष्टं कुतः समुत्पन्नं? राजा तु मनागपि चेतसि विषादं न करोति. इतस्तत्र कुंडलाद्याभरणमंडितः कश्चिद्देवः प्रादुर्भूयाहो सत्वमहो सत्वमिति वदन् गगनात्पुष्पवृष्टिं कृतवान्, प्रोवाच च हे राजेंद्र ईशा-

नेंद्रेण तव गुणवर्णनं कृतं, परं तदसहमानेन मयैतत्पक्षिस्वरूपं विधाय तत्र परीषहः कृतस्तन्मेऽपराधं क्षमस्व? इति क्षामयित्वा देवः स्वस्थानं गतः, राज्ञः शरीरे च सुखं जातं, सेवका अपि सर्वे सहर्षा जाताः, राज्ञापि पौषधं पारयित्वा पारणं कृतं, सुखेन राज्यं भुक्त्वैकलक्षवर्षप्रांते निर्मळचारित्रं प्रपाल्यानशनं कृत्वा सर्वार्थसिद्धौ पंचमेऽनुत्तरविमाने स गतः, तत्र त्रयस्त्रिंशत्सागरायुः प्रपाल्य श्रीशांतिनाथो जातः ॥ इति श्रीशांतिनाथ पूर्वभवकथा ॥

मूलम्—पंचसयसाहुभोयण—दाणावज्जिअसुपुन्नपब्भारो ॥
अच्छरिअचरिअभरिउ । भरहो भरहाहिवो जाउ ॥ ७ ॥

व्याख्या—पंचशतसाधूनां भोजनदानेनोपार्जितः पुण्यप्राग्भारो येन सः, तथाश्चर्यकारिचरित्रेण भृत ईदृशो भरतचक्री भरतक्षेत्राधिपो जातः, तत्कथा तु पूर्वमुक्तैव. ॥ ७ ॥

मूलम्—मूलंविणावि दाउं । गिलाणपडिअरणजोगवत्थूणि ॥
सिद्धो य रयणकंबल—चंदण विणउवि तिम्मि भवे ॥ ८ ॥

व्याख्या—मूल्येन विना मूल्यग्रहणं विना दत्त्वा ग्लानसाधोर्वैयावृत्तियोग्यवस्तु मोक्षं प्राप्तो रत्नकंबलगोशीर्षचंदनयोर्दाता यो वणिक् तस्मिन्नेव भवे. इयं कथापि पूर्वमुक्तैव. ॥ ८ ॥

मूलम्—दाऊण खीरदाणं । तवेण सुसिअंगसाहुणो सिग्घं ॥
जणजणिअ चमक्कारो । संजाउ सालिभद्दोवि ॥ ९ ॥

व्याख्या—दत्वा क्षीरदानं तपसा सुष्ठु शोषितमंगं शरीरं येनेतादृशं साधुं, जने जनितश्चमत्कारो येन एतादृशः शालिभद्रः संजातः ॥ ६ ॥

अथ शालिभद्र-कथा यथा—

राजगृहनगरसमीपे शालिनामा ग्रामोऽस्ति, तत्र धन्ना नाम्नी काचित्स्त्री संगमनामपुत्रेण सह वसति, स संगमो मेषान् रक्षति चारयति च, तस्य माता तु धनिनां गृहे रंधनपेषणगोमयस्थापनसंप्रमार्जनादिकं करोति. एवं तौ स्वकालं गमयतः, अथैकस्मिन् पर्वदिने सर्वलोकगृहे क्षीरादिभोजनं जायमानं दृष्ट्वा संगमो मातरं कथयति हे मातर्मम क्षीरान्नं देहि? साऽवोचत् हे पुत्र आवयोर्गृहे प्रथमत एव धान्यसंशयस्तर्हि क्षीरान्नं तु कुतः? इत्युक्ते स न मन्यते, यतो बालो गृहस्वरूपं कदाचिदपि न जानाति. अथ स यथा यथा तन्मार्गयति तथा तथा माता रोदितुं लग्ना, स्त्रीणां हि रुदनमेव बलं, तां रुदंतीं श्रुत्वा प्रातिवेश्मिकनार्यो मिलित्वा तां पृष्टुं लग्नाः, हे भगिनि त्वमद्य सुपर्वदिने कथं रोदिषि? तदा तया पुत्रवार्ता कथिता, ताभिरुक्तं त्वं चिंतां मा कुरु? वयं तुभ्यं क्षीरादिसामग्रीं दास्यामः, ततस्तद्दत्तसामग्रीतः क्षीरान्नं निष्पाद्य तया पुत्राय परिवेषितं, स्वयं च किंचित्कार्यनिमित्तं प्रातिवेश्मिक-

गृहे गता. इतः कश्चिन्मासोपवासी साधुः पारणदिने संगमगृहे समागतः, संगमेन तमागच्छंतं विलोक्य हृष्टेन तस्मै क्षीरान्नेन प्रतिलाभो दत्तः, साधुनापि तद्भावाऽखंडनत्वतो मेति नोक्तं, ततः साधुर्गतः, इतस्तन्माता समागता, स्थालं च रिक्तं दृष्ट्वा तया पुनरपरा क्षैरेयी परिवेषिता, चिंतितं चाहो मत्पुत्रोदरे किमेतावती बुभुक्षा वर्त्तते? तदा सांप्रति भिक्, संगमोऽप्याकंठं भुक्तवान्, रात्रौ च तस्य विसूचिका जाता, ततो मृत्वा साधुदानपुण्ययोगेन स राजगृहनगरे गोभद्रनामव्यवहारिणः सुभद्रानामभार्यायाः कुक्षौ पुत्रत्वेन समवतीर्णः, फलितशालिक्षेत्रस्वप्न–दर्शनतस्तस्य शालिभद्र, इति नाम दत्तं, अनुक्रमेण स विद्यामभ्यस्य यौवनं प्राप्तः, पित्रा च द्वात्रिंशत्कन्यानां पाणिग्रहणं कारितः, ततो गोभद्रश्रेष्ठिना श्रीमहावीरसमीपे दीक्षा गृहीता, निर्मलं चारित्रं च प्रतिपाल्य स देवलोके गतः, तत्रावधिज्ञानेन शालिभद्रं दृष्ट्वा मोहवशेन तत्पूर्वपुण्याकर्षणेन वा प्रतिदिनं स दिव्यवस्त्राभरणानि शालिभद्राय प्रेषयति. तन्मध्ये त्रयस्त्रिंशत्पेटा नानाभरणानां, त्रयस्त्रिंशत्पेटा वस्त्राणां, त्रयस्त्रिंशत्पेटाः सुगंधद्रव्याणां एवं सदैव नवनवतिपेटाः समुत्तरंति. एवं द्वात्रिंशदंतः पुरीभिः सह स सुखानि भुनक्ति.

अथैकदा केचिद्व्यापारिणो रत्नकंबलानि लात्वा राजगृहे समागताः, तद्रत्नकंबलमेकमपि श्रेणिकेन चेल्लणाराज्ञ्या मार्गितमपि नो गृहीतं, राज्ञा चाऽगृहीते सति अन्येनापि केनापि न गृहीतं. ततस्ते व्यापारिणो विषणा जाताः, पश्चात्ते व्यापारिणः शालिभद्रगृहसमीपे समागताः, सुभद्रया पृष्टं युष्मत्पार्श्वे किमस्ति? तैरुक्तं रत्नकंबलानि संति. पुनस्तया पृष्टं कियंति? ततस्तैरुक्तं षोडश. तयोक्तं स्तोकानि, तैरुक्तं कथं स्तोकानि? तया प्रोक्तं मम द्वात्रिंशद्वध्वः संति, कस्यै दीयते कस्यै नो दीयते? इत्युक्त्वा तेषां मूल्यं पृष्टं, तैरुक्तं सपादलक्षसौवर्णिका एकैकस्य

मूल्यमस्ति. तथापि तदंगीकृत्य सर्वाणि रत्नकंबलानि गृहीतानि, तेभ्यश्च यथोक्तं मूल्यं दत्तं. तद्वृत्तान्तं श्रुत्वा चेल्लणा कुपिता, श्रेणिकेन तां तथाभूतां ज्ञात्वा स्वप्रधानाः शालिभद्रगृहे कंबलैकमार्गणाय प्रेपिताः, नैस्तत्र गत्वा सुभद्रापार्श्वे रत्नकंबलं मार्गितं, तयोक्तं मया तु तान्यर्धमर्धं कृत्वा मे द्वात्रिंशद्वधूभ्यः समर्पितानि, ताभिश्च स्वचरण-क्षालनानंतरं तैश्चरणप्रमार्जनं विधाय गृहखालमध्ये निक्षिप्तानि, ततो यदि तज्जीर्णकंबलेच्छा भवेत्तर्हि सुखेन गृह्णीत? ततस्तैराश्चर्यं प्राप्य श्रेणिकसमीपे समागत्य सर्ववृत्तांतः कथितः हृष्टेन राज्ञा प्रोक्तं तं शालिभद्रमत्रा-नीयतां यथाहं तद्दर्शनं करोमि. ततो यदा ते प्रधानास्तदानयनार्थं तत्र समागतास्तदा सुभद्रया कथित शालिभद्रस्तु कुत्रापि बहिर्न गच्छति, राजैव मद्गृहं पावनं करोतु, ततस्तैः सुभद्रोक्तं श्रेणिकाय कथितं ततश्चित्रितः श्रेणिकः सद्यस्तत्रागतः, सुभद्रा स्वगृहचतुर्थभूमिकायां सिंहासने राजानं स्थापयामास. ततः सा सप्तभूमिकोपरिस्थशालिभद्र-पार्श्वे समागत्य तं कथयामास हे पुत्र! राजा गृहे समागतोऽस्ति, अतस्त्वमधस्तादुत्तर? शालिभद्रेणोक्तं हे मातर्मां कथं पृच्छसि? तत्क्रयाणकं मंदिरे प्रक्षिप? तत सा प्राह पुत्र त्वं सुखलीनो न किमपि वेत्सि, तत्क्रयाणकं नास्ति, किन्तु राजा श्रेणिकोऽस्ति यस्य छत्रछायायां वयं सुखेन तिष्ठामः, तत् श्रुत्वा शालिभद्रश्चिंतयति धिक्संसार-सुखानि यन्ममाप्युपरि स्वामी वर्तते, अतो मया सुकृतं न कृतं, ततः स नाटकं त्यक्त्वा मात्रा प्रेरितो द्वात्रिंशत्स्त्री-सहितश्चतुर्थभूमिकायां समागतो राज्ञे च प्रणामं कृतवान्. श्रेणिकस्तमालिंग्य निजोत्संगे स्थापितवान्, परं राज्ञः शरीरस्पर्शेन स व्याकुलीभूतः, तदा सुभद्रया प्रोक्तं हे राजन्! भवत्प्रतापं शालिभद्रो न सहते अतस्तं मुंचत? राज्ञा तथैव कृतं, शालिभद्रोऽपि भार्यासहितः पुनः सप्तमभूमिकां प्राप्तः, विस्मितो राजाप्यधस्तादुत्तीर्णः, तत्र

सुभद्रया विज्ञप्तं स्वामिन्नद्य यूयमत्रैव भोजनं कुरुत? अनेकाग्रहेण राज्ञापि तत्स्वीकृतं. अथ सुभद्रया सुगंधितैलादिना राज्ञो मर्दनं कारयित्वा स्नानसामग्री विहिता. स्नानं कुर्वतो राज्ञो हस्ताद्बहुमूल्यमुद्रिका गृहमध्यस्थकूपे पतिता. तदा स्वयमेव राजा तां गवेषयितुं कूपपार्श्वे समायातः, तत्र त्वनेकान्यमूल्यभूषणानि पतितानि तेन दृष्टानि, तन्मध्येंगारसदृशां स्वमुद्रिकां दृष्ट्वा विस्मितेन राज्ञा पृष्टे सति दास्योक्तं शालिभद्रस्य च तद्द्वात्रिंशत्स्त्रीणां दिनंदिनंप्रति निर्माल्यभूषणान्यत्र कूपे निक्षिप्तानि संति, तैश्चायं कूपो भृतोऽस्ति.

अथ राजा चिंतयति नूनं धन्योऽयं यस्य पुण्येनेतादृशानि विभूषणानि निर्माल्यानि समुत्तरंति. ततो तन्मध्यात्स्वकीयमुद्रिका तेन गृहीता. स्नानं कृत्वा पवित्रवस्त्राणि परिधाय सुखासने स्थित्वा राज्ञा भुक्तं, सुभद्रया च तस्य बहुभक्तिः कृता. ततः श्रेणिकः शालिभद्रर्द्धिमनुमोदमानो गृहे समागतः अथ शालिभद्रः संसाराद्विरक्तोऽभुत् इतस्तत्र केचित् स्थविरसाधवस्तत्र समागतास्तेषां वंदनार्थं शालिभद्रो गतो देशनां च श्रुत्वा स पृच्छति हे स्वामिन् केन पुण्येन शिरसि स्वामी न भवेत्? गुरुणोक्तं यो निर्मलं चारित्रं पालयति स त्रिजगत्स्वामी भवति. शालिभद्रेणोक्तं भगवन् मातरमापृच्छ्याहमपि चारित्रं गृहिष्यामि. ततोऽसौ गृहमागत्य मातरंप्रति कथयति, अद्य मया धर्माचार्या वंदिताः श्रुतश्च धर्मो रुचितश्च मे, मात्रा कथितं धन्यस्त्वं यस्य श्रीतीर्थंकरधर्मो रुचितः, पुनस्तेनोक्तमहं चारित्रं गृहीष्यामि, आज्ञां प्रदेहि? ततो दुःखं वहंती माता प्राह हे पुत्र चारित्रं विषमं लोहचणकचर्वणोपमं, त्वं च प्रकृत्या सुकुमारस्ततः प्रथममत्र गृहे स्थित एव परीषहान् सहस्व येन ते चारित्रं सुखाराध्यं स्यात्, ततः शालिभद्रः प्रति दिनमेकैकां भार्यां त्यक्तुं लग्नः.

इतस्तस्मिन्नेव नगरे शालिभद्रभगिनीभर्ता धन्नो नामा व्यवहारी परिवसति. एकदा तस्य भार्या धन्नस्य केशप्रमार्जनं करोति, तदा स्वकीयभ्रातृवैराग्यवार्तास्मरणतः सा रोदितुं लग्ना, धन्नेन पृष्टं कथं रोदिषि? तदा तया सर्वा रुदनवार्ता कथिता. तदा धन्नेनोक्तं तव भ्राता कातरः, तया प्रोक्तं हे स्वामिन् तद्वार्ताकरणमेव सुलभं, कर्तुं तु दुर्लभमेव. किंच यद्येवं तदा यूयं कथं न त्यजत? ततः साहसिना धन्नेनोक्तं हे प्रिये त्वं दूरीभव? मया समकालमष्टावपि भार्यास्त्यक्ताः. तदा ता अष्टावपि भार्याः समागत्य तं वंदित्वा कथयंति हे स्वामिन् हास्यास्पदे कथं विषादः? धन्नेनोक्तं मम कश्चिदपि कलहो नास्ति, मे मनसि शुद्धवैराग्यमस्ति, संसारच्छेदनाय चोद्यतोऽस्मि, ततो धन्नेन धर्मोपदेशं दत्वा ताः सर्वा अपि प्रतिबोधिता दीक्षां लातुं च परायणा जाताः, ततो धन्नः शालिभद्रगृहे समागत्य तं कथयति भो त्वं कातरत्वं मा कुरु? भार्याष्टकसहितोऽहं दीक्षां लातुमिच्छामि, त्वमपि सर्वास्त्यज? आवां संयमं लात्वा संसारच्छेदं करिष्यावः, शालिभद्रेणापि तत्प्रतिपन्नं. अथ श्री महावीरोऽपि तदैव तत्र समवसृतः, तदा निजभार्यासहितधन्नेन शालिभद्रेण च प्रभोरग्रे दीक्षा गृहीता. सुभद्रा चाश्रुपातं कुर्वती पुत्रगुणान् स्मरंती च द्वात्रिंशद्वधूसहिता गृहे स्थिता. श्रीमहावीरेणान्यत्र विहृतं. अथ धन्नशालिभद्रौ सिद्धांताभ्यासं कृत्वा तपांसि कर्तुं लग्नौ, दुर्बलशरीरौ च जातौ. अथैकदा श्रीमहावीरो विहरन् धन्नशालिभद्रर्षिसहितो राजगृहनगरमलंचकार, राज्ञा प्रजादिभिश्च भक्त्या वंदितः, धन्नशालिभद्रौ मासक्षपणपारणके श्रीवीरमामंत्र्य राजगृहे गतौ. तदा श्रीमहावीरेणोक्तमद्य मातुर्हस्तेन भवत्पारणकं भविष्यति. तथेत्यंगीकृत्य द्वावपीर्यासमितिं शोध्यमानौ भद्रागृहे समागतौ परं केनापि नोपलक्षितौ, भद्रागृहे तु श्रीमहावीरवंदनोत्कंठया सर्वोऽपि परिवारो व्यग्रचित्तोऽभूत्, क्षणमेकं स्थित्वा तौ पश्चाद्वलितौ, नगरप्रतो-

लीनिर्गमनावसरे एकया आभीरया भक्तिपूर्वकं ताभ्यां दधिदानं दत्तं, तज्ज्ञात्वा श्रीमहावीरसमीपमागत्य तौ पृच्छतः, हे स्वामिन् मातुर्हस्तेन पारणं कथं ज्ञातव्यं? ततो भगवतोक्तं शालिभद्रस्य पूर्वभवमाता धन्यानामाभीरी, शालिभद्रस्य त्वयं द्वितीयो भवोऽस्ति, धन्यायास्त्वद्यापि स एव भवः, ततो भगवता सर्वोऽपि तत्पूर्वभवसंबंधः कथितः. ततस्ताभ्यां तेनैव दध्ना पारणकं कृत्वा प्रभुमापृच्छ्य वैभारगिरिशिखरशिलोपरि पादोपगमनसंस्तारकः कृतः, तदा सुभद्रया द्वात्रिंशद्वधूसहितया प्रभुं वंदित्वा पृष्टं स्वामिन् मे पुत्रजामातरौ क्व गतौ? स्वामिनोक्तं ताभ्यां वैभारगिरावनशनं कृतमस्ति. ततः श्रेणिकसहितया तया तत्रगत्वा तौ वंदितौ. तयोस्तथास्वरूपं च दृष्ट्वा साऽत्याक्रंदनपूर्वकं रोदितुं लग्ना हे पुत्र गृहागतस्त्वं मया मूढया नोपलक्षितः, एतादृग्विलापान् कुर्वतीं तां दृष्ट्वा श्रेणिकेनोक्तं हे सुभद्रे! त्वं तु रत्नगर्भासि तव पुत्रो महासुभटो वीराधिवीरो ज्ञातव्यः, अतस्त्वं कातरतां मा कुरु? ततः श्रेणिकसुभद्रे गृहमागते. धन्नशालिभद्रावपि मासैकानशनं कृत्वा सर्वार्थसिद्धौ गतौ, भवांतरे च मोक्षं गमिष्यतः, धन्नस्याष्टौ स्त्रियोऽपि संयमं प्रतिपाल्य सद्गतिं गताः.

॥ इति दानकुळके शालिभद्र कथा संपूर्णा. ॥

मूलम्—जम्मंतरदाणाऊ । उल्लसिआपुव्वकुसलज्झाणाऊ ॥
कयपुन्नो कयवन्नो । भोगाणं भायणं जाऊ ॥ १० ॥

व्याख्या – जन्मांतरे पूर्वभवे सुपात्रे दानं दत्तं तस्मात्, उल्लसितं वा अपूर्वं मनोहरं कुशलं शुभं ध्यानं तस्मात्

कृतपुण्योऽसौ कयवन्नाभिधो भोगानां भाजनं जातः ॥ १० ॥

## अथास्य कथा

राजगृहनगर्यां श्रेणिको राजा, अभयकुमारो मंत्री धनावहः श्रेष्ठी, सुभद्रा भार्या, तयोः पुत्रो विनयादि गुणोपेतः कयवन्नकः. तस्य चित्तं प्रमदाकृतहावभावविभ्रमविलासैर्नानुमोदते. परं धर्मशास्त्रपठनपाठनादिपूर्वकं साधुसेवादरपरं जातं पित्रा चिंतितं- यौवनप्राप्तोऽप्ययं भोगतृष्णा विमुखोऽस्ति, इति विचार्य श्रेष्ठिना तस्य मित्रायोक्तं यदस्य संसारसंबंधिसर्वकलास्त्वया शिक्षापणीयाः, ततस्तेन तस्य सर्वा अपि विषयकलाः शिक्षापिताः, वेश्यायां चासक्तो विहितस्ततोऽसौ तत्रैव वेश्यागृहे तिष्ठति, श्रेष्ठ्यपि तत्र धनादिकं प्रेषयति. कालांतरे पित्राहूतोऽपि स तदासक्तत्वेन नायाति. पितरौ वृद्धौ जातौ, पुत्रविरहेण च मृतौ धनं क्षीणं, एकदा कयवन्नेन धनार्थं दासी स्वगृहे मोचिता, तया च कयवन्नभार्यापार्श्वे धनं मार्गितं, तयोक्तं धनं तु सर्वं क्षीणं परं मदीयाभूषणानि गृहाण ? यतो यथा प्रियस्य संतोषो भवेत्तथैव कुलवध्वा कर्तव्यं, दास्यपि तदाभूषणानि गृहीत्वा वेश्यायै समर्पितानि. अक्कया पुत्र्यै प्रोक्तं निर्धनोऽयं जातोऽतो निष्कासनीयः, अन्यं धनवंतं पुरुषमानयिष्यामि. पुत्र्या प्रोक्तं हे मातः सुपुरुषोऽयं कथं निष्कास्यते ? तयोक्तमस्य निर्धनस्य रक्षणेच्छा नास्ति. ततो गृहप्रमार्जनमिषेण तया तं बहिर्निष्कास्य गृहकपाटौ नियंत्रितौ. कयवन्नोऽपि तदभिप्रायं ज्ञात्वा चिंतयत्यहो वेश्याजातिरीदृशेव भवतीति

विचार्य तत उत्थाय रथ्यायां भ्रमन् स्वगृहसमीपं प्राप्तः, तत्र जीर्णीभूतद्वारं पतितप्रतोलीकं स्थाने स्थाने लूतातंतुवेष्टितं निजगृहं प्रविशता तेन गल्लन्यस्तहस्ताऽधोमुखी विभूषण रहिता निजभार्या दृष्टा. तदा तस्या अपि वामांगं स्फुरितं, तत्कारणं चिंतयंत्यास्तस्या द्वारागतप्रियतमो दृष्टीगोचरीबभूव. तया तत्कालमुच्छायाभिमुखीभूय तस्मै सन्मानपूर्वकमासनं दत्वा विनयो विहितः, द्वयोर्नयनेभ्योऽश्रुधारा पतिता, पार्श्ववर्तिसंबंधिनोऽपि मिलिताः, मातापित्रोर्मरणं श्रुत्वा. कयवन्नो विलापं कर्तुं लग्नस्तदा तया प्रोक्तं स्वामिन् विलापं मा कुरु? यद्भाव्यं तद्भवत्येव. ततस्तया तस्य भक्तिपूर्वकं स्नानं कारयित्वा भोजनं कारितं, सुखेन च तौ तिष्ठतः. कयवन्नेन निजप्रियां प्रत्युक्तं हे प्रिये मयैतावंति दिवसानि तवानादरः कृतस्त्वया क्षंतव्यं, तयोक्तं हे स्वामिन् एष मे कर्मणामेव दोषो न तु भवतः, एवं कियत्कालं तत्र स्थित्वैकदा तेन प्रियांप्रति कथितं हे प्रिये धनं नास्ति तद्व्यापारः कथं क्रियते? तद्विना च गृहनिर्वाहोऽपि कथं भवेत्? अतोऽहं विदेशं धनार्जनकृते गमिष्यामि. तत् श्रुत्वा सा कथयति हे स्वामिन् यूयं व्रजतेति कथं कथ्यते? परं युष्माभिः शीघ्रमागंतव्यं, अहमपि च गर्भिण्यस्मि. अथ तस्मिन्नेव दिने कश्चित्सार्थो विदेशे गच्छन् श्रुतः, तदा संध्यायां तौ दम्पती नगराद्बहिस्तत्सार्थे समागतौ, ततस्तत्पत्नी तस्मै चतुर्मोदकान् दत्वा तं च मंचके संस्थाप्य प्रणामं कृत्वा गृहे समागता. कयवन्नो मंचकोपरि सुप्तः सन् प्रमीलां प्राप. अथ तत्र यज्जातं तत् श्रूयतां. तस्मिन्नेव राजगृहनगरे कश्चिद्धनवान् व्यवहार्यस्ति. तस्य वृद्धा माता चतस्रो वध्वश्च. अथ तस्यामेव निशायां स व्यवहारी शूलरोगेण मृतस्ततस्ताश्चतस्रो वध्वो रोदितुं लग्नाः, श्वश्रूः कथयति यूयं मा

रुदध्वं, अपुत्रकत्वाद्राजा धनं गृहिष्यति. एनं मे मृतपुत्रं गर्तायां क्षिपत? अपरं पुरुषमहं समानयिष्यामि. ततस्ताः कथयंतिस्म हे मातः कथमियं वार्ता निष्पद्यते? श्वश्रूः कथयति युष्मासु या काचिद्वदिष्यति तामहं गर्तायां निक्षेप्स्यामि, ततो भीतास्ताः किमपि न जल्पंति. ततः सा ताभिर्वधूभिः सह पुरुषगवेषणार्थं प्रस्थिता, नगराद्बहिः कयवन्नांतिके समागता, मंचकसुप्तं तं समीचीनं पुरुषं दृष्ट्वा चतुर्भिर्वधूभिर्मंचकसहितं तमुत्पाट्य स्वगृहे आनीतः, तत्र च स मंचात्सुखशय्यायां मुक्तः, दीपकाश्च कृताः, चतस्रोऽपि वध्वस्तत्पादतले शुश्रूषां कर्तुं लग्नाः, निद्रांते कयवन्नो जागरितः सन् तत्सर्वं देवलोकसदृशं वीक्ष्य चिंतितवान् किमहं देवलोकेऽवतीर्णः? किंवा स्वप्नमिदं? तावत्ताभिः सर्वोऽपि वृत्तांतः कथितः, तत् श्रुत्वा स प्रमोदमापन्नस्ताभिः सह भोगान् भुनक्ति. कालांतरे तासां चतुर्णामपि एकैकः पुत्रो जातः, एवं द्वादश वर्षाणि व्यतिक्रांतानि. तदा सा वृद्धा श्वश्रूर्वधूः कथयति हे वध्वः पूर्वं यस्मात्स्थानादयमानीतस्तत्रैव पुनर्मोचनीयः, ताभिरुक्तं हे मातर्येन सह स्नेहः कृतः स मरणांतेऽपि न मोचनीयः, तत् श्रुत्वा श्वश्रूः कथयति यदि यूयं तस्य मोचनं न करिष्यथ तर्हि युष्मानपि गृहादहं निष्कासयिष्यामि. तदा भीताभिस्ताभिस्तथैव स मंचकसुप्तो नगराद्बहिर्मुक्तः, तस्योच्छीर्षके च सपादकोटिमूल्योपेतरत्नचतुष्टययुक्तचतुर्मोदका स्थापितास्तथा स्वचित्तानि कयवन्नकपार्श्वे मुक्त्वा ताः स्वगृहमागताः.

अथ द्वादशवर्षानंतरं स सार्थोऽपि तस्मिन्नेव दिने तत्र स्थाने समागतः, श्रुतश्च तद्वृत्तांतस्तद्भार्यया, ततः सा तत्रागत्य पश्यति, तदा तस्मिन्नेव मंचके तस्यामेवावस्थायां स्थितं निजभर्तारं ददर्श. भर्तापि स्त्रियं दृष्ट्वा

संतुष्टः, परस्परं कुशलं पृष्टं, कयवन्नेन सर्वापि वार्ता कथिता, ततो द्वावपि मंचकं गृहीत्वा गृहे समागतौ. तत्र स द्वादशवार्षिकं निजपुत्रं स्वोत्संगे स्थापयामास. पुत्रेणोक्तं हे पितर्मह्यं सुखभक्षिकां देहि ? पित्रा तन्मोदकेभ्य एकस्तस्मै दत्तः, पुत्रस्तं लात्वा पाठशाळायां पठनार्थं गतः, तत्र मोदकभक्षणात्तस्माद्रत्नं निःसृतं, तेन रत्नेन स रमयितुं लग्नः, इतो निकटस्थैककांदविकेन तत्करस्थं तद्रत्नं दृष्टं, तज्जिघृक्षता तेन तस्मै बाळकाय सुखभक्षिकां दत्वा तद् गृहीतं. इतोऽकस्मात्तद्रत्नं तस्य हस्ताज्जळकुंडिकायां पतितं, रत्नप्रभावतश्च तज्जलं द्विधा जातं, ज्ञातं च तेन तज्जळकांतरत्नमिति यत्नतो रक्षितं इतः श्रेणिकनृपपट्टहस्ती सरसि जलपानार्थं गतस्तत्र जलजंतुना तस्य पादौ गृहीतस्तेन स वहिर्निस्सरितुं न शक्नोति. राज्ञा नगरमध्ये पटहोद्घोषणा कृता, यः कश्चिद्गजं बंधनान्मोचयेत्तस्मै मत्पुत्रीं बहुग्रामांश्च दास्यामि. तदा स कांदविकी पटहं स्पृष्ट्वा रत्नं चाग्रे कृत्वा सरसि प्रविष्टः तदा जलापनयनतो जळजंतुर्हस्तिन त्यक्त्वा जळमध्ये लीनो हस्ती च शीघ्रं बंधनाभावतो वहिर्निस्सरितः, राज्ञा चिंतितं कथमस्मै पुत्री दीयते? मे वचनमपि च वितथं न भवेत्? अभयकुमारेणोक्तं हे राजन् चिंतां मा कुरु? सर्वं भव्यं भविष्यति. अथाभयकुमारेण कांदविकः पृष्टः कुतस्त्वयेदं रत्नं प्राप्तं? तेनोक्तं मम गृहे एव वर्तते. ततस्तर्जनानंतरं तेन सत्यं कथितं यत्कयवन्नपुत्रपार्श्वान्मयैतदधिगतं. ततस्तद्रत्नं लात्वाऽभयेन कयवन्नकः समाहूत पृष्टश्च हे व्यवहारिन् तव पार्श्वे ईदृशानि कियंति रत्नानि संति? तेनोक्तं चत्वारि, तन्मध्यादेकं भवत्पार्श्वेऽस्ति, इत्युक्त्वा तेन शेषत्रीण्यपि दर्शितानि. हृष्टेन राज्ञा तस्मै पुत्री परिणायिता बहुग्रामाश्च दत्ताः, रत्नसुवर्णादि बहुद्रव्यं च दत्तं. ततस्तस्याभयकुमारेण सह बहुप्रीतिर्जाता, कयवन्नेन नाश्चतस्रः स्त्रियो न विस्मृताः, एकदा तेनाभ-

यकुमाराय सर्वोदंतपूर्वकं कथितं मम चतस्रो भार्याश्चत्वारश्च पुत्रा अत्रैव राज-गृहे वर्त्तंते .तत्प्रकटीकृत्य मह्यं देहि? ततोऽभयकुमारेण सूत्रधारमाहूयैक: प्रासादः कारितस्तन्मध्ये च कयवन्नसदृशी यक्षमूर्ति स्थापिता. नगरे चेत्युद्घोषणा कारिता यदद्य सर्वस्त्रीभिः स्वस्वपुत्रैः सहात्र यात्रार्थमागंतव्यं या च नागमिष्यति तस्या. पुत्रस्यायं यक्षोऽशोभनं करिष्यति. ततोऽभयकयवन्नौ तत्र गुप्तौ स्थितौ. अथ नगरमध्यादनेकस्त्रियस्तत्र समायांति, अनुक्रमेण ताश्चतस्रोऽपि स्त्रियो निजपुत्रैः सह तत्र समागताः, कयवन्नेन चोपलक्षिता: कथितं चाभयकुमाराय तत्स्वरुपं, ताः स्त्रियोऽपि तां यक्षमूर्तिं दृष्ट्वा परस्परं कथयितुं लग्ना येन पुरुषेण सार्धं द्वादशवर्षाणि यावद्विषयसुखमस्माभि-र्भुक्तं तत्सदृशीयं मूर्तिर्दृश्यते, अभयकुमारेणापि तासामयमालापः श्रुतः, ते चत्वारो वाला अपि तस्य यक्षस्योत्संगे स्थिता संतः कथयंति हे पितस्त्वमेतावंति दिवसानि क्व गतोऽभूः? कथं न.ब्रवीषि? तैरेवमुक्त्वा तस्य श्मश्रूण्या-कर्षितानि, ततोऽभयकुमारस्यापि विश्वासः समुत्पन्नः ततस्ताभ्यां प्रकटीभूय पुत्रसहितास्ताः स्त्रियः श्रेणिकपार्श्वे समा-नीताः, कथितश्च सर्वोऽपि वृत्तांतः. राज्ञापि तत्स्त्रीपुत्रधनगृहादीनि कयवन्नाय समर्पितानि, वृद्धश्वश्रूस्तु पृथगेव तिष्ठति. अथ यदाक्का कयवन्नो गृहाद्बहिर्निष्कासितस्तदादितः सा वेश्या पतिव्रताधर्मं पालयति, तद्वृत्तांतमपि कय-वन्नेनाभयकुमाराय कथयित्वा स्वद्रव्यसहिता सापि गृहे समानिता. पुनः केनचिद्व्यवहारिणा बहुद्रव्यदानपूर्वकं कय-वन्नस्य स्वकीया महारुपवती पुत्री परिणायिता. एवमष्टभार्यायुतकयवन्नो विषयसुखानि भुनक्ति. सर्वदा विविध-हावभावोपेतनाटकानि विलोकयन् स गतकालमपि नो जानाति.

अथैकदा श्रीमहावीरस्तत्र समवसृतः, श्रेणिकाभयकुमारादिबहुलोकाः प्रभुं वंदितुं गताः कयवन्नोऽपि स्वामिनंवंदितुं

समागतः, देशनांते कयवन्नेन पृष्टं स्वामिन् ममांतरिता ऋद्धिः केन कर्मणा प्राप्ता? प्रभुणोक्तं त्व पूर्वभवे गोपालोऽभूः, एकदा त्वया निजमातुः पार्श्वे क्षीरान्नं मार्गितं, तदा निर्धनत्वेन तत्तुभ्यं दातुमसमर्थया तया रुदनं कर्तुमारब्धं, प्रातिवेश्मिकस्त्रीभिर्दयया क्षीरान्नसामग्री तस्यै दत्ता, ततः क्षीरान्नं निष्पाद्य तया तुभ्यं परिवेषितं. इतो मासक्षपणोपवासी साधुस्तत्र समागतस्त्वया शुभभावपूर्वकं चिंतितमस्मादर्धं द्विभागं वा साधवेऽर्पयामीति विचिन्त्य स्थाल्यां रेखा विहिता, पुनर्भाववृद्धितस्त्वया सकलमपि क्षीरान्नं साधवे दत्तं. पूर्वं रेखाविधानतस्तवांतरायो जातः, पश्चाच्च सकलदानेन तव संपूर्णर्द्धिः प्राप्ता. याभिः प्रातिवेश्मिकाभिः क्षीरसामग्री दत्ता, ता एता अष्टावपि तव भार्याः संजाताः. एवं स्वपूर्वभववृत्तांतं श्रुत्वा कयवन्नेन जातिस्मरणं प्राप्य वैराग्यतो गृहभारं ज्येष्ठपुत्राय समर्प्य बहुद्रव्यं सप्तक्षेत्रेषु दत्वा भार्यासहितेन दीक्षा गृहीता. निर्मलचारित्रं प्रपाल्य स्त्रीसहितो देवलोकं गतस्ततश्च्युत्वा मोक्षं गमिष्यति.

॥ इति दान कुलके कयवन्नक कथा ॥

## मूलम्-घयपूसवच्छपूसा । महरिसिणो दोसलेसपरिहीणा ॥
## लद्धीइ सयलगच्छो—वग्गहगा सुहगइं पत्ता ॥ ११ ॥

व्याख्या—गृहस्थगृहं गत्वा घृतमानीय तेन यो गणं पोषयति स साधुर्घृतपुष्यः कथ्यते, एवं वस्त्रपुष्योऽपि, एतादृशौ यौ ऋषीश्वरौ दोषलवेनापि रहितौ, लब्ध्या च सकलगच्छस्य भक्तिकारकौ शुभगतिं प्राप्तौ.

एतादृशाः साधवोऽनेके जाताः संति, गाथामध्ये साक्षान्नाम कस्यापि नास्ति, अतोऽत्र कथा नो
लिखिता, ग्रंथांतरादवसेया.

कुल-
कम्

ज्ञान
३९

**मूलम्—जीवंतसामिपडिमाए । सासण विअरिउण भत्तीए ॥**
**पव्वइऊणं सिद्धो । उदायणो चरमरायरिसी ॥ १२ ॥**

व्याख्या—जीवंतस्वामिनः श्रीमहावीरस्य प्रतिमायाः पूजानिमित्तं भक्त्याग्रामादि दत्वा प्रांते दीक्षामादाय मोक्षं गत
उदायिनामा प्रांतराजर्षिः ॥ १२ ॥
विस्तारार्थस्तु कथानकादवसेयो यथा—

चंपानगर्यां कुमारनंदिनामा स्वर्णकारो वसति, तेन धनबलेन पंचशतस्त्रीणां पाणिग्रहणं कृतं तथापि विष-
येभ्योऽसंतुष्टः, तत्र नगरे नागिलनामा श्रावकोऽस्ति, स तस्य सुवर्णकारस्य मित्रत्वात्तस्मै विषयत्यागोपदेशं ददाति,
परं स नांगीकरोति. अथ समुद्रमध्ये पंचशैलनाम्नि पर्वते हासाप्रहासाख्ये द्वे व्यंतरदेव्यौ तिष्टतः, ते इंद्रस्य
सेवकत्वेन इंद्रो यदि नंदीश्वरद्वीपेऽष्टाह्निकामहोत्सवं करोति तदा तत्र नृत्यतः, तयोः पितुर्विद्युन्माली च तदा
मृदंगं वादयति. स चैकदा मृतस्तदा ताभ्यां चिंतितमथ नौ को भर्ता भविष्यति? ततस्ताभ्यां कुमारनंदी वि-
षयासक्तो दृष्टस्तस्मै च स्वकीयं रूपं ताभ्यां दर्शितं, तयोः स्वरूपं वीक्ष्य विह्वलीभूतेन तेन पृष्टं युवां के

स्थः ? ताभ्यां निजवृत्तांतं निवेद्य प्रोक्त यदि तवास्मदीयवांछा चेतर्हि त्वया पंचशैले समागंतव्यं, इत्युक्त्वा ते अदृश्यीभूते. स तु तद्रूपमोहितः सन् राज्ञ आज्ञामादाय नगरमध्ये इत्युद्घोषणां दापयामास, यः कोऽपि पंचशैलद्वीपं दर्शयेत्तस्य कुमारनंदी लक्षैकं सुवर्णं ददाति. एकेन वृद्धनाविकेन स्वपुत्रसुखकृते निजमृत्युमप्यंगीकृत्य लक्षसुवर्णं गृहीत्वा तदंगीकृतं. नागिलादिभिर्निवारितोऽपि स कुमारनंदी तत्सार्थं प्रवहणस्थः प्रस्थितः. कतिचिद्दिवसानि यावत्समुद्रगाहनानंतरं दृष्टस्ताभ्यां समुद्रमध्ये एको वटवृक्षः, तदा तेन वृद्धनाविकेन तंप्रति प्रोक्तं यदीदं प्रवहणमस्य वटवृक्षस्याधः प्रयास्यति तदा समुद्रांतःस्थशैलोपर्यास्फाल्यैदं प्रवहणं भंक्ष्यति. त्वया तु तत्क्षणमेवास्य वृक्षस्य शाखायां विलग्योर्ध्वं गंतव्यं, रात्रावत्र भारंडपक्षिणः समागमिष्यंति, तन्मध्यादेकस्य पादे विलग्य त्वया पंचशैले गंतव्यं, मम च नूनं मरणमेवात्र.

इतस्ततप्रवहणं वटवृक्षाधः प्राप्तं लग्नं च, कुमारनंदी तु शाखामालंब्य वटोपरि स्थितः, रात्रौ भारंडपादलग्नः पंचशैले प्राप्तस्तत्र भ्रमंश्च हासाप्रहासाभ्यां दृष्ट आनीतश्च स्वावासे दत्तानि च तस्मै भोजनायामृतफलानि. ततः कामातुरोऽसौ भोगं प्रार्थयितुं लग्नस्तदा ताभ्यां प्रोक्तमेनेन तवौदारिकशरीरेणावाभ्यां सह भोगो न भविष्यतित्युक्त्वा ताभ्यामुत्पाट्य पुनरसौ चंपायां मुक्तः. किंतु तद्गतमानसत्वेन तस्य शांतिर्न जाता, वह्निप्रवेशेन मरणेच्छुरभूत्. नागिलमित्रेणागत्य प्रोक्तं हे बंधो त्वं चरित्रं गृहित्वा जिनधर्मं पालय ? येन तव देवलोकः सुलभो भविष्यति. मूढेन तेन तन्न स्वीकृतं. निदानपूर्वकं वह्निमरणं कृत्वा विद्युन्माली नामा हासाप्रहासापतिः स जातः. ताभ्यां सह च सुखानि भुनक्ति. वैराग्यान्नागिलोऽपि चारित्रं प्रपाल्य द्वादशमे देवलोके गतः.

॰अथैकदा सर्वदेवा इंद्रसहिता महोत्सवार्थं नंदीश्वरद्वीपे मिलितास्तदा ताभ्यां स्वपतये प्रोक्तं त्वं कंठे मृदंगं स्थापय यथावां नृत्यावः, स तु लज्जितस्तथा न करोति तावन्मृदंगः स्वयमेव तत्कंठे लग्नः. तेन निष्कास्यमानोऽपि न निर्गच्छति, दुःखितेनापि तेन मृदंगो वादितस्ताभ्यां नर्तितं च. तदा तत्रागतनागिलजीवदेवेन तमुपलक्ष्य पृष्टं भो विद्युन्मालिन् त्वं मामुपलक्षयसि ? तेनोक्तं स्वामिन् भवंतं को नोपलक्षयति ? तेनोक्तं महतः सर्वेऽपि जानंति. तदा तेन स्वकीयं मूलरूपं दर्शयित्वोक्तं रे पामर यदा मया प्रोक्तं तदा त्वया न मानितं, धर्मो न कृतस्तेन त्वं दुर्गतौ पतितः, ततस्तेन तत्पादौ निपत्योक्तं मां समुद्धर ? नागिलदेवेनोक्तं संप्रति श्री महावीरो गृहस्थाश्रमे वर्त्तते तं वंदित्वा तदाकारां चंदनमयीं तत्प्रतिमां कृत्वा तां सिंधुदेशे वीतभयनगरे मुंच ? सा प्रतिमा तत्र पूजयिष्यते तत्पुण्येन तव च वोधिवीजं सुलभं भविष्यति.

॰ततस्तेनापि तथैव कायोत्सर्गस्थश्रीवीरप्रभो. प्रतिमा कृता चांदनमयपेटामध्ये च निहिता अथ तस्मिन्नवसरे कस्यचिद्व्यवहारिणः प्रवहणं समुद्रोत्पाते षण्मासंयावत् पतितमासीत्. तत्र तां पेटां समुद्रोपरि तरंतीं कृत्वाकाशस्थेन विद्युन्मालिना तं व्यवहारिणंप्रति प्रोक्तं त्वमेतां पेटां प्रवहणमध्ये गृहाण ? येनायमुत्पातः शमिष्यति. ततो वीतभयपत्तने गत्वेमां पेटां चतुष्पथे मुक्त्वेत्थं त्वया वाच्यं यदस्मिन्मध्ये देवाधिदेवोऽस्ति, यस्तं प्रकटी करोति स एव गृह्णातु. इत्थमुक्त्वा देवोऽदृश्यो जातः, तेन व्यवहारिणापि तथैव कृतं, समुद्रः शांतो जातः, क्षणादेव स वीतभयपत्तने प्राप्तः, तत्र तां पेटां चतुष्पथे मुक्त्वा तेन देवोक्तवचनं कथितं. सकौतुका लोका निजनिजेश्वर नामोच्चारणपूर्वकं पेटां कुठारादिभिरुद्घाटयितुं लग्नाः, परंतु सा नोद्घटिता प्रत्युत कुठारा भग्नाः, तापसभक्तो

राजापि तत्रागत्य बहूपायान् कर्तुं लग्नो मध्याह्नं जात, भोजनायाकारितोऽपि राजा नागतस्तदा प्रभावती राज्ञी तत्रागत्य स्नानं कृत्वा पवित्रवस्त्राणि परिधाय तां पेटां चंदनादिभिः पूजयित्वा गाथामिमामुवाच—

मूलम्—गयरागदोसमोहो । सव्वन्नू पाडिहेरकयसोहो ॥
देवाहिदेवरूवो । अरहो मे दंसणं देऊ ॥१॥

इत्युक्ते सति तत्कालमेव पेटासंपुटं पृथग्जातं, सर्वेऽपि नागरा आश्चर्यं प्राप्ताः, तत्र च कायोत्सर्गस्थश्रीवीरप्रभोः कल्पवृक्षपुष्पालंकृतां प्रतिमां दृष्ट्वा सर्वेऽपि हृष्टाः, बह्वाडंबरेण गृहे समानीय सा देवालये स्थापिता. अथ सा परमश्राविका चेटकराजपुत्री प्रभावती राज्ञी तां प्रतिमां प्रतिदिनं त्रिकालं पूजयति. उदायिराज्ञा च तत्प्रतिमापूजानिमित्तं ग्रामं दत्तं, तथापि स तापसभक्तत्वं न जहाति. एकदा तत्पूजां कृत्वा प्रभावती तदग्रे नृत्यति, राजा च वीणां वादयति, तदा राज्ञा तस्या मस्तकं नो दृष्टं, तद्व्यग्रचित्तस्य राज्ञो हस्ताद्वीणा स्खलिता, तदा राज्या पृष्टं स्वामिन् किमिदं जातं? राज्ञोक्तं प्रिये नृत्यंत्यास्तव मया मस्तकं नो दृष्टमधुना तु तद् दृश्यते. प्रभावत्या चिंतितमथ ममायुः स्तोकमस्ति. पुनरेकदा स्नानांते तया दासीपार्श्वे श्वेतवस्त्राणि मार्गितानि, तया तान्येवानीय तस्य दत्तानि, परं दृष्टिभ्रांत्या राज्या तानि रक्तानि दृष्टानि, अतः क्रुद्धया तया दास्युपरि स्वादर्शः क्षिप्तो मर्मस्थानप्रहारतः सा मृता, ततो राज्या तान्येव वस्त्राणि श्वेतानि दृष्टानि. पश्चात्तापपरया राज्या राज्ञे कथितं

स्वामिन्नहं दीक्षां गृहीत्वानशनं करिष्ये, अत्याग्रहेण राज्ञा तत्प्रतिपद्य तस्यै कथितं हे प्रिये यदि त्वं देवलोके व्रजेस्तदा मम सत्यधर्मस्त्वया प्रदर्शनीयः, राज्या च तत्प्रतिपन्नं. ततः सा दीक्षोपेतानशनं कृत्वा मृत्वा सौधर्मदेवलोके गता. अथ देवदत्ता नाम्नी कुब्जा दासी तां प्रतिमामहर्निशं पूजयति प्रभावतिजीवदेवेन राज्ञः प्रतिबोधायानेके उपायाः कृताः, परं स न प्रतिबुद्धस्तदा देवेन तस्मै तापसरूपं विधाय स्वादुफलानि दत्तानि, तथा विधान्यफलप्राप्तिलुब्धकं च राजानं विधाय स तं वाटिकामध्ये समानीतवान्. तत्र च तेन बहवस्तापसा विकुर्विताः, यावद्राजा वृक्षात्फलानि गृह्णाति तावत्ते सर्वे तापसास्तं ताडयितुं यष्टिपाणयः प्रधाविताः, प्रणष्टो राजा दूरस्थजैनमुनीनां शरणं गतः, साधुभिश्च मधुरवाक्यैस्तच्चित्तं शांतं कृतं. ततो देवेन प्रकटीभूय जैनधर्मे तस्य मनः स्थिरीकृतं, शुद्धसम्यक्त्वधारी च स संजातः, देवेन तस्मै कथितं पुनरपि कार्यावसरेऽहं स्मरणीयः, ततः स देवलोके गत उदावी च सुखेन राज्यं पालयति.

अथैको गांधाराभिधः श्रावकोऽनेकतीर्थानि वंदित्वा शाश्वतजिनचैत्यवंदनार्थं वैताढ्यसमीपे समागतः, परं तदुपरि गंतुमसमर्थोऽभूत्, तदा तेन प्रतिज्ञा कृता यदि शाश्वतजिनचैत्यानां मे वंदनं भविष्यति तदैवाहमाहारं करिष्ये. एवं पंचदिवसानंतरं तत्तपसाकृष्टशासनदेवतया तस्य मनोरथः पूर्णीकृतः, दत्ताश्च तस्मै रुपादिवांछितार्थदा अष्टोत्तरशतगुटिकाः. अथ गांधारस्तन्मध्यादेकां गुटिकां मुखे प्रक्षिप्य चिंतितवानहं वीतभयपत्तने गत्वा जीवंतस्वामिप्रतिमां वंदेयं, एव चिंतनत एव स तत्र प्राप्तः, तत्र देवाधिदेवं पूजयित्वा स्थितः, ततो दैवयोगात्स मांद्यं गतः,

कुब्जिकया साधर्मिकत्वेन तस्य परिचर्या कृता, परं स्वस्यायुः क्षीणं ज्ञात्वा तेन सर्वा अपि गुटिकास्तत्प्रभाव-कथनपूर्वकं कुब्जायै दत्वा कालः कृतः, कुब्जिकया गुटिकामेकां भक्षयित्वा रुपं मार्गितं, तत्कालमेव तस्याः कुब्ज-त्वं गतं मनोहररुपं च जातं, ततः सा सुवर्णगुलिकेति नामतः प्रसिद्धा जाता. अथ तया चिंतितं मे मनोहरं रुपं पुरुषं विना निष्फलं, अयं च राजा मम पितृतुल्यः, ततस्तया चंडप्रद्योतनं मनसि कृत्वैका गुटिका भक्षिता, तदैव चंडप्रद्योतेनापि तस्या रुपं श्रुतं, तदाह्वानार्थं च दुतः प्रेषितः, तंप्रति सुवर्णगुलिकया कथितं त्वमेकामीदृशीं नवां चंदनमयीं देवाधिदेवप्रतिमां कारय? यथा तां नवां प्रतिमामत्र स्थापयित्वा पुरातनीं च सार्थे गृहीत्वागच्छामि तदा चंडप्रद्योतः पुनरुज्जयिनीमागत्य तथारुपां प्रभुप्रतिमां कारयित्वा तस्याः कपिलकेवलिपार्श्वे प्रतिष्ठां कारयामास. अथ कपिलकेवलिसंबंधो यथा—

कौशांब्यां जितशत्रुराजा, तस्य पुरोहितपुत्रः कपिलः, बाल्ये एव तस्य पिता मृतः, राज्ञा च नवीनः पुरो-हितः स्थापितः, एकदा तस्य नवीनपुरोहितस्याडंबरं दृष्ट्वा कपिलमाता मनसि दूना विललाप, कपिलेन तत्कारणं पृष्टा सोवाच ते बाल्य भावतस्तव पितृपदमयं भुनक्ति तेन मे मनसि दुःखं जायते. अतस्त्वं श्रावस्त्यां गत्वा तव पितृमित्रेंद्रदत्तस्य पार्श्वे विद्यां पठित्वात्र समागच्छ? यथा ते पितृग्रासः पुनः समागच्छेत् कपिलस्तूर्णं गत्वा पठितुं लग्नः, शालिभद्रनामा श्रेष्टी तस्य भोजनं ददाति, कर्मसंयोगत एकया दास्या सह तस्य संबंधो जातस्तेन सा गर्भवती जाता, तदा तस्याः पोषणादिकृते स द्रव्यचिंतायां पतितः, अथ तन्नगरराजा प्रतिदिनं प्रभाते प्रथमागतं द्विजं द्विमाषमितं स्वर्णं ददाति. कपिलस्तद्ग्रहणार्थं मनोविह्वलतयाऽर्धरात्र्यामेव गृहान्निर्गत आरक्षकैश्च

धूत्वा प्रभाते राज्ञोऽग्रे नीतः, तत्र सत्यकथनतस्तुष्टेन राज्ञा मनोऽभीष्टद्रव्यादिमार्गणाय स प्रोक्तः, तेन कथितं विचार्य मार्गयिष्ये. ततोऽसावशोकवाटिकायां गत्वा विचारयन् लोभोदधेः पारमप्राप्नुवन् वैराग्यं प्राप्य दीक्षांजग्राह अनुक्रमेण जातिस्मरणप्राप्तेरनंतरं केवलज्ञानं प्राप्य पंचशतचौरान् प्रतिबोध्य स्वशिष्यान् कृत्वोज्जयिनीं समागत्य तां प्रतिमां प्रतिष्ठापितवान्. ॥ इति कपिलसंबंधः ॥

अथ चंडप्रद्योतेन सा प्रतिमा सुवर्णगुटिकायै समर्पिता सापि तां प्रतिमां जिनालये स्थापयित्वा जीर्णां च गृहीत्वाऽनिलवेगगजोपरिस्था चंडप्रद्योतसहितोज्जयिनीं प्राप्ता. प्रभाते देवाधिदेवप्रतिमां वंदितुं समागतेनोदायिराज्ञा तत्रस्थपुष्पाणि म्लानानि दृष्ट्वा सूक्ष्मदृष्ट्या विलोकितं ज्ञातं चेयं मूलप्रतिमा नास्ति. इतस्तेन सुवर्णगुलिकापि नो दृष्टा, अनिलगतिहस्त्यागमनचिह्नानि दृष्टानि ततो दासीप्रतिमयोरपहारकं चंडप्रद्योतं ज्ञात्वा चतुरंगसेनामादाय स उज्जयिनींप्रति गतः, तत्र युद्धे चंडप्रद्योतं जीवंत गृहीत्वा तस्य ललाटपट्टे मम दासीपतिरित्यक्षराणि तेन लिखितानि. ततो यावद्राजा प्रतिमामुत्पाटयति तावदाकाशे वाणी जाता यद्वीतभयपत्तने रजोवृष्टिर्भविष्यति तेनाहं तत्र नागमिष्यामि, ततो राजा तां वंदित्वा पश्चाद्गतः, पथि मेघे वर्षति तत्र नगरं स्थापयित्वा स्थितस्तद्दशपुराभिधानं नगरं जातं. अथ तत्र पर्युषणापर्वणि समागते उदायिना पौषधं कृत, भोजनायाहूतेन चंडप्रद्योतेन चिंतितमद्यायं मम भोजने विषं दास्यति. इति विचार्य तेन सूदंप्रति प्रोक्तं ममाप्यद्योपवासोऽस्ति. तद्वृत्तान्तं श्रुत्वोदायिना सांवत्सरिकप्रतिक्रमणे तं सधर्मिणं क्षामयित्वा तदक्षराच्छादनार्थं पट्टबंधं दत्वा बंधनमुक्तः कृतो गतोऽपि च स निजनगरीं. अथोदायिनृपोऽपि निजनगरे गत्वा तां प्रतिमां पूजयन् सुखेन राज्यं करोति. एकदा रात्रिपौषधे

स धर्मजागरिकां कुर्वन् मनसि चिंतयति यद्यत्र श्रीवीरप्रभुः समागच्छेत्तदहं चारित्रं स्वीकरोमि. वीरप्रभुणापि ज्ञानेन तल्लाभं ज्ञात्वा तत्र विहृतं मार्गे तृषादिपीडितैः पंचदशशतसाधुभिः कालः कृतो जाताश्च ते सर्वेऽप्याराधकाः, अथ श्रीवीरप्रभौ तत्र समागते सति राज्ञा महताडंबरेण तस्य प्रवेशोत्सवः कृतः देशनां श्रुत्वा वैराग्यमापन्नेन राज्ञा हस्तौ नियोज्य कथितं हे स्वामिन् भवद्भिरत्रानार्यदेशेऽपि समागत्य ममोपरि महती कृपा विहिता. प्रभुणोक्तं हे राजन् त्वमंतिमो राजर्षिरसि, अतः कृपायोग्य एव. तत् श्रुत्वा राज्ञा गृहे समागत्य चिंतितं यद्यहं पुत्राय राज्यं दास्यामि तर्हि स चारित्रमप्राप्य संसारे भ्रमिष्यति, इति विचार्य तेन निजभागिनेयकेशिकुमाराय राज्यं दत्वा बहुपरिवारयुतेन दीक्षा गृहीता. अथ तेनैकादशांगानि पठितानि, कालांतरे शरीरे रोगाः समुत्पन्नाः, स्वाम्याज्ञया विहृत्य वीतभयपत्तने स समागतः. तत्र गोकुले स्थितो दध्न्याहारं करोति, तेन तस्य रोगोपशांतिर्जाता. एकदा तस्य पूर्ववैरिणा सामंतनाम्ना प्रधानेन केशिनृपायोक्तमयं राजर्षिस्ते राज्यं गृहीतुं समागतोऽस्ति. तद्वचनतो दुष्टीभूतेन राज्ञा गोकुले गत्वा विषमिश्रितं दधि मुनये दापितं मुनिरपि विषव्याप्तं स्वशरीरं ज्ञात्वा क्षपकश्रेणीमारूढः केवलज्ञानं प्राप्य मोक्षं गतः, ततः कुपितेन देवेन नगरोपरि रजोवृष्टिर्विहिता, नगरं च तन्नष्टं. ॥ इति श्री दानकुलके उदायिराजर्षिकथा. ॥

मूलम्—जिणहरमंडिअवसुहो। दाउं अणुकंपभत्तिदाणाइं ॥
तित्थप्पभावगरेहां। संपतो संपइराया ॥ १२ ॥

व्याख्या—जिनप्रासादैर्मंडिता वसुधा कृता येन सः, दत्वा अनुकंपादानं भक्तिदानं च तीर्थप्रभावकरेखां संप्राप्तः संप्रतिराजा ॥ १२ ॥

अस्य संबंधो यथा—कौशांब्यां नगर्यां श्रीआर्यमहागिरिआर्यसुहस्तिनौ समागतौ, वर्षं च तद्दुर्भिक्षमासीत्. श्रावकाश्च साधूनां बहुभक्तिं कुर्वंति. एकदा महर्द्धिकश्रावकस्य गृहे साधवो नानाप्रकाराणि भोजनानि गृह्णंति, तदा केनापि रंकेण तद् दृष्ट्वा तेषां साधूनां कथितं भो ममाप्यन्नं देयमिति वदन् स तेषां पृष्टे लग्न उपाश्रये समागतः, गुरुभिर्ज्ञानोपयोगतस्तं लघुकर्माणं भवांतरे च शासनप्रभावकं ज्ञात्वा तस्मै प्रोक्तं हे भद्र यदि त्वं यतित्वमाश्रयसि तदा वयं तुभ्यं भोजनं दास्याम', तेनापि तत्स्वीकृतं. ततः आर्यसुहस्तिसूरिभिस्तस्मै चारित्रं दत्वा यथेष्टं भोजनं दत्तं. रात्रौ विसूचिकातः शुभध्यानवशात्त कालं कृत्वोज्जयिन्यां त्रिखंडाधिपतिः संप्रतिनामा राजाभूत.

अथैकदा श्रीसुहस्तिसूरय उज्जयिन्यां समागताः, गवाक्षस्थेन संप्रतिना तान् दृष्ट्वा जातिस्मरणं प्राप्तं, शीघ्रं गवाक्षादुत्तीर्य गुरुन्नमस्कृत्य तेनोक्तं हे स्वामिन् मां किमुपलक्षध्वं? गुरुभिर्ज्ञानं प्रयुंज्य स उपलक्षितः. अथ संप्रतिर्गुरून् प्रति कथयति हे स्वामिन् मया यदिदं राज्यं प्राप्त तत्पूज्यानामेवायं प्रसादः, अतोऽहं कि करोमि तदादिशध्वं? गुरुभिरुक्तं शुभाध्यवसायतो जिनशासनप्रभावनां कुरु? ततः संप्रतिराजेन सम्यक्त्वमूलद्वादशव्रतान्यंगीकृत्य जिनशासनैकच्छत्रमंडितं निजराज्यं विधाय पूर्वभवस्वानुभूतदीनजनदुःखोल्लसितकरुणार्द्रमनसा स्थाने स्थाने

संसारसागराद्दीनजनोद्धरणप्रवहणतुल्या दानशालाः स्थापिताः, जगज्जनोद्धरणैकलक्षाणां श्रीमदर्हतां लक्षोत्तरपंचविंशतिसहस्रमितप्रासादैर्मंडितं त्रिखंडं विहितं, तन्मध्ये षट्त्रिंशत्सहस्रनूतनप्रासादाः कारिताः, शेषैकोननवतिसहस्रजिनप्रासादानामपारसंसारसागरनिमज्जन्निजात्मोद्धरणायेव जीर्णोद्धारो विहितः, सपादकोटिमिता जिनप्रतिमा निर्माप्य प्रतिष्ठिता, अनेकलोकानां जिनधर्मे स्थिरीकरणपूर्वकं विविधप्रकारोपेतं स्वामिवात्सल्यं च कृतं, अनार्यदेशेऽपि साधुवेषमंडिता निजसेवकान् पूर्वं प्रेष्य तद्देशमनुष्यानपि ज्ञातजैनसाध्वाचारविचारान् कृत्वा तत्रापि जैनमुनिजनविहारयोग्यसुलभता कारिता, संसारापारपारावारप्रवहणोपमतीर्थाधिराजश्रीशत्रुंजयतीर्थस्याप्युद्धारस्तेन विहितः, एवं श्रीजिनशासनोन्नतिपूर्वकं शुद्धश्राद्धधर्ममाराध्यायुःक्षये स देवलोकं गतः अनुक्रमेण च मोक्षं यास्यति.

॥ इति दानकुलके श्रीसंप्रतिराजकथा ॥

मूलम्—दाउं सद्धासुद्धे । सुद्धे कुम्मासए महामुणिणो ॥
सिरिमूलदेवकुमारो । रज्जसिरिं पाविउं गरुअं ॥ १४ ॥

व्याख्या—दत्वा श्रद्धया भावेन शुद्धान् निर्दोषान् कुल्माषान् महामुनीश्वरस्य, श्रीमूलदेवकुमारो गुर्वीं राज्यलक्ष्मीं प्राप्तः ॥ १४ ॥

तत्कथा चेयं—पाटलीपुत्रनगरे जितशत्रुराजा, तस्य मूलदेवाभिधः कुमारः सर्वकलानिपुणोऽपि पूर्वकर्मदोषेण द्यूतव्यसनासक्तोऽभूत्, पित्रा बहु वारितोऽपि स तस्मान्न निवृत्तः, तं दुर्व्यसनिनं ज्ञात्वा राज्ञा देशान्निष्कासितो भ्रमनुज्जयिन्यां स गतः, मार्गे केनचित्सिद्धपुरुषेण तस्मै रूपपरावर्तनगुणोपेता गुटिका दत्ता, तत्प्रभावतोऽसौ वामनरूपं कृत्वा नगरमध्ये परिभ्रमति. अथः तस्मिन्नेव नगरे देवदत्ताभिधैकामानिनी गणिका वसति, सा केनापि पुरुषेण सार्धं न रमते. मूलदेवस्तां वशीकर्तुं तद्गृहसमीपेऽत्यंतमधुरस्वरैर्गायनं कर्त्तुं लग्नः, तद्गानमोहितया वेश्यया तदाह्वानकृते स्वीयैका कुब्जा दासी प्रेसिता, दास्या तत्समीपे समागत्य विनयेनोक्तं युष्मान् मम स्वामिन्याह्वयति. तेनोक्तमहं वेश्यासंगं नेच्छामि, दासी तु तमाग्रहेण हस्ते गृहीत्वा चचाल. मार्गे मूलदेवेन विद्यावलेन तस्याः कुब्जत्वं दूरीकृतं. देवदत्तया चिंतितमेतादृक्कलावतोऽस्य कुब्जत्वं कथं? इतो गतकुब्जतां दासीं विलोक्य तया पृष्टं केन ते कुब्जत्वं दूरीकृतं? तयोक्तमनेन सुपुरुषेण निजविद्यावलतो मे कुब्जत्वं दूरीकृतं. तत् श्रुत्वा हृष्टा वेश्या विस्मयं प्राप्ता तस्य विविधां परिचर्यां विनयपूर्वकं कर्तुं लग्ना. इतस्तत्रैकः पुरुषो वीणां वादयन् समागतस्तस्य वीणावादनकलातो रंजितया वेश्यया मूलदेवः पृष्टः किमनेन वीणा सम्यग्वादिता न वा? मूलदेवेन शिरः कंपितं पृष्टं च तया तत्कारणं, मूलदेवो जगौ वंशमध्ये कर्करोऽस्ति. तुंबकावपि सगर्भौ स्तः तदा कौतुकतस्तया वीणोत्कलिता दृष्टं तन्मध्ये तथैव. पुनस्तां वीणां सज्जीकृत्य मूलदेवेन तथा सा वादिता यथा वेश्या हृष्टा सती

तस्योपरि सरागा जाता, भोजनवेलायांवे श्यया प्रोक्तं स्नानाभ्यंगादि कृत्वा भुज्यते, मूलदेवेनोक्तं चेत्तवेच्छा तर्हि तव शरीरेऽहं मर्दनं करोमि, वेश्यया तत्प्रतिपन्नं, तेन च तस्याः शरीरे तथा मर्दनं कृतं यथा सा कामातुरा सती चिंतयामास, नूनमयं सिद्ध-पुरुषो विद्ययैव कुब्जीभूतोऽस्ति, ततः शीघ्रं मूलदेवेन निजरूपं प्रकटीकृतं, वेश्यात्यंतं हृष्टा, भोजनानंतरं तांबूलादि भक्षयित्वा स्नेहालापान् वदंत्या वेश्यया तस्मै प्रोक्तं हे स्वामिन्नद्यावधि केनापि पुरुषेण मे मनो नो रंजितं त्वया चाद्य वशीकृतं, अथ त्वया मम गृहे सदैवागंतव्यं, मूलदेवस्तद्वचनं स्वीकृत्य प्रतिदिनं तत्रागत्य तया सह विलासं करोति, वेश्यया तस्मै द्यूतव्यसनत्यागोपदेशो दत्तः, परं तेन तन्न त्यक्तं, एकदा वेश्यया राज्ञः पुरो नृत्यं कृतं, मूलदेवेन च मृदंगो वादितस्तुष्टेन राज्ञा वेश्यायै वरमार्गणाय प्रोक्तं, तयोक्तमवसरेऽहं वरं मार्गयिष्यामि.

अथ तत्रैकोऽचलनामा सार्थवाहो वसति, तेन तया वेश्यया सह प्रीतिकरणार्थं पूर्वमनेकाभरणादीनि तस्यै दत्तान्यासन्, तेन तस्या वेश्याया गृहे मूलदेवागमनं विलोक्य द्वेषं वहताऽक्कायै तदागमननिषेधाय प्रोक्तं, ततोऽक्कया निजपुत्र्यै प्रोक्तं विनाऽचलमन्यपुरुषस्य संगं त्वं मा कुरु? वेश्ययोक्तमहमेकांतधनरागीणी नास्मि. गुणरागिण्यप्यस्मि, यादृग्गुणा अस्मिन्मूलदेवे संति तादृग्गुणा कस्मिन्नपि पुरुषे न संति. अक्कया प्रोक्तमस्य द्यूतकारकस्य मध्ये गुणानामसंभवएव अचलस्तु धनिकत्वाद्गुणवानेव. देवदत्तया प्रोक्तमावां तयोः परीक्षां कुर्वः, देवदत्तोक्तया ततोऽक्कायाऽचलपार्श्वे ईक्षुयष्टिर्मार्गिता, तेन तत्क्षणमेवेक्षुभृतशकटं प्रेषितं, देवदत्तयाऽक्कायै प्रोक्त किमहं हस्तिन्यस्मि? यत्तेनेक्षुशकटं प्रेषितं. ततो देवदत्तया दासीं प्रेष्य मूलदेवपार्श्वे ईक्षुयष्टिर्मार्गिता. तेन

कर्पूरादिना च संस्कृत्य मनोहरभाजने संस्थाप्य कोमलवस्त्रेण चोत्तमेक्षुयष्टिमादाय निस्त्वचं च विधाय शकलीकृत्य
कर्पूरादिना च संस्कृत्य मनोहरभाजने संस्थाप्य कोमलवस्त्रेण

चाच्छाद्य तदीक्षुभाजनं दास्या हस्तेन प्रेषितं. तदा देवदत्तया प्रोक्तं हे मातः पश्य गुण्यगुणिनोरंतरं. अक्का चमत्कृतापि लोभार्थिनी चिंतयति यद्ययं मूलदेवोऽत्र नायाति तदा वरमिति विचिंत्य तयाऽचलाय ज्ञापितं यदि मूलदेवोऽपमानं प्राप्नुयात्तदा स इतो गच्छेत्. अथाचलो ग्रामांतरगमनमिषेण प्रच्छन्नं स्थितः संध्यायां मूलदेवोऽचलं ग्रामांतरगतं ज्ञात्वा देवदत्तागृहे समागतः, अक्कया संकेतितोऽचलोऽपि शीघ्रं तत्रागतः, देवदत्तया मूलदेवो मंचकाधो गुप्तीकृतः, अक्कायाः कथनतो मूलदेवं मंचकाधः स्थितं ज्ञात्वाऽचलेन देवदत्तायै प्रोक्तमद्य मम मंचकोपर्येव स्नानं कर्तुमिच्छास्तीत्युक्त्वा स पानीयमादाय यावन्मंचकोपरि स्नानं कर्तुं लग्नस्तावन्मूलदेवो क्षुब्धः, अचलेन शीघ्रं मूलदेवं केशेष्वाकृष्य प्रोक्तमधुना तव किं करोमि? मूलदेवेनोक्तं यत्तुभ्यं रोचते तत्कुरु? अचलेन चिंतितमस्य रूपचातुर्यादिभिर्ज्ञायते यदयं कोऽप्युत्तमपुरुषोऽस्ति, इति विचार्य तेनोक्तमधुना तु त्वामहं मुंचामि परमद्यप्रभृति त्वयात्र नागंतव्यं, पुनर्यदि कदाचिन्ममोपर्यपि एतादृगापदापतेत्तर्हि प्रत्युपकारस्त्वया कार्यः, ततो मूलदेवो बहिर्निर्गत्यापमानतो दूनश्चिंतयति, अथ मया विदेशे गंतव्यमिति विचार्य स विदेशंप्रति चचाल. पथि मिलितेन पृष्टेन नैमित्तिकेन तस्मै प्रोक्तं वेन्नातटगतस्य तवोदयो भविष्यति, ततोऽयं तत्र चलितोऽनुक्रमेण द्वादशयोजनीमटवीं संप्राप्तः, मार्गे चैको ब्राह्मणस्तस्य मिलितः मध्याह्ने ब्राह्मणेन स्वपार्श्वस्थं पाथेयं भक्षितं. किंतु मूलदेवाय स्तोकमपि तस्मान्न दत्तं, एवं दिनत्रयं यावत्तेन द्विजेन तथैव कृतं, बुभुक्षितेनापि मूलदेवेन न किंचित्तस्मै मार्गितं, चतुर्थे दिने द्वयोः पंथानौ भिन्नौ जातौ, तदा मूलदेवेन ब्राह्मणाय तदभिधानं पृष्टं, तेनोक्तं

ज्ञान ५१

कुल-क्रम

ममाभिधानं निर्घृणशर्मेति. मूलदेवेनोक्तं यदि किंचित्कार्यं समुत्पद्यते तदा त्वया बेन्नातटे समागत्य मे मूलदेवस्य नाम पृष्टव्यं अथ मूलदेवस्ततश्चलन्नेकं ग्रामंप्राप्तो बुभुक्षितश्च ग्राममध्ये भिक्षार्थं गतः, ततो भिक्षायां लब्धान् कुल्माषान् गृहीत्वा वहिर्नदीतटे समागत्य चिंतयति यद्यधुना कोऽप्यतिथिः समागच्छेत्तर्हि तस्मै यत्किंचिद्दत्वाहं भोजनं करोमि इतस्तत्रैको. मासोपवासी साधुः समागतः, सद्यस्तेनाभ्युत्थायादरपूर्वकं कथितं हे स्वामिन्निदं गृहीत्वा मां निस्तारय? साधुनाऽतिलाभं ज्ञात्वा तस्मै प्रोक्तं हे महानुभाव! तस्मात्स्तोकान्नं देयं किं तु शुभभावोल्लसितमानसेन मूलदेवेन ते सर्वेऽपि कुल्माषाः साधुपात्रे निक्षिप्ताः हृष्टश्च सः 'धन्नाणं खु नराणं। कुम्मासा हुंति साहुपारणए' इति द्विपदीमुच्चरन्नृत्यति. तदैव वनदेवतया प्रकटीभूय तस्मै कथितं तव सुपात्रदानेनाहं तुष्टा, अस्या गाथाया अग्रेतनपादद्वये यत्त्वं मार्गयिष्यसि तदहं तुभ्यं दास्यामि. ततो मूलदेवेन भणितं " गणियं च देवदत्तं। हत्थिसहस्सं च रज्जं च " देवतयोक्तं तत्सर्वं ते भविष्यति. अनुक्रमेण स बेन्नातटं प्राप्तस्तत्रैकदेवकुळे रात्रौ स सुप्तः स्वप्ने च पूर्णं चंद्रं पीतं दृष्टवान्. प्रभाते कस्मैचिद्ब्राह्मणाय तेन तत्स्वप्नफलं पृष्टं, द्विजेनोक्तं प्रथमं त्वं भोजनं कृत्वा मदीयां रूपयौवनसंपन्नां पुत्रीं परिणय? पश्चादहं तव स्वप्नफलं कथयिष्यामि, तेन तथा करणानंतरं द्विजेनोक्तमितः सप्तमदिने त्वमेतन्नगरस्य राजा भविष्यसि, वहवो राजानस्त्वत्सेवां करिष्यंति, अनेकराजपुत्रीः परिणेष्यसि परं मम पुत्र्यास्त्वया कदापि प्रीतिभंगो न कार्यः, अथ स मूळदेवो हृष्टः सन् तत्र श्वशुरगृहे तिष्ठति. अथ सप्तमदिने स नगराद्बहिश्चंपकवनतरूतळे सुप्तोऽस्ति. इतस्तन्नगराधिपोऽपुत्रत्वेन मृतः, पंचदिव्यानि श्रृंगारितानि, हस्तिन्या नगराद्बहिरागत्य मूळदेवोपरि कळशः सिंचितः, जयजयशब्दमुच्चरद्भिर्हर्षैर्लोकैर्वेष्टितो गजस्कंधाधिरुढो मूळदेवो राजद्वारे समागतः, प्रधान-

पुरुषैश्च तस्य राज्याभिषेको विहितः अनेकराजपुत्रीः परिणीय स तत्र सुखेन राज्यं पालयति.

ॐअथैकदा तस्य देवदत्ता गणिका स्मृतिपथमागता, ततस्तेनोज्जयिनीनगराधिपतिविचारधवलाभिध राज्ञा सह प्रीतिः कृता, अथ मूलदेवस्यापमानकारकाचलंप्रति रुष्टा देवदत्ता वेश्या उवाच, रे दुष्ट त्वं दूरीभवाहं ते परिणीता भार्या नास्मि, अतःपरं त्वया मम गृहे नागंतव्यमिती निर्भर्त्सितोऽचल. स्वगृहं जगाम. देवदत्ता च मूलदेवैकलीनचित्ता समयं गमयांचकार. अथैकदा मूलदेवेनोज्जयनीपतये लेखः प्रेषितो लिखितं च तस्मिन् भवतां नगरमध्ये या देवदत्ताभिधाना वेश्यास्ति, तस्याश्च मम बहुप्रीतिर्वर्तते, ततो यदि तस्या मम पार्श्वे समागमनेच्छा भवेत्तर्हि सा मोचनीया, राज्ञा देवदत्तामाहूय ज्ञापितो लेखवृत्तांतः, तत् श्रुत्वात्यंतं हृष्टा सा बेन्नातटे गत्वा मूलदेवाय मिलिता, मूलदेवोऽपि तस्याः संगमेनात्यंतं संतुष्टः. अथैकदाऽचलो व्यापारार्थं बेन्नातटे समागत्य मणिमुक्ताफलाद्युपहारं राज्ञे दत्वा उवाच हे स्वामिन् राजभागनिमित्तं भवत सेवकान् प्रेषय? मूलदेवेन स उपलक्षितः परमचलेन मूलदेवो नोपलक्षितः, राज्ञा भणितं किं क्रयाणकमस्ति? तेनोक्तं पूगीफलमंजिष्ठादिकमस्ति. राज्ञोक्तं श्रेष्ठिन् त्वयार्ध एव राजभागो देयः, परमहं स्वयमेव तत्रागत्य तव क्रयाणकं विलोकयिष्यामि, इत्युक्त्वा राजा तत्रागत्य तत्क्रयाणकानि द्रष्टुं लग्नस्तदा मजिष्ठादिमध्यात्सुवर्णरूप्यरत्नानि निःसृतानि दृष्ट्वा रुष्टेन राज्ञा स चौरवद्बद्धः, तद्द्रव्योपरि च स्वसेवकाः स्थापिता, श्रेष्ठी च राजगृहे समानीतः, राज्ञाऽचलंप्रति प्रोक्तं त्वं मामुपलक्षयसि? तेनोक्तं हे महाभाग त्वां को नोपलक्षयति? राज्ञोक्तमावयोः पूर्वमेलापकं यदि संस्मरसि तदा वद? तेनोक्तं स्वामिन्नहं न स्मरामि. राज्ञा देवदत्तामाहूय प्रोक्तं त्वमेनमचलसार्थवाहमुपलक्षयसि? तदाऽचलेन देवदत्तोपलिक्षिता. देवदत्तयोक्तं भो अचल सोऽयं

मूलदेवोऽस्ति यस्य त्वया पूर्वं भणितं ममापद् उद्धारः कर्तव्य इति. अचलेनापि मूलदेवमुपलक्ष्य प्रोक्तं स्वामिन्नस्या आपदो मां समुद्धर ? मुलदेवराज्ञा कृपार्द्रमनसा तत्सकलधनसमर्पणपूर्वकं स मुक्तो गतो निजनगरंप्रति. अथान्यदा स निर्घृणशर्मा ब्राह्मणो मूलदेवं भूपतीभूतं श्रुत्वा तत्रागत्य प्रणामं कृतवान्. राज्ञा तद्वासग्रामस्तस्मै दत्तः, पुनर्येन कुल्माषान्नं दत्तं तस्मै व्यवहारिणेऽपि तद्वासग्रामो दत्तः, एव बहुकालं यावद्राज्यं पालयन्ननेकसुपात्रदानतीर्थयात्राजिनशासनोन्नतिं कृतवान्. अथ तस्मिन्नगरे चौराणामुपद्रवो बभूव, सर्वाः प्रजा मिलित्वा राज्ञोऽग्रे समागत्य कथयामासुः स्वामिन्नगरमध्ये चौरोपद्रवतः स्थातुं न शक्यते. राज्ञा दुर्गपालमाहूय कथितं शीघ्रमेव चौरं प्रकटीकुरु ? तेनोक्तं स्वामिन् स सिद्धविद्यश्चौरो मम वशं नायाति. ततो राजा स्वयं कार्पटिकवेषं विधाय रात्रौ साशंकं विलोकमान एकस्मिन् जीर्णदेवकुले सुप्तः, तदा तत्र चौरः समायातः, पृष्टं च तेन राज्ञःप्रति कोऽसि त्वमिति. राज्ञोक्तमहं कार्पटिकोऽस्मि, चौरेणोक्तं समुत्तिष्ठ तव दारिद्र्यं खंडयामि. ततोस्तौ नगरमध्ये समागतौ ततश्चौरेण विद्याबलेन कंचिद्धनिनं निद्रां दत्वा तस्य गृहाद्बहुधनं गृहीत्वा राज्ञः शिरसि तद्भारग्रंथिं मुक्त्वा चलितं दूरेऽटवीमध्ये भूमिगृहे तद्द्रव्यं स्थापितं.

अथ तस्य चौरस्यैका रूपवती भगिनी वर्तते, तां प्रति तेनोक्तमस्य प्राघूर्णकस्य चरणक्षालनं कुरु ? तया तत्रागत्य सुकुमालशरीरं मनोहररूपं च राजानं निरीक्ष्य प्रोक्तं हे सत्पुरुषाहं त्वां दृष्ट्वा हृष्टास्मि. अत्र चरणक्षालनमिषेण बहवो जना मया कूपमध्ये निक्षिप्ताः संति, परं त्वं तूर्णं निर्गच्छ? राजा ततोऽभ्युत्थाय प्रणष्टो गृहे समागतः, प्रभाते राजा नगरमध्ये निःसृतस्तत्र व्यवहारिवेषधरं भ्रमंतं तं चौरमुपलक्ष्य सन्मानपूर्वकं निजसभायामानीतवान्, दत्ता च तस्मै तेन निजप्रधानपदवी, चौरेणापि रात्रौ मिलतो नृप उपलक्षितः, ततो

राज्ञा प्रोक्तं तव भगिनीं मह्यं देहि? चौरेणापि सा राज्ञा सह परिणायिता, त्यक्तं च स्वकीयं चौरव्यसनं. कतिचिद्दिवसानंतरं राजाज्ञया तेन सर्वमपि धनं संस्मृत्य संस्मृत्य लोकानां समर्पितं. एवं मुलदेवराजा वहूनां लोकानामुपर्युपकारं कृत्वा सम्यक्त्वादिगुणं निर्मलं प्रतिपाल्य दानमहिम्ना देवलोके गतस्ततोऽनुक्रमेण च मोक्षं गमिष्यति. ॥ इति दानकुलके मूलदेवराजकथा समाप्ता. ॥

## मूलम्—अइदाणमुहरकविअण–विरइअसयसंखकव्ववित्थरिअं ॥
## विक्कमनरिंदचरिअं । अज्जवि लोए परिप्फुरइ ॥ १५ ॥

व्याख्या—अतिदानेन कृत्वा मुखरा वाचाला ये कवयः पंडितजनास्तैर्विरचितानि यानि शतसंख्यमानानि काव्यानी, तैर्विस्तृतं प्रसृतं श्रीविक्रमादित्यनरेन्द्रचरितं तदादि अद्यप्रभृति लोके परिस्फुरति. ॥ १५ ॥

श्रीविक्रमनरेन्द्रचरित्रं सिंहासनद्वात्रिंशिकादिग्रंथेषु विस्तारयुक्तमस्ति, तथापि तस्य स्वल्पः संबंधोऽत्र लिख्यते —मालवदेशे उज्जयिन्यां नगर्यां भर्तृहरिराजा राज्यं करोति, तस्य लघुभ्राता विक्रमादित्यनामास्ति. अथैकदा स ज्येष्ठभ्राता सह क्रोधं कृत्वा परदेशं गतः भर्तृहरे राज्ञोऽनंगसेनेत्यभिधानाऽत्यंतवल्लभा पट्टराज्यस्ति. सा चैकेन मेंठेन सह व्यभिचारं सेवते. अथ तत्रैकेन द्विजेन भवनेश्वरी देवी समाराधिता, तया संतुष्टया तस्मै अजरामरफलं दत्तं द्विजेन फलमादाय गृहं समागत्य चिंतितं मया याचकेनाजरामरीभूतेन किं? यदि भर्तृहरिराजाऽजरामरत्वं प्राप्नुयात्तदा, वरं, इति विचार्य तेन राज्ञस्फलं प्राभृतिकृतं, फलमाहात्म्यं च कथितं. संतुष्टेन राज्ञा तस्मै बहुधनं दत्तं. अथ राज्ञा

विचारितमिदं फलं प्राणप्रियराज्यै देयं, इति विचार्य स्नेहवशेन तेन तस्यै तत्फलं दत्तं. राज्या च स्वप्राणप्रियाय मेंठाय तत्फलं दत्तं, तेनापि चिंतितं मम वेश्यया सह प्रीतिरस्ति ततो मया तस्यै एवेदं देयं, इति विचार्य तेन कामलताभिधवेश्यायै तद्दत्तं, तयापि चिंतितमनेकपातकखनिभूतया मयाऽजरामरीभूतया सृतं, बहुलोकोपकारकारकभरतृहरिनृपयोग्यमेवैतत्फलं, ततस्तस्मै एव देयं इति विचार्य तया तत्फलं राज्ञो प्राभृतीकृतं. राज्ञा तत्फलमुपलक्ष्य वेश्यायै पृष्टं केन तवेदं फलमर्पितं ? तयोक्तं भवतः पट्टहस्तिपकेन मम दत्तं. हस्तिपकमाहूय बहुप्रहारांश्च दत्वा यदा पृष्टं तदा तेन मानितं यन्ममानंगसेनया राज्या दत्तमस्ति. तत् श्रुत्वा साश्चर्यदुःखितो राजांतःपुरे गतः, कथितं च तेन राज्यै यदमरफलं समानय ? राज्या प्रोक्तं मयैतत्फलं भक्षितं, ततोऽत्यंतं क्रुद्धेन राज्ञा तस्या कशाप्रहारा दत्तास्तदा तया सत्यं कथितं, अथ राज्ञो वैराग्यमुत्पन्नं, कथितं च तेनेदं काव्यं—

यां चिंतयामि सततं मयि सा विरक्ता ।
साप्यन्यमिच्छति जनं स जनोऽन्यसक्तः ॥
अस्मत्कृते च परितुष्यति काचिदन्या ।
धिक् तां च तं च मदनं च इमां च मां च ॥ १ ॥

अथ तेन चिंतितं राज्यं पुत्रं विना शून्यमेव त्यक्त्वा योगो गृहीतः, पश्चात्तत् शून्यं राज्यमग्निकवीरवेतालेनाधिष्ठितं. यः कोऽपि गोत्रियो राज्ये निषीदति स म्रियते. देशांतरगतेन विक्रमेणेयं वार्ता श्रुता, तदासावुज्जयिन्यामागत्य सामान्यवेषेण प्रधानेभ्यो मिलितः, तस्य सत्वाधिक्येन तुष्टैर्मंत्रिभिः स राज्ये स्थापितः, अथासौ रात्रौ निजशय्यायाः परितो बलिबाकुलादीन्निक्षिप्य स्वयं जागरमाणः सुप्तस्तावता करालरूपोऽग्निवेतालस्तत्र समागतस्तत्र सुरभिबलिं वीक्ष्य तत्परिमलं गृहणन् संतुष्टोऽसौ जगाद, त्वया प्रतिदिनमित्थमेव कर्तव्यमहं तवाभयदानं दास्यामि, इत्युक्त्वा स पश्चाद्वलितः, प्रभाते राजानं जीवंतं दृष्ट्वा प्रधानप्रमुखा हृष्टाः, अथैवं तेन दिनत्रयं यावद्बलिदानं कृतं, तृतीयदिने वेतालेन सह प्रीतिं कृत्वा तेन पृष्टं हे वेताल मदीयमायुः कियत्? तेन ज्ञानबलेन ज्ञात्वोक्तं तवायुः शतवर्षःमितं वर्तते. विक्रमेणोक्तं हे वेताल ममायुषो वर्षैकं न्यूनाधिकं कृत्वा त्वं तावद्विशून्यं कुरु? वेतालेनोक्तं वर्षमेकं तु दूरेऽस्तु किंतु दिवसैकमपि न्यूनाधिकं कर्तुं नाहं समऽर्थोऽस्मि. तत् श्रुत्वा विक्रम. संतुष्टः अथः चतुर्थदिने तेन बलिर्न कृतस्ततः कुपितो वेताल उवाच अरे अद्य त्वया बलिः किं न कृतः? यदि त्वं ममायुन्यूनाधिकं कर्तुं समर्थो नासि तर्हि कथमहं बलिं करोमि? इत्युक्त्वा संग्रामार्थं खद्गमुत्पाट्य स उत्थितः, एवं तत्साहसगुणेन तुष्टेन वेतालेनोक्तं वरं मार्गयस्व? राज्ञोक्तं त्वं मनुष्यं मा मारय? किंच मयि संस्मारिते त्वयागंतव्यं मदीयं च कार्यं कर्तव्यं, तथेत्युक्त्वा स स्वस्थाने गतः, विक्रमादित्यश्च सुखेन राज्यं पालयति.

अथैकदा कोऽपि योगी राज्ञः समीपे समागत्योवाच हे सत्पुरुष! मयैका विद्या साधयितव्यास्ति ततस्त्वयोत्तरसाधकत्वेन भाव्यं, राजा तत्स्वीकृत्य कृष्णचतुर्दश्यां रात्रौ स्मशाने योगिपार्श्वे गतः अग्निवेतालेनोक्तमयं योगी कपटी वर्त्तते ततस्त्वया सावधानतया स्थेयं. अथोत्तरसाधकत्वं कुर्वन् राजाऽहूतिवेलायां योगिनः कुदृष्टिं दृष्ट्वा तमेवोत्पाटयाग्निकुंडे निक्षिप्तवान्. राज्ञः पुण्यप्रभावेण स योगी सुवर्णपुरुषरूपः संजातः, प्रभाते महोत्सवपूर्वकं राज्ञा स गृहे समानीतः. अथ तस्यां नगर्यां पूर्वं श्रीअवंतिसुकुमालपुत्रेण श्रीपार्श्वनाथबिंब युतं महाकालाभिधानं तीर्थं स्थापितमासीत्. कालांतरे मिथ्यात्विभिर्जिनबिंबमधो निक्षिप्य तत्र शिवलिंगं स्थापितमभूत्. तदा श्रीसिद्धसेन सूरिभिस्तत्रागत्य तच्छिवलिंगस्फोटनपूर्वकं जिनबिंबं प्रकटीकृत्य पुनस्तत्तीर्थं वालितोविक्रमश्च प्रतिबोधितः परमश्रावकश्च कृतः, ततो विक्रमोऽनेकतीर्थयात्राः शत्रुंजयतीर्थोद्धारं च कृत्वा श्रीजिनशासनप्रभावनां कृतवान्. कालांतरे सुवर्णपुरुषप्रसादेन तेन समस्ता पृथ्वी ऋणरहिता कृता, स्वकीयः संवत्सरश्च स्थापितः, विक्रमनृपकृतदानादिवर्णनं ग्रंथांतरादवसेयं. ॥ इति विक्रमनृपकथानकम् ॥

मूलम्—तियलोयबंधवेहिं । तप्भवचरिमेहिं जिणवरिंदेहिं ॥
कयकिच्चेहिं वि दिन्नं । संवच्छरियं महादाणं ॥ १६ ॥

व्याख्या—स्वर्गमृत्युपाताललक्षणानां त्रिभुवनानां बंधवैः परमसहोदरभूतैरेतावता त्रिजगद्धितकारकैः, पुनः कीदृशै-

स्तद्भवचरिमैस्तस्मिन्नेव भवे मोक्षगामिभिरेतादृशैर्जिनवरेन्द्रैस्तीर्थंकरैः, पुनः कीदृशै कृतकृत्यैः सर्वकार्य-सिद्धिभिस्तीर्थंकरैर्दत्तं सांवत्सरिकं महादानं. ॥ १६ ॥

तीर्थंकरवार्षिकदानविधिर्यथा—

प्रथमं देवा नगराद्बहिर्दानमंडपं रचयंति. तन्मध्ये स्वर्णसिंहासनं मंडयंति, तत्र सूर्योदये भगवानागत्य पूर्वाभिमुखस्तिष्टति. देवताः सर्वग्रामनगरादौ 'यदिप्सितं तन्मार्गयध्वं' इत्याद्युद्घोपणां कुर्वंति, स्वामी तु सर्वेषां वांछितं पूरयति, प्रतिदिवसमेकाकोटीरष्टौ लत्तं च सुवर्णं प्रभुर्ददाति. एवंविधा सर्वतीर्थंकराणां स्थितिर्ज्ञातव्या.

**मूलम्—सिरिसेअंसकुमारो । निस्सेअस्स सामिउ कह न होई ॥**
**पासुअदाणपवाहो । पयासिउ जेण भरहंमि ॥ १७ ॥**

व्याख्या—श्री ऋषभदेवस्य प्रपौत्रः श्रेयांसकुमारो निःश्रेयसस्य मोक्षस्य स्वामी कथं न भवति ? येन;प्रासुकदानप्रवाहः प्रकाशितोऽस्मिन् भरतक्षेत्रे ॥ १७ ॥

स्ति

अस्यां चतुर्विंशतौ येन जगन्मध्येऽन्नदानं प्रकाशितं स श्रेयांसकुमारः प्रसिद्ध एव. दानेष्वन्नदानमपि प्रधानमस्ति, अन्नदातुः पुरस्तीर्थंकरा अपि हस्तं प्रसारयंति. अत्र विपये श्रीऋषभदेवसदृशं प्रधानं पात्रं श्रेयांसकुमारस्य निर्मलो

भावः, निर्मलेक्षुसदृशं च दानवस्तु एवमुत्तमोमत्तमदुर्लभत्रिकसंयोगो बभूव. श्रीश्रेयांसकुमारात्साधूनां दानविधि प्रवर्तितास्ति तस्य विस्तृतवृत्तांतस्तु श्रीआदिनाथचरित्रादवसेयः. ॥



मूलम्—कह सा न पसंसिज्जइ । चंदणबाला जिणंददाणेणं ॥
छम्मासिअतवतविउ । निव्वविउ जीए वीरजिणो ॥ १८ ॥

व्याख्या—सा चंदनबाला जिनेंद्रदानेन कथं न प्रशस्यते ? यया षण्मासतपस्तपितः श्रीवीरजिनः संतोषितः. ॥ १८ ॥

तस्याः कथा चेयं—चंपानगर्यां दधिवाहनराजा तस्य धारिणीनाम्नी प्रिया, तयोर्वसुमतिनामा पुत्री वर्तते. एकदा कौशांबीपतिशतानीकराज्ञा चंपानगरी भग्ना. दधिवाहनो नष्टस्तदा शतानीकराज्ञ उष्ट्पालकेन वसुमतिसहिता धारिणी गृहीता. शतानीकः सैन्ययुतो निजनगरींप्रति पश्चाद्वलितः, मार्गे तेन उष्ट्पालेन धारिणींप्रति प्रोक्तमहं त्वां मम भार्यां करिष्यामि. वसुमतीं च चतुष्पथे विक्रयीष्यामि. तत् श्रुत्वा धारिणी मनसि तीव्रखेदं दधाना मृता. अथ कौशांब्यामागत्य तेन दुष्टोष्ट्पालकेन चतुष्पथे वसुमती विक्रीता गृहीता च धनावहश्रेष्टिना बहुद्रव्यदानेन, गृहे समागत्य श्रेष्टी वसुमतीं पृच्छति हे पुत्री ! त्वं कस्य कुले समुत्पन्ना सा ! लज्जया वसुमती किमपि न जजल्प. श्रेष्टिना निजभार्यायै मूलायै कथितं वसुमतीमावयोः पुत्रीस्थाने ज्ञातव्या, सा च सर्वदा चंदनवत् शीतलवचनानि ब्रूते

तेन तस्याश्चंदनबालेति नाम दत्तं. एकदा मूलया चिंतितमस्या मनोहररूपमोहितः श्रेष्ठी एनां पुत्रीं कथयित्वापि नूनं भार्यां करिष्यति, तेनाहं च जीवन्मृतैव, इति विचिंत्य सा तस्या मारणोपायं चिंतयति. एकदा सा विनयवती चंदना गृहागतस्य श्रेष्टिनः पादक्षालनं कर्तुं लग्ना, तदवसरे तस्या भूमौ पतितो वेणीदंडः श्रेष्टिनोत्पाट्य स्वोत्संगे धृतस्तद् दृष्ट्वा मूलया चिंतितं नूनं मदध्यवसायः सत्यो जातः अथ श्रेष्टि तु भोजनं कृत्वा हट्टे गतः ततो दुष्टमूलया मस्तकमुण्डनपूर्वकं चंदनबाळां निगडितचरणद्वयां विधाय शून्यगृहमध्ये निक्षिप्य तत्कपाटकं दत्वा तालकं दत्तं, कथितं च परिवारेभ्यो यः कोऽपि श्रेष्टिनमेतद्वृत्तांतं कथयिष्यति तस्य जीवितसंशयो ज्ञातव्य इति तर्जनां दत्वा सा दुष्टा पितुर्गृहे गता. गृहागतश्रेष्टिना पृष्टं चंदना क्क गता ? कथं न दृश्यते ? इत्यादि श्रेष्टिना पृष्टोऽपि परिवारो मूलाभीत्या किमपि न प्रजल्पति, श्रेष्टिना ज्ञातं बही रममाणा भविष्यति. द्वितीयदिवसेऽपि श्रेष्टिना तथैव पृष्टं, परं कोऽपि तद्वृत्तांतं न कथयति. तृतीयदिने श्रेष्टिना क्रुद्धेन पृष्टं, तदैकया वृद्धभोजनकारिकया मूलायाः सर्वा वार्ता प्रकाशिता, दुखीभूतेन श्रेष्टिना शीघ्रमेव तालकं भंक्त्वा कपाटावुद्घाटितौ. तत्र मुंडितमस्तकां निगडितपादां चुत्क्षामकुक्षीं स्वकर्मदुषणदानतत्परां नमस्कारपदमुच्चरंतीमश्रुजलाविलनेत्रां तामुत्पाट्य श्रेष्टी बहिरानीतवान् तामाश्वास्य दयार्द्रचेताः श्रेष्टी तस्याः कृते गृहमध्ये भोजनं गवेषयितुं लग्नः, परं उष्टमूलया युक्त्या गोपितमुक्तं वत् क्कापि न लब्धं, महिष्यादिकृते सूर्पकमध्यस्थान् बाकुलान् दृष्ट्वा तदा तु तत्सहितं तत्सूर्पकं तस्यै प्रदाय श्रेष्टी स्वयं निगडभंजनकृते लुहारानयनार्थं गतः, तदा चंदनया चिंतितं मया यदि पुण्यानि न्यूनानि

कृतानि तदेयमीदृशी मे विपत्तिः समायाता, अधुनापि यदि कोऽपि पात्रमत्रायाति तदा तस्मै बाकुलान्नमिदं दत्वा भोजनं करोमीति चिंतयंती सा स्थितास्ति.



इतश्च श्रीमहावीरप्रभुः षण्मासाभिग्रहधारी तत्र समायातस्तदा सा हृष्टा सती चिंतयत्ययं कोऽपि महामुनिर्जंगमतीर्थरूपो मद्भाग्यबलेनात्र समागत इति विचिंत्य सर्वं दुःखं विस्मृत्य हृष्टा सती प्रभुं प्रति बाकुलान् दातुं लग्ना, तदा प्रभुणा स्वाभिग्रहो विचारितो द्रव्यतो माषान्नं सूर्पकोणके स्थितमस्ति, क्षेत्रतो गृहदेहलीमध्ये पादमेकं बहिरेकं चांतः कृत्वा स्थितास्ति, कालतस्तृतीयप्रहरोऽपिवर्तते भावतो राजपुत्री, विक्रीता, दासीत्वमापन्ना, कुमारिका, मुण्डितमस्तका, निगडितचरणा, बुभुक्षिता सत्यपि रोदनं न करोति, ततः स्वामिना करो न प्रसारितः, तदा अहो ममाऽभागिन्या हस्तादयं मुनिरप्याहारं न गृह्णातीति चिंतयंती सा रुदनं चकार, तदा स्वामिना निजं सर्वमप्यभिग्रहं संपूर्णीभूतं विज्ञाय हस्तौ प्रसारितौ, चंदनादत्तबाकुलान् गृहीत्वा पंचदिनोनषण्मासीतपःपारणं कृतं. तत्र पंच दिव्यानि प्रकटितानि, तत्पदद्वयस्थितं निगडं त्रुटित्वा स्वर्णमयं जातं, शिरसि केशपाशो जातः, सर्वांगेषु च रत्नानामाभरणानि जातानि. स अहो धन्यमहोधन्यमिति वदंतो देवास्तत्र नृत्यं चक्रुः, प्रभोः पारणकं जातं श्रुत्वा राजादयो बहवो लोकास्तत्रागताः, सौधर्मेंद्रोऽपि तत्र समागतः तावता धनावहः श्रेष्ठ्यपि तत्रायातः पश्यति स्वगृहं राजादिभिर्भृतं, शृंगारितां च चंदनां दृष्ट्वा हृष्टः ततः सौधर्मेंद्रः श्रेष्ठिनं कथयति, इयं दधिवाहनराज्ञः पुत्री चंदना प्रभोः प्रथमसाध्वी भविष्यति, ततो राजा लोभाकृष्ट-

स्तत्सर्वं धनं गृहीतुं लग्नस्तदेंद्रेण निवारितः, उक्तं च चंदना यं प्रति कथयिष्यति स एव तद्धनं गृहिष्यति. ततश्चंदनेनोक्तेन धनावहश्रेष्ठिना तत्सर्वं धनं गृहीतं. पुनरिंद्रेणोक्तमियं भोगतृष्णापराङ्मुखी वालब्रह्मचारिणी चरमशरीरिणी वर्ततेऽतः सुखेन पालनीया. इयं च तीर्थस्थापनाकाले दीक्षां लास्यतीत्युक्त्वा सौधर्मेंद्रः स्वस्थाने गतः, ततः श्रेष्ठिना सा दुष्टा मूला गृहाद्बहिर्निष्कासिता मृत्वा चनरकं गता. स्वामिनः केवले समुत्पन्ने सति द्वितीये समवसरणे चंदनया चारित्रं गृहीतं क्रमेण च मोक्षं गताः

॥ इति श्रीदानकुलके चंदनबालायाः कथा ॥

मूलम्—पढमाइं पारणाइं । अकारसु करंति तह करिस्संति ॥
अरिहंता भगवंतो । जेसिं घरे तेसिं धुवा सिद्धि ॥ १९ ॥

व्याख्या—दीक्षां लात्वा प्रथमपारणकमनेकतीर्थंकराश्चक्रुः संप्रति च कुर्वंति पुनः करिष्यंति चार्हंतो भगवंतो येषां गृहे ते गृहिणो ध्रुवं निश्चितं सिद्धिं मोक्षं यास्यंति तस्मिन्नेव भवे तृतीयभवे वा. ॥ १९ ॥

मूलम्—जिणभवणबिंबपुच्छय-संघसरूवेसु सत्तखित्तेसु ॥
ववियं घणंपि जायइ। सिवफलयमहो अणंतगुणं ॥२०॥

व्याख्या—जिनभवनं जिनप्रासादः, बिंबं जिनप्रतिमा, पुस्तकं भगवत्यादिसिद्धांतः, संघश्चतुर्विधः साधुसाध्वीश्रावक-श्राविकारूपः, एवंविधेषु सप्तक्षेत्रेषु यद्धनं वप्तं तदहो इत्याश्चर्ये अनंतगुणसुखरूपमोक्षफलदायकं भवति. ॥ २० ॥

॥ इति प्रथमं दानकुलकं समाप्तं ॥

# ॥ अथ शीलकुलकं प्रारभ्यते ॥

मूलम्—सोहग्गमहानिहिणो । पाए पणमामि नेमिजिणवइणो ॥
बालेण भुयबलेणं । जणंदणो जेण निज्जिणिउं ॥ १ ॥

व्याख्या—बालेनापि बाल्यत्वे वर्तमानेनापि येन प्रभुणा भुजबलेन स्वकीयहस्तवीर्येण जनार्दनः श्रीकृष्णो निर्जितस्तस्य सौभाग्यमहानिधेर्बालब्रह्मचारिणः श्रीनेमिनाथस्य जिनपतेश्चरणौ प्रणमामि. ॥ १ ॥

तस्य संक्षेपतश्चरित्रमित्थं —

☒ जंबूद्वीपे भरतक्षेत्रेऽचलपुरनगरे विक्रमराजा राज्यं करोति, तस्य धारिणी भार्या, सा च सकल स्त्रीगुणैरलंकृता. अन्यदा रात्रौ सुप्तया तयेत्थं स्वप्नं दृष्टं, प्रथमं तया सहकारतरुर्दृष्टस्ततः केनापि पुरुषेण तत्रागत्य तस्यै कथितं सांप्रतं मयैषो वृक्षस्तवांगणे वप्तोऽस्ति, ततः कस्मिंश्चित्कालेऽहं तं वृक्षमन्यत्र वप्स्यामि, अनया रीत्या नववारमहमेतं वृक्षं वप्स्यामि. तथैतत्फलादिकं दिनं दिनं प्रति वृद्धिं प्रयास्यति इति

स्वप्नं दृष्ट्वा धारिणी जागृता, प्रभाते च तया तत्सर्वस्वप्नवार्ता राज्ञोऽग्रे कथिता राज्ञा स्वप्नपाठकेभ्यः पृष्टं, तैः प्रोक्तं पुत्रो भविष्यति, परं नववारस्यार्थं वयं न जानीमहे, ततो धारिण्या शुभदिने पुत्ररत्नं प्रसूतं, राज्ञा च महोत्सवपूर्वकं तस्य धन इति नाम दत्तं. अथ कुसुमपुरे श्रीसिंहराज्ञो विमलाभिधाना राज्ञी, तया धनवतीनामा पुत्री प्रसूता. सा चतुःषष्टिकलानिपुणा यौवनं प्राप्ता. एकदा सा सखीसहिता वने क्रीडां कर्तुं गता, तत्र तया कस्यचित्पुरुषस्य करे चित्रपट्टो दृष्टः, तस्मिंश्चित्रितां मनोहरां पुरुषमूर्तिं वीक्ष्य तया तं प्रति प्रोक्तं कस्येदमाश्चर्यकारि मनोहरं रूपमस्ति? पुरुषेणोक्तमचलपुरनरपतिविक्रमनृपपुत्रधनकुमारस्यैतद्रूपमस्ति. ततः कुमारी तं रूपं पुनःपुनर्विलोकमाना कामपीडिता सती निजसख्यै कमलिन्यै प्रति जगाद, हे सखि मयैतादृग्मनोहरं रूपं कुत्रापि दृष्टं नास्ति, इदं रूपं दृष्ट्वा मे मनसि हर्षोत्कर्षः समुत्पद्यते. ततः सख्या सार्धं धनवती गृहे गता, परं मनोविह्वलतया न केनापि सह जल्पति, न चाश्नाति न च स्वपिति च. तां तथावस्थां दृष्ट्वा कमलिन्योक्तं हे सखि त्वं चिंतातुरा कथं दृश्यसे? इति बहुवारं पृष्टापि धनवती लज्जया न किंचिदपि वदति, तदा चतुरसख्या तन्मनोऽभिप्रायं ज्ञात्वा तस्या मातुः पुरः सर्वा वार्ता कथिता, मात्रा च धनवतीं सालंकारां कृत्वा नृपाग्रे मोचिता, तां दृष्ट्वा राज्ञो मनसि तस्या वरसंबंधिचिंता समुत्पन्ना. इतस्तस्याः पुण्ययोगेन विक्रमराज्ञः कश्चिद्दूतो राजकार्यार्थं नृपाग्रे समायातः, तेन मनोहररूपाद्यलंकृतां राजपुत्रीं विलोक्य कथितं, हे राजन्! तवेयं पुत्री विक्रमभूपांगजधनकुमारस्य योग्यास्ति. राज्ञा प्रोक्तं भो दूत नूनं त्वया मे मनसो वार्ता ज्ञाता.

अथ यथा तद्वार्ता सफलीभवेत्तथा कुरु? ततो राज्ञा कुम्कुमपत्रिकां लिखित्वा तेन सार्धं कन्यादानार्थं स्वकीयो दूतः प्रेपित., दूतेन तत्र गत्वा विक्रमराज्ञो हस्ते नतिपूर्वकं कुम्कुमपत्रिका मुक्ता, विक्रमनृपेणापि हर्षतस्तत्प्रतिपन्नं. अथ धनकुमारेणापि धनवत्यर्थं मुक्ताफलहारो लेखश्च प्रच्छन्नं तेन दूतेन सार्धं प्रेपितौ. दूतेन तत्र गत्वा धनवत्यै हारलेखौ समर्पितौ. धनवती लेखं वाचयित्वात्यंतं प्रमुदिता सती तं हारं स्वकंठे स्थापयामास. अथ विक्रमराजा गजतुरगादिसकलसैन्यसहितो महताडंबरेण पुत्रयुतः कुसुमपुरे समागतः, शुभदिवसे च महोत्सवपूर्वकं दंपत्योः पाणिग्रहणं जातं, श्रीसिंहराज्ञा करमोचनावसरे धनकुमाराय बहुद्रव्यं दत्तं. ततो धनवतीं गृहीत्वा धनकुमारः परिवारयुतो निजनगरे समागत्य तया सह विपयसुखानि भुंजानः सुखेन कालं गमयति.

☒ अथैकदा विक्रम राजा धनधनवती सहितो गजेंद्रमारुह्य वनक्रीडां कर्तुं गतस्तत्र वने चतुर्ज्ञानधरं श्रीवसुंधराचार्यं वीक्ष्य वंदनां कृतवान्. मुनिना देशना दत्ता. देशनांते विक्रमराज्ञा मुनये पृष्टं हे स्वामिन् यदायं धनकुमारो गर्भे समायातस्तदा तस्य मात्रा स्वप्ने आम्रतरुमहित एकः पुरुषो दृष्टः, तेन पुरुषेण चोक्तमहमष्टवारं तवांगणे इमं सहकारतरुं वप्स्यामि, तस्य कोऽर्थविशेषः? साधुनोक्तं हे राजन्! तेन देवेन तदस्य भवस्वरूपं कथितं, नवमे भवे चासौ मोक्षं यास्यति. तत् श्रुत्वा संतुष्टो राजा मुनिं वंदित्वा परिवारयुतो गृहे समायातः. अथान्यदा धनधनवत्यौ क्रीडार्थं वने समागतौ, तत्रैकं साधुं मूर्च्छया निश्चेतनीभूय पतितं वीक्ष्य शीतलजलवायुयोगेन तं सचेतनं चक्रतुः, ततस्तं साधुं तौ स्वगृहे समानयामासतु, पृष्टं च

ताभ्यां तस्मै हे भगवन् यूयं निश्चेतनीभूय कथं पतिताः ? साधुनोक्तं परमार्थतोऽहं संसारात् खिन्नो भूत्वा पतितोऽभूवं, द्रव्यतश्च मे वृत्तांतं शृणुतं नाम्नाहं मुनिचंद्रोऽस्मि सार्थाद्भ्रष्टो बुभुक्षितश्च पतितः, पश्चाद्युवाभ्यामुपचारं कृत्वाहं सचेतनीकृतः, ततो धनधनवतीभ्यां तस्य मुनेः पार्श्वे सम्यक्त्वमूलद्वादशव्रतानि गृहीतानि विक्रमराजापि निजराज्यं धनकुमाराय दत्त्वा चारित्रं जग्राह. धनराज्ञापि कियंतं कालं यावद्राज्यं पालयित्वा निजपुत्रजयंताय राज्यं दत्त्वा धनवत्या सह दीक्षा गृहीता. प्रांते च मासिकीं संलेखनां कृत्वा तौ द्वावपि सौधर्मदेवलोके सामान्येंद्रत्वं प्राप्तौ. इति द्वितीयो भवः २.

☒ तत्र द्विसागरोपमायुर्भुक्त्वा वैताढ्यपर्वते उत्तरश्रेण्यां सूरतेजनगरे सूरनामा विद्याधरो विद्युन्मतीभार्या, तयोः पुत्रत्वेन धनजीवश्चित्रगतिनामा बभूव. धनवतीजीवस्तु दक्षिणश्रेण्यां अनंगसिंहनृपशशिप्रभाराज्ञ्यो रत्नवतीनामपुत्रीत्वेनोत्पन्नः, तथा तौ द्वावपि स्वस्वनगरे यौवनावस्थां प्राप्तौ. अथैकदानंगसेनराज्ञा निजपुत्र्या वरार्थमेको नैमित्तिकः पृष्टस्तेनोक्तं हे राजन् युद्धावसरे यस्तव करवालं गृहिष्यति पुनर्नंदीश्वरद्वीपे यस्य मस्तकोपरि पुष्पवृष्टिर्भविष्यति स तव पुत्रीभर्ता भविष्यति. ततो राज्ञा दानपूर्वकं नैमित्तिको विसृष्टः. इतश्च भरतक्षेत्रे विक्रमपुरे सुग्रीवाभिधो राजा तस्य यशस्वीभद्राख्ये द्वे भार्ये, तयोः सुमित्रपद्माभिधानौ यथाक्रमं द्वौ पुत्रौ जातौ. भद्रया चिंतितं यशस्वीपुत्रसुमित्रेण सता मत्पुत्रस्य राज्यं न मिलिष्यति. इति विचिंत्य तया सुमित्राय विषं दत्तं यावता सुमित्रो व्याकुभूलीतस्तावता तत्र राजा समायातः, अनेकमंत्र–तंत्राद्युपचारे कृतेऽपि स न सज्जीभूतः,

लोकेऽपि तत्प्रकटीभूतं यद्भद्रया सुमित्राय विषं दत्तमिति श्रुत्वा भद्रा प्रणष्टा, राजा सुमित्रं प्रति धर्मं श्रावयामास. तद्गुणान् संस्मृत्य च स रोदितुं लग्नः, इतश्चित्रगतिविद्याधरो विमानस्थितस्तन्नगरोपरि समायातः, पौरान् राजानं च दुःखिनं वीक्ष्याधोऽवतीर्य लोकमुखात्तद्वार्तां श्रुत्वा मंत्रितवारिणा सुमित्रं प्रक्षालयामास, ततः सुमित्रः स्वस्थीभूयावदत् कथमेते लोका मां परिवेष्ट्य स्थिताः संति ? राज्ञा सर्वोऽपि वृत्तांतः कथितस्तदा सुमित्रस्तूर्णं समुत्थाय चित्रगतिं नत्वा कथयति हे सत्पुरुष त्वया ममोपरि महोपकारः कृतस्तेनैव तवोत्तमकुलं ज्ञातं तथापि स्वकुलं त्वं प्रकाशय ? तदा चित्रगतिसेवकैस्तस्य कुलादिवार्ता प्रकाशिता. इतस्तत्र सुयशानामा केवली समायातः, नृपादिसर्वेऽपि तं वंदितुं गतास्तत्र च केवलिमुखात्धर्मं श्रुत्वा चित्रगतिना सम्यक्त्वं स्वीकृतं. अथ सुग्रीवेन पृष्टं हे भगवन् ! सा भद्रा सुमित्राय विषं दत्वा क्व गता ? केवलिनोक्तं भद्रा नष्टा चौरैर्धृता, तस्या वस्त्राभरणानि गृहीत्वा तैः कस्मै वणिजे विक्रीता, तत्पार्श्वादपि प्रणष्टा वने दवदग्धा मृत्वा प्रथमनरके गता, ततोऽपि निःसृत्य तज्जीवो बहुसंसारं भ्रमिष्यति. तत् श्रुत्वा वैराग्यमापन्नेन सुग्रीवराज्ञा सुमित्राय राज्यं दत्वा दीक्षा गृहीता. चित्रगतिरपि स्वस्थानके गतः.

☒ इतोऽनंगसिंहपुत्रेण कमलविद्याधरेण सुमित्रभगिन्यपहृता. तदा सुमित्रेण सह निजप्रीतिं विज्ञाय चित्रगतिना कमलेन सह संग्रामो मंडितः पुत्रस्नेहेनानंगसिंहोऽपि तत्रागतः, तदा चित्रगतिनांधकारं विकुर्व्य तस्य खड्गोऽपहृतः, संग्रामे च तौ विजित्य चित्रगतिः सुमित्रभगिनीं गृहित्वा गृहे समायातः, सुमित्रस्तु

भगिनीत्रीरहेख वैराग्यतः पुत्राय राज्यं दत्त्वा चारित्रं गृहीतवान्. नवपूर्वाण्यधीत्य गुर्वाज्ञामादाय मगधदेश- ग्रामाद्बहिः कायोत्सर्गेण स्थितः, तत्र पद्मस्तं वीक्ष्य वैरं संस्मृत्य बाणेन जघान, सुमित्रर्षिः शुभध्यानतो मृत्वा पंचमे देवलोके गतः, पद्मस्तु सर्पेण दष्टो मृत्वा सप्तमनरके गतः, अथ सुमित्रर्षेर्मरणं ज्ञात्वा चित्र- गतिर्मनसि दुःखं वहमानो यात्रार्थं नंदीश्वरे समायातः, तदा रत्नवतीसहितोऽनंगसिंहोऽपि तत्र समागतः, अथ चित्रगतिर्जिनपूजां कृत्वा स्तुतिं कर्त्तुं लग्नस्तदा सुमित्रजीवेन ब्रह्मदेवलोकादागत्य तस्योपरि पुष्पवृष्टिः कृता, तद्वीक्ष्यानंगसिंहेन नैमित्तिकोक्तं संस्मृत्य स्वपुत्रीरत्नवती चित्रगतिना सह तत्रैव परिणायिता. भवांत- रस्नेहतस्तौ दंपती स्वस्थाने समागत्यावर्णनीयप्रेमपरौ सुखेन कालं गमयांचक्रतुः, प्रांते पुरंदराभिधपुत्राय राज्यं दत्त्वा निर्मळचारित्रं प्रपाल्यानशनं कृत्वा तौ चतुर्थे माहेंद्रदेवलोके देवत्वेनोत्पन्नौ. इति चतुर्थो भवः. ४.

⊠ अथ पश्चिममहाविदेहे पद्मविजये सिंहपुरनगरे हरिनंदराजा, प्रियदर्शना पट्टराज्ञी, तस्याः कुक्षौ माहेंद्रदेवलोकाच्च्युतश्चित्रगतिजीवोऽपराजितनामा पुत्रत्वेनोत्पन्नः, सर्वाः कलास्तेनाभ्यसिताः, एकदा स मंत्रिपुत्र- विमलबोधसहितोऽश्वं वाहयन् वने गतः, द्वयोरप्यश्वौ वक्रशिक्षितावभूतां बहुदूरेऽटवीं प्राप्य तौ द्वावप्यश्वौ रुधिरं वमंतौ मृतौ. ततस्तौ द्वौ सरसि जलं पीत्वेत्यचिंतयतां यदधुनाऽवां देशांतरदर्शनेच्छां सफलां करिष्यावः, इति विचार्य तौ यावदग्रे प्रस्थितौ तावद्रक्ष रक्षेति वदन् कोऽप्येकः पुरुषः कंपमानस्तयोः शरणं प्राप्तः, इतस्तत राजपुरुषा आगत्य कुमारं कथयामासुरयं तस्करो बहुलोकांश्चानेन मुषितास्तत एनं वयं मारयिष्यामः

तदा कुमारेणोक्तं यद्यपिचौरोऽयं तथापि शरणागतत्वान्न वधार्हः, तत् श्रुत्वा ते राजपुरुषास्तं कुमारं हंतुं धाविताः, परं कुमारेण ताडितास्ततो नंष्ट्वा ते निजनृपसमीपे गतास्ततो राज्ञा निजसैन्यं तत्र प्रेषितं तदपि कुमारेण निर्जितं. ततो राजा स्वयं तत्रागत्य मंत्रिपुत्राय पृष्टवान् कस्यायं कुमारोऽस्ति ? तेन सर्वोऽपि वृत्तांतः कथितस्ततस्तुष्टेन राज्ञोक्तमहो एषस्तु मम मित्रहरिनंदिपुत्र इत्युक्त्वा तं गृहे समानीय निजकनकमालाभिधाना पुत्री तेन सह परिणायिता. अथ कुमारः कियत्कालं तत्र स्थित्वा देशांतरविलोकनकुतूहल तया मंत्रिपुत्रान्वितो निर्गतः, मार्गमुल्लंध्य तावेकनगरसमीपमुपागतौ. इतस्तत्र वने कस्याश्चित्स्त्रियो रुदनं श्रुत्वा तच्छब्दानुसारेण तत्र गतौ. तदा तत्राग्निकुंडसमीपे एकां स्त्रियं खड्गपाणिं चैकं पुरुषं दृष्ट्वा कुमारो बभाष, अरे दुरात्मन्नेतां स्त्रियं मुन्च नो चेद्युद्धं कुरु ? इत्युक्त्वा कुमारस्तं विद्याधरं निर्जितवान्. इतः प्रभाते तत्कन्याजनको राजा तस्याः शोधनार्थं तत्रागतः, कुमारेण सर्वोऽपि वृत्तांतस्तस्मै कथितः. हृष्टेन राज्ञा तस्या रत्नमालायाः पाणिग्रहणं तेन कुमारेण सह कारितं. अथ तत्रापि कियत्कालं स्थित्वा प्रच्छन्नतया स निर्गतः कुन्डलपुरसमीपे समागत्य ताभ्यां केवलिन उपदेशं श्रुत्वा पृष्टं किमावां भव्यौ वा अभव्यौ ? केवलिनोक्तं युवां द्वावपि भव्यौ, पुनर्हे कुमार त्वं तु इतः पंचमे भवे भरतक्षेत्रे श्री–नेमिनाथाभिधस्तीर्थंकरो भविष्यसि. तवायं सुहृच्च तवाद्यो गणधरो भविष्यति. तत् श्रुत्वा हर्षितौ तौ द्वावपि तत् आनंदपुरे प्राप्तौ, तत्र जितशत्रुराजा, धारिणी राज्ञी, तस्याः कुक्षौ माहेंद्रदेवलोकाच्च्युतो रत्नवतीजीवः प्रीतिमती नाम पुत्रीत्वेनोत्पन्नः,

सकलकलाकलापकलितया तया यौवनावस्थायां पितुः पुर इति प्रतिज्ञा कृता यो मां कलया जेष्यति स मे भर्ता भविष्यति, इति श्रुत्वा पित्रा स्वयंवरमंडपो मंडितस्तत्रानेकनृपभूचरखेचराः समायाताः, अपराजितकुमारोऽपि गुटिकाप्रभावतो रूपपरावर्तनेन कार्पटिकरूपं विधाय तत्र समायातः,

☒ अथ प्रतिहारीयुक्ता मनोहरवरमालामंडितहस्ता राजकुमारी तत्र समागता, तया पादपूर्त्यर्थं समस्याकाव्यानि प्रोक्तानि. परं कोऽपि तेषां पूर्त्तौ समर्थो नाभूत्. यदा सर्वेऽपि राजकुमारादयो दिङ्मूढा जातास्त दापराजितकुमारेण स्तंभपुत्तलिकामस्तकोपरि स्वकरं न्यस्य तस्या मुखेन सर्वा अपि समस्याः पूरिताः, तद् दृष्ट्वा कुमारीराजन्यादयः सर्वेऽपि चित्तेषु चमत्कृतिं प्राप्ताः, पूर्वभवस्नेहाकृष्टया कुमार्या तत्कालमेव तत्कार्पटिकवेषभृत्कुमारकंठे वरमाला क्षिप्ता. तथाभूतं वीक्ष्य तत्र मिलिताः सर्वेऽप्यन्ये राजकुमाराः शस्त्राणि सज्जीकृत्यापराजितकुमारंप्रति धाविताः, परं कुमारेण निजरूपं प्रकटीकृत्य सिंहनादस्तथा कृतो यथा ते सर्वेऽपि मृगवत्पलायीताः; अथ तत्रागत सोमप्रभाभीधेन तस्य मातुलेन कुमारमुपालक्ष्य सर्वोऽपि तस्य कुलादिवृत्तांतः कथितः. ततो हृष्टेन जितशत्रुनृपेण शुभलग्ने तयोर्विवाहः कारितः, मंत्रिणा च स्वपुत्री विमलबोधाय परिणायिता. अथ हरिनंदनृपेण तत्रस्थं कुमारं ज्ञात्वा स्वमंत्रिणं कीर्तिराजं तत्र प्रेष्य कुमार आकारितः, कुमारोऽपि मंत्रिमित्रभार्यादिपरिवारयुतो निजनगरे प्राप्तः, ततो राजा कुमाराय राज्यं दत्त्वा स्वयं दीक्षां गृहीत्वा शुद्धचारित्रं प्रपाल्य मोक्षं गतः, ततोऽवसरेऽपराजितराजापि पद्मपुत्राय राज्यं दत्त्वा सकलत्रो दीक्षां

गृहीत्वा प्रांते चानशनं कृत्वा आरणदेवलोके सामान्येंद्रो जातः.

॥ इति पंचमषष्ठौ भवौ. ॥

☒ अथ जंबुद्वीपे भरतक्षेत्रे हस्तिनागपुर्यां श्रीषेणराज्ञ श्रीमतीभार्याकुक्षौ शंखस्वप्नसूचितोऽपराजित-जीवः शंखनामकुमारत्वेनोत्पन्नोऽनुक्रमेण च स सकलकलाकलापयुतो यौवनं प्राप्तः. अथैकदा नगरलोका राज्ञोऽग्रे समागत्येति प्रोचुः, हे स्वामिन् विशालशृंगाभिधपर्वतवास्तव्यः समरनामा पल्लीपतिरस्माकं द्रव्यादि हृत्वास्मान् दुःखीकरोति. तत् श्रुत्वा शंखकुमारः सैन्ययुतो राजाज्ञया तत्र गत्वा तेन सह युद्धं कृत्वा तं बध्ध्वा काष्टपंजरे निक्षिप्तवान्. येषां येषां च धनानि तेनापहृतानि तेषां तेषामुपलक्ष्य कुमारेण पुनः समर्पितानि. तत. पश्चाद्वलित्वा पथि रात्रौ सुखसुप्तेन कुमारेण कस्याश्चित्स्त्रियो रुदनं श्रुतं, तच्छब्दानुसारेण कुमारस्तत्र गत्वा तां स्त्रियं रुदनकारणं पृच्छति. तयोक्तं मगधदेशे चंपापुर्यां जितारिराजा, कीर्तिमती प्रिया, तयोः पुत्री यशोमती, सा यौवनस्था श्रीषेणराजपुत्रशंखकुमारस्य रूपयौवनादिगुणान् श्रुत्वा तंप्रत्यतिरागवती जाता. तां वार्तां श्रुत्वा राज्ञा हस्तिनापुरे तस्या विवाहार्थं प्रधानजनाः प्रेषिताः, इतो मणिशेखरनामविद्याधरेण साऽपहृता. तस्या अहं धातृमाताऽपहरणसमये बाहुलग्ना यावदत्र समागता तावत्स दुष्टो बलात्कारेण मे हस्तं दूरीकृत्य तामादाय क्वापि गतस्तस्या विरहदुःखेनाहं रोदिमि. तत् श्रुत्वा कुमारेणोक्तं त्वं माक्रंदं कुरु? अहमधुनैव तं खेचरं हत्वा तां कन्यां पश्चाद्वालयिष्यामि. इत्युक्त्वा सूर्योदये कुमारो यावद्विशालशृंगगुहाद्वारे समायाति तावत्तेन कन्यां प्रार्थ्यमानः

स विद्याधरो दृष्टः, शंखकुमारेण खड्गं निष्कास्य प्रोक्तं रे दुरात्मन् परस्त्रीपातकफळमधुना विलोकय? इत्युक्त्वा तेन पादप्रहारेण स भूमौ पातितः. अथ विद्याधरेणोक्तं हे सत्पुरुष अद्यप्रभृत्यहं तव सेवकोऽस्मीत्युक्त्वासौ कुमारचरणयोर्लग्नः, दयालुना कुमारेणापि स जीवनमुक्तः, हृष्टेन विद्याधरेण तस्मै भूरिमणिमुक्ताफळवस्त्राभरणादीन्यर्पितानि. अथ कुमारेण सा यशोमती जितारिनृपाय समर्पिता, जितारिणापि महद्धर्या सा शंखकुमाराय परिणायिता, तां गृहीत्वा शंखकुमारो महत्ताडंबरेण हस्तिनागपुरे समायातः. अथ श्रीषेणराजा तस्मै शंखकुमाराय राज्यं दत्वा स्वयं चारित्रं गृहीत्वा केवळज्ञानमासाद्यान्यदा हस्तिनागपुरे समायातः, शंखराजा सांतःपुरस्तं वंदितुं समागतः, देशनांते राज्ञा पृष्टं हे भगवन्! मम यशोमत्याश्चैतावान् स्नेहः परस्परं कथं? केवळिना तयोः पूर्वभववृत्तांतं कथयित्वोक्तं हे राजन्! अथ नवमेभवे त्वं नेमिनाथाख्यो द्वाविंशतितमस्तीर्थंकरो भविष्यसि, यशोमती चेयं राजीमती भविष्यति. तत् श्रुत्वा शंखराजा वैराग्यमासाद्य पुंडरीकपुत्राय राज्यं दत्वा यशोमत्या सह दीक्षामादाय विंशतिस्थानकतप आराध्य तीर्थंकरनामकर्म बध्ध्वा प्रांतेऽनशनं कृतवान्. ततस्तौ द्वावप्यपराजितविमाने देवत्वेनोत्पन्नौ.

☒ तत आयुःक्षये जंबूद्वीपे भरतक्षेत्रे शौरीपुरनगरे यादववंशीयसमुद्रविजयराज्ञः शिवादेवीराज्ञ्याः कुक्षौ कार्तिक कृष्णद्वादश्यां शंखजीवो ज्ञानत्रययुतः पुत्रत्वेनोत्पन्नः, राज्ञ्या चतुर्दशमहास्वप्नानि दृष्ट्वा तेषां फलं राज्ञे पृष्टं, समुद्रविजयेनोक्तं हे प्रिये तीर्थंकरो वा चक्री तव कुक्षावुत्पन्नोऽस्ति. प्रभाते राज्ञा स्वप्नपाठकेभ्यस्तत्फलं पृष्टं,

तैरुक्तं द्वाविंशतितमस्तीर्थंकरो भविष्यति. क्रमेण संपूर्णसमये राज्या श्रावणशुक्लपंचम्यां पुत्रः प्रसूतः, इंद्रादिभिश्च तस्य जन्ममहोत्सवः कृतो द्वात्रिंशत्कोटिसुवर्णानां च वृष्टिः कृता, तत इंद्रादयो देवा नंदीश्वरद्वीपे समागत्याष्टाह्निकामहोत्सवं कृत्वा स्वस्थानं प्राप्ताः, अथ प्रातः प्रियंवदया दास्या राज्ञे पुत्रजन्मवर्धापनिका दत्ता, हृष्टेन राज्ञा तस्यै पारितोषिकदानपूर्वकं महताडंबरेण पुत्रजन्मोत्सवः कृतः, सर्वेऽपि बंदिनो मोचिताः, एवं दशदिवसं यावन्महोत्सवं कृत्वा एकादशमे दिने सूतिकर्म समाप्य द्वादशमे दिवसे सर्वज्ञातिपरिवारादीन् भोजयित्वा गतारिष्टत्वादरिष्टनेमीति तस्य नाम दत्तं. अथ पंचधातृभिः पाल्यमानः प्रभुर्वृद्धिं प्राप्नुवन् समयं गमयांचकार. इतो मथुरानगर्यामुग्रसेनराजा, तस्य धारिणी राज्ञी, तस्या गर्भकाले निजभर्तुर्मांसास्वादनदोहदोऽभूत्, प्रधानैर्बुद्धियुक्त्या तस्या दोहदं प्रपूर्य राजा जीवन् रक्षित, पुत्रजन्मावसरे राजादिभिश्चिंतितं यदेषो गर्भस्थोऽपि यदि पितृसंतापकारको जातस्तदा वृद्धिं गतः किं न करिष्यतीति विचार्य तस्यांगुल्यां राजनामांकितमुद्रिका न्यस्य कांस्यपेटायां निक्षिप्य स यमुनायां प्रवाहितः, सा पेटा नद्यां वहमाना प्रभाते शौरीपुरपार्श्वे समागता, दृष्टा चैकेन व्यवहारिणा गृहिता च, गृहमागत्योद्घाटिता दृष्टश्च तस्यामेको जातमात्रो बालः. तदंगुलीगतमुद्रिकां प्रच्छन्नं रक्षयित्वा तेन सः पुत्रवत्पालितो दत्तं च तस्य कंस इत्यभिधान अथ वृद्धिं गतोऽयं कंसो राजबीजत्वाद् उद्दांतः सन् अऽयव्यवहारिपुत्रान् संतापयति, तत्प्रजापूत्कारो राज्ञोऽग्रे गतः, राज्ञा तं व्यवहारिणमाहूय पृष्टं भीतेन तेन तन्मुद्रिकादानपूर्वकं कथितं स्वामिन्नैष मे पुत्रः, समुद्रविजयेन मुद्रिका-

तस्तमुग्रसेनराजपुत्रं विज्ञाय स्वसमीपे रक्षितस्तत्र कंसवसुदेवोः परस्परं प्रीतिर्जाता. अथ जरासिंधनामा प्रतिवासुदेवो राजगृहे राज्यं पालयति, तेनैकदा समुद्रविजयायादिष्टं यः कोऽपि सिंहरथराजानं बध्ध्वानयिष्यति तस्याहं मम पुत्रीं जीवयशां दास्यामि. तदा प्रयाणोद्यतं समुद्रविजमं निषिद्धय लघुभ्राता वसुदेवः कंससारथिसहितः सैन्ययुतः सिंहरथं जेतुं प्रचचाल. सिंहरथोऽपि सन्मुखमायातः, द्वयोः संग्रामो जातस्तदा सिंहरथं भूमौ पतितं बध्ध्वा कंसयुतो वसुदेवः स्वनगरंप्रति प्रयाणमकरोत्. इतो नैमित्तिकेनैकेनागत्य समुद्रविजयाय ज्ञापित-मियं जीवयशा विषकन्या श्वसुरपितृकुलयोः क्षयकारिण्यस्ति. अथ वसुदेवो यदा सिंहरथयुतो नगरे समा-यातस्तदा समुद्रविजयेन नैमित्तिकोक्ता वार्त्ता तस्य कथिता, वसुदेवेनोक्तं जरासंघस्याग्रेऽहं सिंहरथबंधन-कारकं कंसं निवेदयिष्यामि. अथ वसुदेवो सिंहरथयुतो जरासंघपार्श्वे गत्वा सिंहरथबंधनकारकं कंसं निवेदयामास, तदा हृष्टेन जरासंधेन कंसाय जीवयशा परिणायिता, करमोचने च तस्मै मथुरा-नगरीराज्यं दत्तं. वसुदेवोऽथ शौरिपुरे समागतः, कंसेन मथुरायां गत्वा स्वपिता पूर्ववैरेण काष्टपंजरे क्षिप्तः स्वयं च राज्यं चकार.

इतः शौरिपुरे वसुदेवो भ्रातृविरोधेन विदेशे गतस्तत्र शतवर्षमध्ये निजपराक्रमेण तेन द्वासप्तति-सहस्रकन्याः परिणीतास्ततो रौहिण्याः स्वयंवरमंडपे स समुद्रविजयादीनां मिलितः, ततो देवकराजपुत्री-देवकीस्वयंवरमंडपे सर्वे यादवाः कंससहिताः समागताः इतः पश्चान्मथुरायां जीवयशागृहेऽतिमुक्तकर्षिराहारार्थं

मागतो देवरत्वेन चोन्मत्तया जीवयशया संतापितोऽवददरे जीवयशे! त्वं गर्वं मा कुरु? यस्याः स्वयंवरमंडपे ते स्वामी गतोऽस्ति तां वसुदेवः परिणेष्यति. तस्याः सप्तमो गर्भश्च ते भर्तारं पितृपरिवारयुतं संहरिष्यतीत्युक्त्वा मुनिर्निर्गतः, तत् श्रुत्वा जीवयशया खेदं प्राप्य मथुराऽगताय कंसाय सर्वापि वार्ता कथिता. ततो भीतेन कंसेन मुनिवाक्यं व्यर्थं कर्तुं वसुदेवो मथुरायां रक्षितः, कृता च तेन सार्द्धमतिप्रीतिः, अथैकदा वसुदेवेन कंसंप्रति कथितं यत्त्वं मार्गयसि, तदहं ते दास्यामि, वचनं गृहीत्वा कंसेनोक्तं हे स्वामिन् युष्माकं द्वासप्ततिसहस्रप्रमाणाः स्त्रियः संति, अतो देवक्याः सप्त गर्भाः मह्यं देयाः, वचनबद्धेन वसुदेवेन तत्प्रतिपन्नं. अथ देवकी यदा गर्भं प्रसवति तदा कंससेवकास्तत्र तिष्टंति. इतो देवकी यं बालं प्रसूते तं बालं हरिणेगमेषीदेवो भद्दिलपुरे मृतवत्सायाः सुलसाया अग्रे मुंचति, तस्या मृतबालं देवकीसमीपे मुंचति. कंससेवकास्तं मृतबालमादाय कंसाय समर्पयंति तं मृतमपि बालं कंसः शिलायामास्फालयति. तदा देवकीवसुदेवावेवं जानीतो यदस्मद्बालान् कंसो मारयतीति. अथानुक्रमेण सप्तमो गर्भः संजातः, पूर्णे मासे भाद्रपदकृष्णाष्टम्यां रोहिणीनक्षत्रे सप्तस्वप्नसूचितो देवक्या पुत्रोऽजनि, तत्पुण्यप्रभावात्तदा कंससेवका निद्रावशं गताः, तदा वसुदेवस्तं बालं मस्तकोपरि विधाय वस्त्रेण चाच्छाद्य नंदगोपालगृहे मोचितुं चलितः, पथि नगरप्रतोल्यां काष्टपंजरस्थेनोग्रसेनेन वसुदेवं दृष्ट्वा पृष्टं, स्वामिन्! किमिदमादाय गच्छसि, वसुदेवेनोक्तं भवतोऽस्माकं च यस्मात्सुखं भविष्यति तद्गृहीत्वाहं व्रजामीत्युक्त्वा स गोकुले

समागतः, दैवयोगेन तदा नंदभार्यया यशोदया पुत्री प्रसूताभूत्, तस्याः स्थाने पुत्ररत्नं मुक्त्वा वसुदेवस्तां पुत्रीमादाय पश्चाद्वलितस्तूर्णमागत्य च तां देवकीसमीपे मुक्तवान्. इतः कंसप्राहरिका जागृताः पुत्रीं च तामादाय कंससमीपे समागताः, तां दृष्ट्वा कंसेन हसितं रासमोऽयं गर्भो मां कथं हनिष्यति ? तस्याः कर्णनासिके छित्वा स्त्रीत्वाज्जीवन्मुक्ता. अथ गोकुलमध्ये स वसुदेवपुत्रो वर्धते, कृष्णवर्णत्वात्तस्य कृष्ण इति नाम दत्तं. अथ वसुदेवो ज्येष्टपुत्राय बलभद्राय तद्वृत्तांतं कथयित्वा तं कृष्णसमीपे मुक्तवान्, तत्र तावुभौ रममाणौ सुखेन कालं निर्गमयतः.

एकदा कंसेन नैमित्तिकः पृष्टस्तेनोक्तं मुनिवाक्यं नैव वृथा भविष्यति, देवक्याः सप्तमो गर्भस्तवांतकारको वर्द्धते परं तन्नामाहं न जानामि, किं तु यः कालिनागं वशे करिष्यति, तव पद्मोत्तरचंपकाभिधौ दुष्टगजौ व्यापादयिष्यति, शार्ङ्गधनुषि बाणं योजयिष्यति स तव शत्रुर्ज्ञातव्यः ततः कंसेन स्ववैरिपरीक्षानिमित्तं स्वयंवरमंडपे शार्ङ्गधनुर्मुक्तवोद्घोषितं य एतद्योजयिष्यति तस्याहं मम भगिनीं सत्यभामां दास्यामि. तदा तत्रानेके राजानो मिलितास्तदा वसुदेवेन बलभद्रायोक्तं युवाभ्यां स्वयंवरे नागंतव्यं, बलभद्रेणोक्तं यथा भव्यं भविष्यति तथा करिष्यामि, ततो बलभद्रेण कृष्णाय सर्वोऽपि वृत्तांतो निवेदितस्तत् श्रुत्वा कृष्णः कंसोपरि अत्यंतं कुपितः, अथ वसुदेवेन निषिद्धावपि तौ द्वौ मदोध्धुरौ स्वयंवरं गंतुं प्रचलितौ. पथि यमुनामध्ये कालिनागं लोकानामुपद्रवकारकं ज्ञात्वा कृष्णस्तं वशीकृत्य तदुपरि स्थित्वा बहुवारं च तं भ्रामयित्वा

विडंबितवान्. ततोऽनंतरं प्रतोल्यां कंसप्रेरितावुन्मत्तौ पद्मोत्तरचंपकनामानौ गजौ तयोर्मिलितौ, पद्मोत्तरः कृष्णेन चपकश्च बलभद्रेण मारितौ. ततः स्वयंवरमंडपे समागत्य मंचश्रेणिमध्यादेकं राजानं दूरीकृत्य तौ तत्र स्थितौ. अथ तत्र सर्वे राजानो धनुषि बाणं योजयितुमनेकानुपायान् कुर्वंति, परं केनापि तदारोपयितुं न शक्यते ततः कृष्णेनोत्थाय टंकारनादबधिरितसकलसभाजन बाणं धनुष्यारोपितं. ततः कंससंकेतितचाणूर-मुष्टिमल्लौ कृष्णेन सह योद्धुं समागतौ. तूर्णं कृष्णेन चाणूरो मारितो बलभद्रेण च मुष्टिमल्लो व्यापादितः, ततः क्रुद्धः कंसः स्वयं कृष्णं प्रति धावितः, कृष्णस्तमपि काकपक्षं गृहीत्वा सद्यो व्यापादयामास. अथ समुद्रविजयेनोग्रसेनं काष्टपंजरान्निष्कास्य राज्ये स्थापितस्तेन च सत्यभामा कृष्णाय परिणायिता. अथ कंस-वधानंतरं जीवयशा जरासंधपार्श्वे समागत्य तद्वृत्तान्तं कथयामास तदा क्रुद्धेन जरासंधेन समुद्रविजयं प्रति दूतं प्रेषयित्वा कृष्णबलभद्रौ मार्गितौ, समुद्रविजयेन चिंतितं तस्य दुष्टस्य पुत्रौ कथं दीयेते ? ततस्तेन पृष्टेन नैमित्तिकेनोक्तं युष्माभिर्न भेतव्य. कृष्णस्त्वयं त्रिखंडभोक्ता भविष्यति, पश्चिमदिशि समुद्रोपकंठे श्री-कृष्णभार्या सत्यभामा यत्र पुत्रयुगलं प्रसवेत्तत्र नगरं कृत्वा स्थेयं, तत्र युष्माकं महानुदयो भविष्यति. अथ सर्वेऽपि यादवा उग्रसेनादयश्च निजसैन्ययुताः क्रमेण विंध्याचलपार्श्वे समागताः. अथ कालमहाकालप्रमुखाः पंचशतजरासंधपुत्रा अग्निप्रविष्टानामपि यादवानां मारणाय नियमं कृत्वा तत्र समागताः, इतो यादवकुलदेव्याः मार्गे प्रपंचं कृत्वा दावानलं विकुर्व्य वृद्धस्त्रीरूपं कृत्वा रोदितुं प्रारब्धं. तदा तत्रागतकालमहाकालाभ्यां तस्यै

पृष्टं हे वृद्धे त्वं कथं रोदिपि ? तयोक्तं युष्मद्भयात्सर्वेऽपि यादवा अत्र प्रज्ज्वलिता इत्युक्त्वा तया देवमाययाऽर्धज्वलिते कृष्णबलभद्रशरीरे ताभ्यां दर्शिते. तद् दृष्ट्वा तैः पंचशतैरपि स्वनियमपालनाय यादवान् निष्कासयितुमग्नौ प्रविष्टं, तान् सर्वान् ज्वलितान् दृष्ट्वा तेषां सैन्यं पश्चाद्वलितं. जरासंधेन तत् श्रुत्वा चिंतितं पुत्रास्तु मृताः, परं यादवक्षयोऽभूत्तदेव वरं जातम्.

☒ अथ यादवाः क्रमेण समुद्रोपकंठे समागतास्तत्र सत्यभामया भानुभामराभिधानपुत्रयुगलं प्रसवितं. अथ तत्र कृष्णेनोपवासत्रयं कृत्वा समुद्राधिष्ठायकसुस्थितदेवः समाराधितः, प्रकटीभूतं देवंप्रति कृष्णेनोक्तं नगरस्थापनाकृते स्थानं समर्पय ? देवेनेंद्रमापृच्छ्य समुद्रजलं पश्चादाकर्षितं, ततो धनदेन द्वादशयोजनविस्तृता नवयोजनपृथुला च द्वारिकाभिधाना नगरी तत्र निर्मापिता, कृष्णस्य च राज्याभिषेकस्तत्र कृतः, अथ सर्वेऽपि यादवास्तत्र सुखेन तिष्ठंति, इतश्च केचिद्वणिजो रत्नकंबलानि गृहीत्वा द्वारिकामागतास्तत्र पुनः स्तोकं लाभं ज्ञात्वा ततो राजगृहनगरमुपागताः, तत्र जीवयशया तान्यर्धलक्षमौल्येन मार्गितानि, ततस्तैर्वणिग्भिरुक्तं लक्षमौल्येन त्वेतानि द्वारिकायां श्रीकृष्णराज्ञ्या मार्गितानि तथाप्यस्माभिर्नार्पितानि, ततोऽर्धलक्षमौल्यस्य तु का वार्ता ? ततो जीवयशया प्रोक्तं कः कृष्णः ? का द्वारिका ? तत् श्रुत्वा वणिग्भिः सर्वोऽपि यादववृत्तांतो मूलतः कथितः, तदा जीवयशा फूत्कुर्वती पितुः समीपे गता, कथितं च तया तस्मै यदधुनापि मम वैरिणो जीवंतीति. तदा जरासंधेन तामाश्वास्य शीघ्रमेव प्रयाणभेरी वादिता. तथा सहदेवादि-

शतपुत्रैः शिशुपालदुर्योधनादिराजसहस्रैश्च सकलसैन्यैः परिवृतोऽपशकुनैर्निवारितोऽपि स पश्चिमदिशि प्रस्थितः, तस्मिन् समये नारदेनागत्य कथितं हे जरासंध त्वं श्रीकृष्णं जेतुं सर्वथाऽसमर्थ एवं ऋषिवाक्यमप्यवगणय्य स त्वग्रे चलितः. अथ नारदेन व्योमवर्त्मना द्वारिकायामागत्य जरासंधसमागमनवार्ता कृष्णाय कथिता, तदा कृष्णेनापि प्रयाणपटहो वादितः, तदा दशार्हपांडवादयः सर्वेऽपि निजनिजबलोपेतास्तत्र समायाताः, तदा श्रीनेमिनाथकृते सौधर्मेन्द्रेण मातलिसारथियुत. सर्वास्त्रैरलंकृतः स्वरथः प्रेषितः, अथ तयोर्द्वयोरपि सैन्यं सौराष्ट्रसीमनि पंचासराग्रे मिलितं, जरासंधेन चक्रव्यूहो रचितः, कृष्णेन च गरुडव्यूहः कृतः, द्वयोः सैन्ययोर्महाभयंकरं युद्धं जातं, भूरिगजतुरगरथसुभटानां विनाशो जातः, जरासंधेन जराविद्यया यादवानां सैन्यं निश्चेतनीभूतं विहितं. तदा श्रीनेमिप्रभोर्वचनतः कृष्णेन धरणेन्द्राराधनं कृतं, धरणेंद्रेण प्रकटीभूय कृष्णाय श्रीशंखेश्वरपार्श्वनाथप्रतिमा समर्पिता, ततः कृष्णेन तत्प्रतिमाप्रक्षालनवारिणा सर्वं निजसैन्यं सचेतनीकृतं. पुनर्द्वयोः सैन्ययोः परस्परं महायुद्धं जातं. अथ जरासंधो निजसैन्यं यादवकृतप्रहारतो निर्बलीभूतं विलोक्य कृष्णंप्रति स्वकीयं ज्वालामालाकरालं चक्रं मुमोच, तदा तच्चक्रं कृष्णं प्रदक्षिणीकृत्य समागत्य कृष्णाकरे स्थितं. तदा कृष्णेनोक्तं हे जरासंध अधुनापि त्वं मम प्रणामं कुरु! यथा त्वां जीवंतं मुंचामि, तत् श्रुत्वा जरासंधोऽवददरे गोपाल! लोखंडेनैतेन किं गर्वं करोषि? इत्युक्त्वा स स्वयं कृष्णं प्रति धावितस्तदैव कृष्णेन मुक्तं तच्चक्रं जरासंधस्य मस्तकं छेदित्वा पुनः कृष्णाहस्ते समागतं. देवैर्जयजयाराव

पूर्वकं कृष्णोपरि पुष्पवृष्टिर्मुक्ता. नवमश्चायं कृष्णो वासुदेव इति चोद्घोषणा कृता. अथैवमनुक्रमेण खंडत्रयं साधयित्वा श्रीकृष्णः परिवारयुतो द्वारिकायां समागतः, मातलिसारथिरपि श्रीनेमिनं प्रणम्य स्वस्थाने गतः, एवं श्रीकृष्णवासुदेवस्तत्र सुखेन राज्यं पालयति.

⊠ अथ ज्ञानत्रयसहितः श्यामवर्णो दशधनुर्देहधारी श्रीनेमिर्यौवनावस्थायामपि विषयपराङ्मुखो बभूव. अथैकदा सांबप्रद्युम्नादिकुमारान् स्वस्वस्त्रीभिः परिवेष्टितानेनेकक्रीड़ाकुर्वाणान् वीक्ष्य शिवादेवी श्रीनेमिं प्रति कथयति हे वत्स त्वमप्येकां स्त्रियं परिणीय मम मनोरथं सफलं कुरु ? तत् श्रुत्वा श्रीनेमिरुवाच हे मातर्म् उचितां कन्यां विलोक्याहं कथयिष्यामीत्युक्त्वा मातरं स्वस्थीकृतवान्. अथ यशोमतीजीवोऽपराजिद्विमा- नाच्च्युत्वा श्रीउग्रसेनराजभार्या धारिणी, तस्याः कुक्षौ राजीमतीनामपुत्रीत्वेनोत्पन्नः, यथाक्रमेण वर्धमाना सा यौवनं प्राप्ता. पित्रा बहवो वरास्तस्या अर्थे विलोकिताः, परं राजीमत्या मनसि कोऽपि नायाति.



⊠ अथैकदा श्रीनेमिकुमारः कृष्णायुधशालायां समागतः, शार्ङ्गधनुर्गदायुधांश्चोत्पाटयितुं लग्नस्तदा रक्षकैर्भणितं हे स्वामिन्नेषा क्रीडा भवद्भिर्न कर्तव्या, इमान्यायुधानि श्रीकृष्णं विहायान्यः कोऽप्युत्पाटयितुं न शक्नोति. तत् श्रुत्वानंतशक्तियुता श्रीनेमिप्रभुणा विनोदार्थं पांचजन्यं शंखमुत्पाट्य तथा पूरितो यथा सर्वमपि नगरं क्षुब्धं, गिरिश्रृंगाणि पतितानि, समुद्रोऽपि प्रोच्छलितकल्लोलव्याकुलो बभूव. सभास्थितकृष्ण- बलभद्रावपि क्षुब्धौ. ततः कृष्णेन भयं प्राप्य तत्कारणगवेषणं कृतं, ज्ञाता च श्रीनेमिकृतक्रीडा, अथ

विविधभयचिंतनोल्लिखितमानसो नारायणो बलभद्रादिसमन्वित आयुधशालायामागतः, बलसंबंधिनिजहृदयगतसंशय-निवारणार्थं च तेन श्रीनेमिं प्रत्युक्तं हे बंधो आवां निजनिजबलपरीक्षां कुर्वः, तदा श्रीनेमिप्रभुः कृष्णस्याभिप्रायं ज्ञात्वा तत्प्रतिपन्नवान्. ततस्तौ द्वावपि बलभद्रादिपरिवारयुतौ योग्यस्थानके समागतौ. अथ श्रीनेमिना शस्त्रादिभिरन्योन्ययुद्धानि विरुद्धानि विज्ञायोक्तं हे बंधो आवयोर्बाहुबलपरीक्षावाभ्यां कर्तव्या. कृष्णेनापि तत्प्रतिपन्नं, बलभद्राद्याः सर्वेऽपि साक्षिणस्तस्थुः, अथ प्रथमं श्रीकृष्णेन स्वकीयो बाहुः प्रसारितस्तदा श्रीनेमिना स कमलनालवद्वालितः, ततः श्रीनेमिना निजबाहुः प्रसारितस्तदा कृष्णस्तं वालयितुं लग्नः परं नो वलित', तदा कृष्णो द्वाभ्यां निजबाहुभ्यां तत्र विलग्न स्तथापि स तं वालयितुं समर्थो नाभूत्, प्रत्युत वृक्षशाखायां कपिरिव स आंदोलनं चकार. अथ कृष्णः सचमत्कारं खेदं प्राप्तः, ततः सर्वेऽपि गृहे समागताः, कृष्णं खिन्नं ज्ञात्वा बलभद्रेणोक्तं हे बंधो त्वं मा विषीद ? एष नेमिस्तु द्वाविंशतितमस्तीर्थंकरो भविष्यति, अत एप नैव राज्याभिलाषुकः. अथैकदा शिवादेवीसमुद्रविजयाभ्यां कृष्णयोक्तं त्व कथमपि प्रकारेण विवाहार्थं नेमेः सम्मति संपादय ? येनावयोर्मनोवांछा सफलीभवेत्, इतस्तत्र वसंततुरायाता, तदा सर्वेऽपि यादवकुमाराः श्रीनेमिप्रभुसहिता वने क्रीडार्थं गतास्तत्र कृष्णप्रेरिता जांबवतीसत्यभामारुक्मिणीप्रमुखा राज्ञ्यः श्रीनेमिना सह हास्यविनोदानकुर्वत, बलात्कारेणापि प्रभोः पाणिग्रहणसम्मतिमविन्दत, तत्कालमेवोग्रसेनपुत्र्या राजीमत्या सह प्रभोर्विवाहो मेलितः, श्रावणशुक्लषष्ट्यां ज्योतिषिणा लग्नं दत्तं समुद्रविजयोग्रसेनगृहे महोत्सवा

मंडिताः, द्वयोश्चगृहे कुलांगना गीतानि गायंति.

[X] अथ श्रीनेमिप्रभु रथमारूढो ध्रियमाणच्छत्रश्चामरैर्वीज्यमानो विष्णुबलभद्रप्रमुखयादववृंदैर्वेष्टितः श्री उग्रसेनगृहसमीपे समागतस्तावता प्रभुणाऽनेकशशकसूकरहरिणपारापतकुर्कुटप्रमुखप्राणिभिर्भृतो वाटको दृष्टः, सर्वेऽपि ते प्राणिनस्तत्र महाक्रंदं कुर्वंति, तद् दृष्ट्वा प्रभुणा सारथिः पृष्टः, भो सारथे किमर्थमेते प्राणिनोऽत्र समूहीकृताः संति ? सारथिनोक्तं हे स्वामिन् भवद्विवाहे गौरवकृते यादवादीनां भोजनार्थमेते सर्वे प्राणिनोऽत्र स्थापिताः संति, तद्वृत्तांतं श्रुत्वा दयार्द्रमानसेन प्रभुणा दुःखं प्राप्तं. इतो गवाक्षस्था राजीमत्यपि निकटप्राप्तं श्रीनेमिप्रभुं वीक्ष्य स्वकीयात्मानं धन्यं मन्यमाना परमानंदोल्लसितमानसा जाता. इतस्तस्या दक्षिणेक्षणं स्फुरितं, ततः किमप्यमंगलं ध्यायंती यावत्सा स्थितास्ति तावत्कृपापरेण प्रभुणा सारथिनमुक्त्वा रथः पश्चाद्वालितः, तदा प्रभुमातृपितृकृष्णबलभद्रादिसकलपरिवारैर्बहुधा निवारितोऽपि श्रीनेमिकुमारो विवाहकार्यं नानुमन्यत, तद्वीक्ष्य राजीमत्यपि वज्राहतेव मूर्छया भूमौ पपात, सखिभिः शीतलजलाद्युपचारैः सचेतनीकृता नानाविध विलापांश्चकार. अथेतो लोकांतिकदेवैस्तत्रागत्य जयजयेतिशब्दोच्चारपूर्वकं प्रभोर्दीक्षासमयो ज्ञापितः, प्रभुरपि वार्षिकदानं दत्वा 'शिबिकामारुह्य देवमनुष्यादिपरिवारवेष्टितो गिरिनाराचले सहस्राम्रवने समागत्य सहस्रपुरुषैः सह श्रावणशुक्लषष्ठीदिने पंचमुष्टिलोचं कृत्वा दीक्षां जग्राह, द्वितीयदिने च वरदत्तद्विजगृहे प्रभुणा परमान्नेन पारणं कृतं. तत्र पंचदिव्यानि प्रकटितानि. अथेतश्चतुःपंचाशद्दिनानि प्रभुणा

छद्मस्थत्वेन व्यतिक्रांतानि, तत आश्विनामास्यायां सहस्राम्रवने प्रभोः केवलज्ञानं समुत्पन्नं, चतुःषष्टिभिरिंद्रैः समागत्य तत्र समवसरणं कृतं. तदा वर्धापनिकादातारं पुरुषं प्रति श्रीकृष्णो द्वादशकोटिं रूप्यकाणां दत्वा यादववृंदपरिवृत उग्रसेनराजीमतीसहितः प्रभोर्वंदनार्थं तत्रागतः, प्रभोर्देशनां श्रुत्वा वरदत्तप्रमुखैर्द्विसहस्रनृपै राजमतीप्रमुखाभिर्बहुभी राजपुत्रीभिर्दीक्षा गृहीता. प्रभुणा च तत्राष्टादशगणधरस्थापना कृता, ततः श्रीकृष्णेन पृष्टं हे भगवन् भवता सह राजीमत्या एतादृशस्य स्नेहस्य किं कारण? भगवता स्वकीयपूर्वनवभववृत्तांतः कथितः अथ कृष्णेन दशभिर्दशार्हैश्चोग्रसेनरामादिभिश्च श्रावकत्वं प्रतिपन्नं. शिवादेवीरोहिणीरुक्मिणीभिश्च श्रावकत्वमापन्नं. एवं प्रभुणा चतुर्विधसंघस्थापना कृता, प्रभोः शासने गोमेधनामा यक्षोंबिकाख्या च देवी जाता. एवं सप्तशतवर्षाणि केवलपर्यायं पालयित्वा सर्वायुश्च सहस्रैकवर्षमितं समाप्य रैवताचले शतोत्तर-षट्त्रिंशद्भिः साधुभिः सहाषाढशुक्लाष्टम्यां प्रभुर्मोक्षं गतः, राजीमत्यपि एकवर्षं छद्मस्थत्वं पंचशतवर्षं च केवलिपर्यायं पालयित्वा सर्वायुरेकोत्तरनवशतवर्षमितं भुक्त्वा प्रभोः पूर्वमेव मोक्षं गता. श्रीनेमिपितरौ च चतुर्थदेवलोके गतौ.

## अथाग्रे प्रसंगतः श्रीकृष्णद्वारिकासंबंधो लेशतः प्रदर्श्यते—

☒ एकदा विष्णुना श्रीनेमये पृष्टं हे स्वामिन् द्वारिकायाः केनांतो भविष्यति? पुनः कीदृग्मे मरणं भविष्यति? प्रभुणोक्तं मदिराप्रयोगेण कुपितः कृष्णद्वीपायनर्षिर्द्वारिकां प्रज्ज्वालयिष्यति, तव

मूलम्—सीलं उत्तम वित्तं। सीलं जीवाण मंगलं परमं॥
सीलं दोहग्गहरं। सीलं सुक्खाण कुलभवणं ॥ २ ॥

व्याख्या—शीलशब्देन ब्रह्मचर्यं तदुत्तमं प्रधानं वित्तं धनं, शीलरूपधनस्य चौरादिकेभ्योऽपि भयं नास्ति. पुनः शीलं परममुत्कृष्टं मंगलं, शीलरूपमंगलं कदापि न हीयते. पुनः शीलं दौर्भाग्यस्य हंतृ, अर्थात्तेन शीलेन प्राणी सौभाग्यवान् भवति. पुनः शीलं समस्तानां सुखानां कुलभवनं गृहमस्ति. ॥ २ ॥

मूलम्—सीलं धम्मनिहाणं। सीलं पावाण खंडणं भणियं॥
सीलं जंतूण जगति। अकित्तिमं मंडणं नेयं ॥ ३ ॥

व्याख्या—पुनः शीलं कीदृशं ? शीलं धर्मस्य निधानं, पापानां च खंडनं कथितं, पुनः शील जंतूनां जगति लोके अकृत्रिमं मंडनं प्रवरमाभूषणं ज्ञेयं, अन्यान्याभूपणानि विघटयंति परं शीलरूपशृंगारः सर्वदा स्थिरीभवति. ॥ ३ ॥

मूलम्—निरयदुवारनिरुंधण—कवाडसंपुडसहोअरच्छायं ॥
सुरलोअधवलमंदिर—आरुहणे पवरनिस्सेणी ॥ ४ ॥

व्याख्या—पुनः कीदृशं शीलं? नरकस्य यद् द्वारं तस्य निरुंधने कपाटसंपुटसदृशं, पुनः सुरलोकानां देवलोकानां यानि धवलमंदिराण्यावासास्तत्रारोहणे प्रवरनिःश्रेणिसदृशं ज्ञेयं. ॥ ४ ॥

मूलम्—सिरि उग्गसेणधूया। राईमइ लहउ सीलवईरेहं ॥
गिरिविवरगउ जीए। रहनेमी ठाविउ मग्गे ॥ ५ ॥

व्याख्या—श्रीउग्रसेनराजपुत्री राजीमती शीलवतीनां मध्ये रेखां लभतु, यया गिरिविवरे गुहामध्ये प्राप्तो रथनेमिर्मार्गे स्थापितः ॥ ५ ॥

राजीमतीकथा चेत्थं—

☒ द्वारिकानगर्यां श्रीनेमीश्वरस्य दीक्षाग्रहणसमये गृहस्थया राजीमत्या सह रथनेमी रागं धर्तुं लग्नः. तस्यै च वस्त्रालंकारतांबूलादीन् मुंचति, राजीमती तु तं पतिलघुभ्रातरं मन्यमाना निर्विकारतया गृह्णाति. अथैकदा तेन शुद्धशीलव्रतीं राजीमतीमेकांते मिलित्वा कथितं त्वमद्याप्यपरिणीता वर्त्तसे ततो

मया सह पाणिग्रहणं कुरु ? राजीमत्या चिंतितं मयायं युक्त्या प्रतिबोध्य इति विचार्य तयोक्तं त्वं ममावासे भोक्तुं समागच्छेरित्युक्त्वा राजीमती स्वावासे गता, इतो रथनेमिरपि तत्रागतस्तदा राजीमत्या भुंजमानया मदनफलमाघ्राय वमनं कृतं, ततस्तया रथनेमये प्रोक्तं त्वममुं मया वमितमाहारं भक्षय ? तेनोक्तं हे सुभगे किमहं श्वास्मि यद्वमिताहारं भक्षयामि ! तयोक्तमेवमेव वमिताहारवत्तव वृद्धभ्रात्राहं परिहृतास्मि, एवं-विधां च मां त्वं कथं वांच्छसि ? तत् श्रुत्वा रथनेमिर्लज्जितः सन् स्वगृहं गतः. इतः श्रीनेमिप्रभोः केवलज्ञानं समुत्पन्नं. तदा श्रीकृष्णः परिवारयुतो महोत्सवपूर्वकं प्रभुं वंदितुं समागतः, तत्र राजीमतीरथनेमि-प्रभृतिभिर्दीक्षा गृहीता. अथैकदा वर्षाकाले रथनेमिर्गुहामध्ये कायोत्सर्गेण स्थितोऽस्ति, इतो राजीमती श्रीनेमये वंदितुं समागच्छंती मार्गे मेघवृष्टितस्तस्यामेव गुहायां प्रविष्टा. जलेनार्द्रीभूतानि वस्त्राणि च शरीरतो दूरीकृत्य गुहायां मुत्कलीकृतानि, तत्र विस्तृतांधकारतस्तया गुहामध्यस्थितो रथनेमिर्न ज्ञातः, रथनेमिस्तु तां विवसनां निरीक्ष्य मदनसुभटमुक्तबाणधोरणीभिर्विद्धो ध्वस्तधैर्यो बभूव. ततो मन्मथोन्माथितमानसो रथनेमिस्तांप्रति जगाद हे भद्रे प्रथमत एवावयोर्बहुस्नेहो वर्त्तते, ततोऽत्र प्रथमं भोगविलासं कृत्वा मनसि च संतोषमादाय पश्चात् शुद्धं चारित्रं पालयिष्यावः, इति श्रुत्वा महासती राजीमती वस्त्रै निजदेहमाच्छाद्य तन्मनोभवमनो-भवोन्मत्तगजेंद्रांकुशनिभं घनगंभीरभारत्या वचनमुवाच. भो महानुभाव ! प्रथमं गृहस्थावस्थायामपि मया त्वं प्रतिबोधितः, पुनस्त्वं महति कुले समुत्पन्नोऽसि, त्वयैतद्वचनोच्चारमपि कर्तुं न युज्यते, आवाभ्यां

भगवत्समीपे महाव्रतान्यंगीकृत्य सर्वेऽपि भोगा वांताः संति, वांतभोगेच्छां कुर्वाणाः श्वेव जगतीतले लघुतां प्रयांति. इत्यादिसुवचनैः प्रतिबोधितो रथनेमी राजीमतींप्रति कथयामास, हे सति त्वं धन्यासि, कुपथगामिनं मां त्वया प्रतिबोधसुभाषितदवरकैराकृष्य सन्मार्गे समानीत इत्युक्त्वा स ततो निःसृत्य श्रीनेमिप्रभोः समीपे तत्प्रमादस्थानमालोच्य शुद्धचारित्रं प्रपाल्य केवलज्ञानं प्राप्य मोक्षं गतः, राजीमत्यपि शुद्धमनसा निरवद्यचारित्रं प्रपाल्य केवलज्ञानमासाद्य शिवं गता.

॥ इति राजीमतीकथा ॥

**मूलम्—पज्जलिउंवि हु जलणो। सीलप्पभावेण पाणीअं होइ॥**
**सा जयउ जए सीआ। जीसे पयडा जसपडाया ॥६॥**

व्याख्या—सा सीता सती जगति लोके जयतु, यस्या यशःपताका प्रकटा वर्त्तते, यतो यां प्रति प्रज्ज्वलितो धगधगायमानोऽपि ज्वलनोऽग्निः शीलप्रभावेण पानीयं जलं भवति. ॥ ६ ॥

सीतायाः कथा चेत्थं—

☒ मिथिलायां नगर्यां जनकराजा राज्यं करोति. तस्य विदेहाख्या राज्ञी, अन्यदा तया पुत्रपुत्रीयुगलं प्रसूतं. तावता कर्मयोगेन पूर्वभववैरिणा देवेन पुत्ररत्नमपहृत्य वैताढयपर्वते समानीय

मुक्तं दृष्टं च तत्रत्यदक्षिणश्रेणिस्थरथनूपुरनगराधिपतिचंद्रगतिनामराज्ञा वनमागतेन. सोऽथ तं बालमादाय स्वप्रियायै चंद्रमत्यै भामंडल इत्यभिधानपूर्वकं पुत्रीकृत्य समर्पितवान्.

अथ जनकराजादिभिः पुत्रापहरणं ज्ञात्वा शोकपीडितैः पुत्रीमुखं वीक्ष्य शीतलीभूय तस्याः सीतेति नाम दत्तं. अथ सा सीताऽनुक्रमेण यौवनावस्थां प्राप्ता. इतो मायूरशालपुराधिपतिर्म्लेच्छनृपो मिथिलानगरीं परिवेष्ट्य स्थितः. इतोऽयोध्यायां नगर्यां दशरथाभिधानो राजा राज्यं करोति, तस्य कौशल्यासुमित्राकैकेयीसुप्रभाभिधान चतुर्महिषीकुक्षिसमुद्भवाः क्रमेण रामलक्ष्मणभरतशत्रुघ्नाभिधानाश्चत्वारः पुत्रा आसन्. अथ जनकराज्ञा दूतं प्रेष्य दशरथाय निजशत्रुकृतपराभवदूरीकरणार्थं सहायो मार्गितः. दशरथराजापि स्वमित्रसहायार्थं निजसकलसैन्ययुतः प्रयाणाभिमुखो बभूव. तदा रामचंद्रेण सविनयं प्रणामं कृत्वा निजजनकाय कथितं हे पितरत्र कार्ये भवद्भिः कृपां विधायाहमेव प्रेष्यः. महताग्रहेण राज्ञा तत्प्रतिपन्नं. अथ पितुराज्ञामादाय सलक्ष्मणो रामो निजसैन्ययुतो मिथिलासमीपे समागतो म्लेच्छैः सह च युद्धं कृत्वा तान् विजित्य तद्देशाद्दूरे निष्कासयामास. अथ रामपराक्रमोल्लसितमानसेन जनकेन चिंतितं ममेयं दुहिता सीता रामचंद्रयोग्यैव. इति विचार्य जनकेन राममापृच्छ्य तेन सार्धं सीताया उद्वाहो मेलितः. अथ रामः सैन्ययुतस्ततो निवृत्त्यायोध्यायामागतः, इतो नारदर्षिर्जनकराज्ञोंतःपुरे समायातस्तदा तस्य भयानकं रूपं वीक्ष्य भीतया सीतयाक्रंदितं, तेन रुष्टो नारदो वैताढये गत्वा चंद्रगतिपुत्रभामंडलाय सीताया रुपादिगुणानां प्रशंसां कृतवान्. तत् श्रुत्वा मदनातुरो भामंडलो

विह्वलतां प्राप्तः, चंद्रगतिराज्ञा तद् वृत्तांतं ज्ञात्वा भामंडलायोक्तं हे पुत्र त्वं खेदं मा कुरु ? ते सीतापरिणयन-मनोरथमहं सफलीकरिष्यामीत्युक्त्वा तेन निजदूता जनकपार्श्वे प्रेषिताः, दूतैस्तत्र गत्वा भामंडलकृते सीता याचिता, किंतुजनकस्तन्नांगीकरोति. ततस्ते जनकं गृहीत्वा चंद्रगतिसमीपे गताः, तत्र चंद्रगतिना जनकायोक्तं त्वं सीतां देहि ? तेनोक्तं सीता तु प्रथमत एव रामया मया दत्तास्ति, किं चोत्तमकुलोत्पन्नैः स्वकन्या त्वेकवारमेव दीयते. तदा चंद्रगतिना विमृश्योक्तं मम पार्श्वे वज्रावर्त्तार्णवावर्त्ताख्ये द्वे धनुषी वर्त्तेते, तयोरुपरि यो बाणं समारोपयेत्स सीतां परिणयतु. जनकोऽपि तत्प्रतिपद्य धनुःसहितो मिथिलायां समागतः. अथ तेन तत्र स्वयंवरमंडपसमारंभः कृतः, तत्रानेकभूचरखेचराश्च समागताः, रामलक्ष्मणावपि समागतौ. तदा विविधालंकार-वस्त्राभिरामा घनालिमंड़िता सौदामिनीव स्वकीयापांगेक्षणैः क्षणं क्षोणीभृतां मनांसि क्षोभयंती सीतापि स्वयं-वरमंडपे समागता, अथ मंड़पमध्यस्थापितवज्रावर्त्तधनुषि बाणमारोपयितुं विश्वैरपि राजकुमारैः प्रयत्नः कृतः, परं कोऽपि तमारोपयितुं समर्थो न बभूव. अथ रामचंद्रेण निजपितुराज्ञया तद्धनुः कमलनालवदाम्रेड़यित्वा तस्मिन् बाणमारोपितं, मिलितसकलराजकुमारहृदयविदारको विहितश्च तेन तस्य टणत्कारः, स्थापिता च तत्क्षणमेव सीतया रामचंद्रकंठे वरमाला. तावता लक्ष्मणेनाप्युच्छायार्णवावर्तधनुः समारोपितं, तदा तुष्टैर्विद्या-धरैस्तस्मै स्वकीयाष्टादश कन्याः परिणायिताः, अथैतत्स्वरूपमालोक्य भामंड़लोऽत्यंतं क्रुद्धः, इतश्चैको ज्ञानी साधुस्तत्र समागतः, सर्वैश्च वंदितः, साधुनोक्तं सीता हि भामंडलभगिनी वर्तते. तत् श्रुत्वा सर्वेऽपि

चमत्कृतास्ततो मुनिना तस्य देवापहारादिः सर्वोऽपि वृत्तांतः कथितस्तदा भामंडलो लज्जयावनतकायः स्वस्थीभूय स्थितस्ततो रामलक्ष्मणाद्याः सर्वेऽपि सीतासहिताः स्वगृहे समायाताः.

☒ अथैकदा दशरथराज्ञा निजवृद्धभावं ज्ञात्वा रामचंद्राय राज्यं दातुं समारंभः कृतः. तदा कैकेयी स्वावसरं ज्ञात्वा पूर्वदत्तं वरं मार्गयितुं राज्ञः समीपे समागता. वरमार्गणाय राज्ञादिष्टा कैकेयी प्रोवाच. मम पुत्रस्य भरतस्य राज्यं देहि? रामश्च वने वासं कुर्यात्. तत् श्रुत्वा दशरथो वज्राहत इव शून्यहृदयो वभूव. तदा रामचंद्रेणोक्तं हे पितर्भरतः सुखेन राज्यं करोतु, अहं च मम मातुः कैकेय्याः सुखार्थं वने स्थास्यामीत्युक्त्वा रामचंद्रो विषादं कुर्वतीं निजमातरं युक्त्यादिगर्भितमिष्टवचनैः प्रतिबोध्य धनुर्गृहीत्वा सीतालक्ष्मणयुतो वनंप्रति चचाल. तदा सकलनगरलोका अपि शोकाकुलाः संजाताः अथ रामस्ताभ्यां सहितः शनैः शनैः पंथानमुल्लंघ्यानुक्रमेण दंडकारण्यमागतस्तत्रैको मासक्षपणोपवासी साधुराहारार्थं समागतः सीतया च स शुद्धान्नपानादिभिर्भक्तिपूर्वकं प्रतिलाभितो देवैश्च सीतोपरि पुष्पवृष्टिः कृता. इतस्तत्रैकः पक्षी रोगाभिभूतः समागत्य तस्य मुनेश्चरणयोर्लग्नः मुनिपादस्पर्शतः पक्षिणो रोगा विनष्टाः. तदाश्चर्यं विलोक्य रामेण साधुं वंदित्वा पृष्टं हे स्वामिन् कोऽयं पक्षी? कथं तस्य रोगा बभूवुर्नष्टाश्च. मुनिनोक्तमत्र पूर्वं कुंभकारकटकाभिधं नगरमासीत्, दंडकाभिधो नृपः पालकनामा च तस्य प्रधानो बभूव. स प्रधानोऽभव्यत्वाद् द्वेषबुद्ध्याऽत्रागतान् चरणकरणोद्यतान् शमसंवेगादिगुणगणमंडितान् श्रीस्कंधकाचार्यपंचशतशिष्यान्. गुरुसहितान् यंत्रे



ञा

निष्पीड्य व्यापादितवान्, शिष्यास्तु सर्वेऽपि शुभध्यानोत्पन्नक्षपकश्रेणिसमारूढा अंतकृत्केवलित्वमासाद्य मोक्षं गताः, किं तु तद्दुष्टकृतशिष्यविडंबनतः कषायोद्भवनात्स्कंधकाचार्यो निदानं कृत्वाग्निकुमारेषु देवत्वेन समुत्पन्नः, सक्रोधेन तेनाग्निकुमारेण तद्देशराजादि सर्वं ज्वालितं, तेन चैतद्दंडकारण्यं जातं. यश्च दंडकराज्ञो जीवोऽभूत्स संसारेऽनेकयोनिषु भ्रांत्वैष कुष्टरोगाक्रांतपक्षी जातः, स च मां विलोक्य जातिस्मरणं प्राप्य जिनधर्मांगीकारतो नीरोगो जातः, अतो हे रामचंद्र! अयं जटायुःपक्षी तव साधर्म्यस्ति, तत् श्रुत्वा रामेण तं जटायुषं मित्रीकृत्य निजसार्थे गृहीतः, अथ ते सर्वेऽपि ततः प्रयाणं कृत्वा दक्षिणदेशे गोदावर्या उपकंठे प्राप्ताः. तत्र लक्ष्मणो वनलीलाकौतुकं निरीक्षमाणो वंशजालनिकटे खड्गकं पतितं ददर्श. निजक्षत्रियजातिस्वभावतस्तं करालकरवालमादाय तत्तैक्ष्ण्यपरीक्षार्थं तेन सा वंशजालिश्छिन्ना. इतस्तत्राग्निकुंडोपरि अवनतशिरा धूम्रपानं क्रियमाणो विद्यासाधनपरः कोऽपि पुरुषस्तत्करवालघाततो विलूनमस्तको बभूव. तं तथावस्थं दृष्ट्वा दययार्द्रीभूतमानसो लक्ष्मणः शुचं गतो विचारयामास, हा मयाऽनर्थदंडरूपक्रीडामात्रेणैव कोऽपि तपस्तप्यमानो निरपराधिजनो व्यापादितः, अथ स शुचाकुलमानसस्तं करवालमादाय रामसमीपे समागत्य सर्वमपि तं वृत्तांतं कथयामास, रामेण खड्गमालोक्योक्तमेष खलु चंद्रहासखड्गोऽतस्तत्साधनपरः कोऽपि जनस्त्वया क्रीडामात्रेण हतः, नूनमत्र कोऽपि तस्योत्तरसाधको भविष्यति. इतः खरनामा राक्षसः पातालंकाधिपतिर्बभूव, तस्य रावणभगिनी सूर्पणखाभिधाना प्रियास्ति, तस्य पुत्रो विद्यासाधनतत्परो वंशजालिमध्ये तपस्तप्यमानोऽभूत्.

⊠ अथ सा सूर्पणखा स्वपुत्रतपोऽवधिकालं संपूर्णीभूतं विज्ञाय तच्छुद्धयर्थं तत्रागता, दृष्टं च तया निजपुत्रशरीरं शिरोविहीनं. ततो विविधान् विलापान् कुर्वती पदानुसारेण सा रामलक्ष्मणसमीपे समागता. जितकामं रामरूपं दूरादेव विलोक्य मन्मथोन्माथितहृदया मा निजतनयमरणोद्भवं दुःखं विस्मृत्य तं प्रति हंत भोगविलासप्रार्थनां चकार. तदा रामेणोक्तमहं तु सभार्योऽस्मि, अतो लक्ष्मणांतिके व्रज ! ततस्तया वृक्ष-तलासीनस्य लक्ष्मणस्य पार्श्वे समागत्य तथैव भोगप्रार्थना कृता, लक्ष्मणेनोक्तं प्रथमं त्वया मे ज्येष्ठबंधुः प्रार्थितोऽतो मे त्वं जननीतुल्यासि. ततः सीतया हसित्वा तां प्रत्युक्तमेवं प्रार्थनाभंगतस्त्वं कापि दुर्भगैवानुमीयसे. तत् श्रुत्वा क्रोधानलाध्मातमानसा सूर्पणखोवाच समयेऽहं तवाप्यभिमानमुत्तारयिष्यामीत्युक्त्वा सा निजपतिखर-राक्षससमीपे गता. कथिता च शंबूकमरणवार्ता. ततो रुष्टोऽयं खरराक्षसश्चतुर्दशसहस्रसुभटयुतो युद्धार्थं तत्रा-गतस्तदा लक्ष्मणः सीतारक्षणकृते रामं तत्रैव मुक्त्वा सन्नद्धः स्वयं तैः सह योद्धु प्रचचाल. रामेणोक्तं हे बंधो तत्र यदि किमपि संकटमापतेत्तदा त्वया सिंहनादः कार्य इति भ्रातुर्वचनं प्रतिपद्य लक्ष्मणो राक्षससै-न्याभिमुखमागत्य विविधास्त्रैरेकोऽप्यनेकीभूत इव राक्षसान् पातयामास, लक्ष्मणप्रहारतो जर्जरीभूतं राक्षससैन्यं विलोक्य सूर्पणखा त्रिकूटपर्वते निजभ्रातृरावणसमीपे समागत्य सर्वं वृत्तांतं कथयित्वा सीतारूपलावण्यादिप्रशंसां चकार. तत् श्रुत्वा मदनव्यथाव्यर्थीभूतमतिप्राग्भारो रावणस्तूर्णं पुष्पकविमानमारुह्य रामसीतापादन्यासपवित्रीभूतस्थान माससाद. विद्ययादृश्यीभूतो रावणो रामनिकटवर्तिनीं सीतामपहर्तुं स्वमसमर्थं मन्यमानो निःसपत्नच्छत्रैकमंदिरं

लक्ष्मणनादनिभं सिंहनादं कृतवान्. तत् श्रुत्वा रामो निजसंकेतमनुसृत्य सीतां तत्रैव मुक्त्वा सन्नद्धबद्धतूणीरो धनुपाणिस्ततः शीघ्रं लक्ष्मणसहायार्थं चचाल. तदवसरं प्राप्य कपटैकपटू रावणो द्रुतं पूत्कुर्वतीं सीतामपहृत्य स्वकीयविमाने च तां संस्थाप्य ततश्चचाल. सीताकृतपूत्कारमाकर्ण्य निकटस्थो जटायुराकाशे उड्डीय स्वनखै रावणशरीरं विदारयितुं लग्नस्तदा रुष्टेन रावणेन खड्गप्रहारतोऽसौ पक्षिराड् भूमौ पातितः विमानस्थिता सीता महता स्वरेण हा राम हा लक्ष्मण हा भामंडल मामस्माद्दुष्टराक्षसाद्रक्ष रक्षेति पूत्चकार. तत् श्रुत्वा गगनाध्वना गच्छता भामंडलपदातिनैकेन रावणेन सह युद्धं कृतं, कृपाणप्रहारतो रावणेनासावपि भूमौ पातितः अथ पथि रावणेनानेकप्रकारमिष्टालापैः सीतामनो वशीकर्तुं प्रयत्नो कृतः परमूषरभूमौ धाराधरधोरणीव तस्य वाग्विलासा निष्फला जाताः.

☒ अथ रावणो लंकायामागत्य प्राहरिकैः परिवेष्टितायामशोकवाटिकायां सीतां रक्षितवान्. तत्ररामनामैकतानमानसा सीता रामलक्ष्मणकुशलसंदेशलाभावधिप्रत्याख्यातान्नपाना जिनध्यानपरा निजकालं गमयांचकार. अथ तत्र रामागमननिरीक्षणाद्विस्मयमापन्नो लक्ष्मणस्तंप्रत्युवाच हे बंधो भवद्भिस्तत्रैकाकिनीं सतीसीतां विहाय कुतोऽत्र समागमनं विहितं, चकितेन रामेणोक्तं हे बंधो मया तु त्वत्कृतसिंहनादमेवाकर्ण्यात्रागमनं कृतं: लक्ष्मणेनोक्तं मया तु सिंहनादो नैव कृतः, नूनं केनचित्कपटपाटवकोविदेनारिणाऽयं प्रपंचो विहितोऽस्ति, अतस्त्वं तूर्णं तत्र व्रज ? अहमपि तूर्णं शत्रून् हत्वागच्छामीत्युक्तो रामोऽविलंबं त्वरितपदैस्तत्र समायातः,

सीतां चाद्दष्ट्वा वज्राहत इव मूर्छां प्राप. कियत्कालांतरे सुरभिवनवायुना सचेतनीभूय सीताशुद्ध्यर्थमितस्ततो वनमध्ये विलोकयामास. इतो मरणांतदशाप्राप्तं विशीर्णपक्षजालं भूमौ लुठंतं जटायुपक्षिणं विलोक्य सीता-वियोगापन्निमग्नोऽपि रामस्तं नमस्कारमंत्रं दत्तवान्, तत्प्रभावतो जटायुपक्षी पंचत्वमधिगत्यापि चतुर्थे माहें-द्रदेवलोके देवत्वेनोत्पन्नः, पुनः स्मृतिपथमागतां सीतां कुत्राप्यनालोक्य रामो मूर्छितः, इतो द्विषन्निषूद-नोल्लसितमानसो लक्ष्मणस्ततो निवृत्त्य यावत्तत्र समायाति तावद्रामचंद्रं तथावस्थं वीक्ष्य सीतां चाऽनालोक्य खिन्नमानसोऽनिलजलादिप्रयोगेण रामं सचेतनीचकार. सचेतनीभूतो रामोऽवोचत हे भ्रातः! सीतां मुक्त्वा यदाहं तव समीपे समागतस्तदा केनापि छलान्वेषिणारिणा सीतापहरणं कृतं. लक्ष्मणेनोक्तं हे भ्रातरधुना त्वं मा विषादं कुरु? आवां शीघ्रमेव सीतायाः शुद्धिं करिष्यावः. इतो विराधाभिधः पूर्वपाताल-लंकाधिपतिस्तत्रागत्य रामलक्ष्मणौ वंदित्वावदत् हे स्वामिन् मयाधुना श्रुतं यल्लक्ष्मणेन मम वैरी खरो हतस्तेनाहमतः परं भवत्सेवकोऽस्मि. रामलक्ष्मणाभ्यां तमाश्वास्य पाताललंकाधिपतिः स्थापितः.

☒ इतः किष्किंधाधिपतिः सुग्रीवो बहिः क्रीडार्थं गतस्तदवसरं प्राप्य केनचिद्विद्याधरेण स्वकीय विद्याबलतः सुग्रीवरूपं विधाय तस्य राज्यं गृहीत्वा तदंतःपुरे प्रविष्टं, तत श्रुत्वा खेदमुपगतः सत्यसुग्रीवो रामपार्श्वे समागत्य निजवृत्तांतं कथयित्वा विज्ञप्तिं कृतवान्. हे स्वामिन् ममोपरि कृपां विधाय वैरिणं निष्कास्य मम राज्यं दापयित्वा मां सेवकं सनाथीकुरु? तत् श्रुत्वा कृपालुरामेण शीघ्रमेव तत्रागत्य

मायाविनं सुग्रीववेषधरं विद्याधरं निर्जीत्य सत्यसुग्रीवाय तद्राज्यं समर्पितं. तुष्टोऽथ सुग्रीवो निजाष्टादशकन्यानां पाणिग्रहणकृते रामं निमंत्रयामास. रामेणोक्तं प्रथमं त्वं सीताशुद्धिं समानीय मम मनःसंतापं दूरीकुरु? पश्चात्त्वदुक्तं सर्वमप्यहं करिष्यामि. तत् श्रुत्वा विराधसुग्रीवौ सीताशुद्ध्यर्थं विमानस्थितौ चलितौ. इतस्ताभ्यां रावणकृतखड्गप्रहारतो भूमौ पतितो भामंडलयदातिरत्नजटीविद्याधरो दृष्टः. वेदनाक्रांतेनापि तेन रावणकृतसीतापहरणादिसर्वोऽपि वृत्तांतस्ताभ्यां कथितः, तत् श्रुत्वा तौ द्वावपि तूर्णं रामसमीपे समागत्य तद्वृत्तांतं कथयामासतुः.

☒ ततो रामाज्ञया सुग्रीवो हनुमंतमाकार्य रामनामांकितमुद्रिकयोपेतं सीताप्रवृत्तिशुद्ध्यर्थं लंकायां प्रेषितवान्. हनुमानपि रामं प्रणम्य ततो द्रुतं गगनाध्वना लंकायां प्राप्तः, तत्र विभीषणकुंभकर्णादिपरिवारपरिवेष्टितं सभास्थितं रावणं नमस्कृत्य तेनोक्तं हे राजन् त्वं महासती सीतां मुंच? नो चेद्रामः कमलनालमिव तव मस्तकं छेदयिष्यति. तत् श्रुत्वा क्रोधोद्धतेन रावणेन हनुमद्गृहणार्थं निजसेवका आदिष्टाः, इतो हनुमान् रावणं पादप्रहारतोऽविलंबं सिंहासनादधो निपात्य स्वयं प्रपलाय्याशोकवाटिकायां समागतस्तत्राशोकवृक्षतले मुखमवनतीकृत्य हस्ततलविन्यस्तमस्तका मलीनचीवराणि दधाना स्नानांगविलेपनादिरहितोष्णोष्णनिःश्वासान्निष्क्रासयंती रामनामैकतानलीना सीता तेन दृष्टा, तूर्णं तस्याः समीपमागत्य तेन तां महासतीं प्रणम्य रामनामांकितमुद्रिका तस्या हस्ते दत्ता कथिता च रामकुशलोदंतपूर्वकं सकलापि वार्ता. मुद्रिकादर्शनतः

सहर्षं चमत्कृता सीता निजहृदयगतनिस्सीमरामस्नेहकदंबकाविर्भावं वहिर्निष्कासयंतीव निजनयनाभ्यां हर्षाश्रूणि मुमोच. हनुमतोक्तं हे मातरधुना त्वया चिंता न कर्तव्या, रामोऽधुनैवात्र सैन्ययुतः समागमिष्यति. वैरिणां च निहत्य विरहदुःखितायास्तव शुद्धिं करिष्यति. इत्युक्त्वा हनुमांस्ततो निःसृत्याग्निना लंका प्रज्ज्वाल्यारामांश्च भंक्त्वा द्वारपालान्निहत्य सहर्षो रामसमीपे समागतः, रामं नत्वा सर्वोदंतपूर्वकं तेन सीतावृत्तांतो निवेदितः, अथ रामोऽनेकविद्याधरवृंदयुतो भामंडलहनुमत् सुग्रीवविराधादिसुभटसहितो भूरिसैन्यसंकलितो लंकासमीपे समागतः.

☒ इतो विभीषणेन रावणायोक्तं हे बंधो! अधुनापि त्वं रामं प्रणम्य सीतां समर्पय? अन्यथायं रामस्तव कुलक्षयं करिष्यति, इति श्रुत्वा क्रुद्धेन रावणेन स निर्भर्त्स्य निष्कासितः, सोऽपि रामसमीपे समागत्य प्रणामं कृतवान्. रामेणाप्यवसरं ज्ञात्वा तस्मै बहुमानं दत्वा प्रोक्तमहं लंकाया राज्यं तुभ्यं दास्यामि. अथ रावणोऽपि निजसैन्यं मेलयित्वा समागतः, परस्परं द्वयोः सैन्ययोर्महायुद्धं प्रवर्तितं. रावणेन निजसैन्यं भग्नं विज्ञाय लक्ष्मणोपरि शक्तिप्रहारो मुक्तस्तेन लक्ष्मणो निश्चेतनीभूय भूमौ पतितस्तदा शोकातुरो रामो नानाविधान् विलापान् कर्तुं प्रवृत्तः, रामसैन्यं सर्वमपि शून्यं जातं. इतश्चंद्रविद्याधरेणागत्य रामाय प्रणम्य चोक्तं हे स्वामिन्! शक्त्या हतो जनः सूर्योदयं यावज्जीवति, तस्य जीवनोपायश्चैकोऽस्ति. भरतमातुलस्य विशल्याभिधाना महासती पुत्री वर्तते, तस्याः करस्पर्शनतो लक्ष्मणो नूनं शल्यरहितो भविष्यति. तत् श्रुत्वा

हनुमता प्रोक्तं तां विशल्यां महासतीं तज्जनकद्रोणमेघसहितामहमधुनैवात्रानयिष्यामि. ततो रामाज्ञामादाय भामंडलहनुमंतौ वियन्मार्गेण तत्र गत्वा तज्जनकसहितां तां विशल्याभिधानां महासतीमानयामासतुः, तस्याः करस्पर्शनतो द्रुतमेव सा शक्तिर्लक्ष्मणशरीराद् दूरं गता, तदा रामसैन्ये जयजयारावो जातः, परिणायिता च विशल्या द्रोणमेघराज्ञा लक्ष्मणाय. अथ पुनरपि द्वयोः सैन्ययोर्महायुद्धानि बभूवुः, प्रांते रावणेन निजसैन्यं सकलमपि प्रायो नष्टं ज्ञात्वा लक्ष्मणोपरि चक्रं मुक्तं. तच्चक्रं तु लक्ष्मणं प्रदक्षिणीकृत्य तस्यैव हस्ते स्थितं. तदा लक्ष्मणेन रावणायोक्तं अरे रावण ! अधुनापि त्वं सीतां प्रत्यर्पय ? नोचेदिदं चक्रं ते गल-नालं छेदयिष्यति, एवमुक्तोऽपि रावणो यदा रणान्न विरराम तदा लक्ष्मणेन तच्चक्रं रावणोपरि मुक्तं. ततश्छिन्नमस्तको रावणो मृत्युमासाद्य ज्येष्टकृष्णैकादशीदिवसे चतुर्थे नरके गतः, देवैश्च लक्ष्मणोऽयमष्टमो वासुदेव इत्युद्घोषणपूर्वकं तस्योपरि पुष्पवृष्टिः कृता. अथ रामः परिवारयुतो लंकायां प्रविश्य विभीषणं च राज्ये संस्थाप्य चिरकालविरहदुःखविह्वलामखंडितशीलां महासतीं सीतां गृहीत्वा ततो निवृत्यायोध्यायां समागतः, भरतादिभिर्महताडंबरेण तस्य प्रवेशमहोत्सवः कृतः, सुग्रीवहनुमद्भामंडलाद्याः सर्वेऽपि रामचरणौ प्रणिपत्य निज-निजस्थानके समागताः. अथ तत्र रामः सीतया सह विषयसुखानि भुंजानो निजकालं गमयति.

☒ इतः सीतायाः कुक्षौ गर्भोत्पत्तिर्जाता, गर्भप्रभावतश्च तस्याः सम्मेतशिखरयात्राया दोहदः समुत्पन्नः, इतस्तस्या दक्षिणेक्षणं स्फुरितं, तावता नागरमहाजनैं रामाग्रे समागत्य प्रोक्तं हे स्वामिन् ! लोका भवतो-

ऽपवादं बहु जल्पंति यद्बलात्कारेणापहृता सीता ध्रुवं परस्त्रीलंपटेन रावणेन भुक्तैव भविष्यतीति. तत् श्रुत्वा रामो गुप्तवेषेण रात्रौ नगरचर्चां श्रोतुं नगरमध्ये निर्गतः, पथि भ्रमन्नेकस्य रजकस्य गृहाग्रे समागतः, इतो रजकोऽपि क्षुधातुरो वस्त्रग्रंथिं मस्तके धृत्वा नद्याः स्वगृहे समागतः, तस्मिन्नवसरे तस्य भार्या गृहकपाटे तालकं दत्त्वा किंचित्कार्यार्थं प्रातिवेश्मिकगृहे गतासीत्. क्षुत्क्षामेण रजकेण निजभार्याकारणार्थं पूत्कारः कृतस्तत् श्रुत्वा सा तूर्णं तत्रागत्य गृहकपाटमुद्घाटयित्वा गृहांतर्गता. क्रुद्धेन रजकेण तां पादेन निहत्योक्तं रे दुराचारिणि एतावत्कालं त्वं कुत्र गताभूः? निर्गच्छ मम गृहात्, मे किमपि ते प्रयोजनं नास्ति. तत् श्रुत्वा स्त्रियोक्तं रे निर्लज्ज त्वं विचारय? रामेण यदि षण्मासं यावत्परगृहे स्थिता सीता पुनरानीय स्वगृहे रक्षिता, तर्हि त्वं मां केवलं क्षणमात्रेणैव गृहान्निष्कासयसि? रजकेणोक्तं रामस्तु स्त्रीवशोऽहं तु स्त्रीवशो नास्मि. इत्याद्यालापं श्रुत्वा रामेण चिंतितं सांप्रति धिक्, लोकापवादस्तु महानेव दृश्यते, अतो मया सीतायाः परिहार एव कर्तुं योग्यः, इति विचार्य तेन लक्ष्मणाग्रे सा वार्ता कथिता, लक्ष्मणेनोक्तं हे भ्रातः! लोकास्तु दुराचारिणः परदोषान्वेषिणः संति, स्वदोषांस्तु केऽपि न जानंति, रामेणोक्तमेष लोकापवादो मया सोढुं न शक्यते. ततो रामेण निजसारथिमाहूयोक्तं त्वं सीतां रथाधिरूढां कृत्वा सम्मेतशिखरे व्रज, तत्र तस्या दोहदं पूरयित्वाऽरण्यमध्ये तां विमुच्य त्वयेयं लोकापवादवार्ता तस्यै कथनीया. अथ सारथिरपि तां रथे समारोप्य सम्मेतशिखरंप्रति चलितस्तत्र गत्वा सीतयाऽत्यंतं भावपूर्वकं जिनवंदनेन तीर्थयात्रा कृता. ततो व्याघुट्य

रथाधिरूढा सीता यद्यरण्यमध्ये समागता तदा सारथिना हस्तौ नियोज्य रामोक्तो वृत्तांतस्तस्यै कथितः, तत स्तामेकाकिनीं वने त्यक्त्वा रथिको रथमादायायोध्यांप्रति चलितुंमनाः क्षणं तत्रैव तस्थिवान्. अथ सीता तत्र मनसि महादुःखं वहमाना मूर्च्छिता भूमौ पतिता, क्रमाच्छीतलानिलसंयोगतः सचेतनीभूय विलापं चकार. हे रामचंद्र ! यदि त्वया लोकापवादभीतेनाहं त्यक्ता तर्हि लोकप्रत्यक्षं मम परीक्षा तत्रैव किं न कृता ? अहो राम त्वया मे सगर्भाया अबलाया अपि दया मनसि नानीता, इत्यादिविविधप्रकारान् विलापान् कृत्वा सा चिंतयामास, अहोऽत्रार्थे रामस्य किं दूषणं ? ममैव प्राक्कृतदुष्कर्मणामयमुदयो बभूव. अथ भर्त्रा त्वहं परिहृता परं जिनोक्तो धर्मो मां मा परिहरतु. अथ सीतां नमस्कृत्य स्वाम्याज्ञैकपालने निजसार्थकतां मन्यमानो रथिको मनसि दुःखं वहमानोऽपि नयनाभ्यामश्रूणि मुंचन् रथमादायायोध्यांप्रति चलितः. इतस्तत्र परनारीसहोदर-तुल्यः पुंडरीकाभिधनगराधिपतिवज्रजंघनामा नृपस्तत्र समायातस्तेन विलापान् कुर्वंतीं सीतांप्रति पृष्टं, हे भगिनि त्वं कासि ? केन दुःखेनात्र गहनगहने समागतासि ? तद्वचनतस्तं सत्पुरुषं ज्ञात्वा संतुष्टया सीतया स्वकीयः सर्वोऽपि वृत्तांतस्तस्मै निवेदितः राजा तामाश्वस्य निजनगर्यामानीतवान्, निजभगिनिकृत्य चावासमध्ये रक्षिता, तत्र तया पुत्रयुगलं प्रसवितं, राज्ञा च महोत्सवपूर्वकं तयोर्लवांकुशाभिधाने दत्ते, क्रमेण तत्रैव च तौ वर्धितौ.

☒ इतो रथिकेनायोध्यायामागत्य सीताकृतविलापाद्युदंतकथनपूर्वकं सर्वोऽपि तद्वृत्तांतो रामाय कथितः, तत् श्रुत्वा पश्चात्तापं कुर्वाणो रामः सीतावियोगदुःखविदीर्णमानसो रथिनमादाय तूर्णं तत्र वने समागतः, कृतं

च तेन स्थाने स्थाने परिभ्रम्य तत्र सीताया गवेषणं, किंतु निर्भाग्यवता रंककुटुंबिना निधानमिव तेन क्वापि सीतामुखं नो दृष्टं. ततस्तां यूथभ्रष्टां मृगीमिवैकाकिनीं काननिवासिसिंहादिक्रूरप्राणिनिहतां मन्यमानः शोकानलदग्धहृत्तृणकुटीरो रामः कथंचिदयोध्यायां सारथियुतः समागत्य, कृत्वा च तस्याः प्रेतकार्याणि, राजकार्यादिपराङ्मुखो लक्ष्मणादिभिः प्रतिबोध्यमानोऽपि सीताध्यानैकलीनचेता मूढ इव निजसमयं गमयांचकार. अथ तत्र लवांकुशौ सकलकलाकलापकलितौ क्रमेण ललितललनाहृदयांबुजहंसलीलायिताह्वयसौ जातौ. तदा वज्रजंघेन निजवदनलवणिमतिरस्कृतशशिलेखाशशिचूलाभिधाना निजतनया लवाय परिणायिता, अंकुशार्थं च स्वमित्रपृथुराजपार्श्वे तत्तनूजा मार्गिता, पृथुना च तदज्ञातवंशादिदूषणदानपूर्वकं तन्न स्वीकृतं. तदा संग्रामे पृथुराजं विजित्य पराक्रमेण च स्वकीयोत्तमकुलतां प्रकटीकृत्य प्रांते च सन्मानादिना तं प्रीणयित्वा लवणिमाद्यगण्यगुणगणमंडितां तस्य पुत्रीमंकुशः परिणीतवान्. इतस्तत्र कुतूहलैकप्रियेण नारदेनाप्यागत्य लवांकुशयो रामसीतांगजन्मत्वं निवेद्य सर्वेऽप्यतुलहर्षोल्लसितमानसा विदधिरे. अथ लवांकुशौ निजभुजाबलेन बलवतोऽपि कतिचिद्भूपतीन् वशीकृत्य प्रकंपिताचलाचलं भूरिगजतुरगस्यंदनसुभटान्वितं बलमादायायोध्यानिकटे समागतौ, तत् श्रुत्वा रामलक्ष्मणावपि निजसैन्यमादाय सन्मुखमागतौ, द्वयोः सैन्ययोः परस्परं खड्गाखड्गिशराशरि युद्धं प्रवृत्तं. तदा लवांकुशाभ्यां कल्पांतकालविकरालघनाघनधाराधोरणीभिरिव कर्णांताकृष्टधनुर्मुक्तबाणधाराभिः पद्मसैन्यपद्मवनखंडं तथा विलोडितं यथा कतिचिद्राजहंसैस्ततः पलायितं, पद्मोऽपि पद्ममिवांतविशरारुतां प्राप्तस्तदा लक्ष्मणेनानन्योपायेन ज्वलज्ज्वालामालाकरालितं

कुल-कम्

चक्रं ताभ्यां प्रति मुक्तं. तच्चक्रमपि निसर्गतो गोत्रिघातपराङ्मुखीभूतत्वात्तन्मुक्तशरराजिभिर्जर्जरीभूतमिव भयादपसृत्य पुनर्लक्ष्मणकरसंगतं जातं, तदा लक्ष्मणो विषादं प्राप्तः.

☒ इतो नारदेन तत्रागत्योक्तं भो पद्म ! अत्र गतभ्रमरतनुजागमावर्णनीयहर्षस्थाने कथमिव त्वया स्वकीयं हृदयं शोकपंकेन मलिनीक्रियते ? मनोविह्वलतया नारदोक्तश्लेषोक्तिमजानता पद्मेन नारदः प्रश्नविषयीकृतो भो नारदमुने ! अधुना त्वहं निजजयसंशयापन्नोऽनेकतर्कवितर्ककल्लोलोल्ललितशोकापाराकूपारपतितो गतपोतो वणिगिव निःश्वस्य विश्वमपि विश्वं शोकपानीयमयं नयनविषयी करोमि, न जानामि हंत त्वयैतन्मे शोकस्थानं कथमिव हर्षस्थानीकृत्य वर्ण्यते ? ततो नारदो लवांकुशयोः सीतासतीकुक्षिसरोजभ्रमरतनुजोत्पत्तित्वं प्रकटीकृत्य पद्मं च विलुप्तशोकपंकं हर्षोल्लासविकसितं च विधाय भ्रमरतनूजावासरसास्वादादियोग्यं तस्य हृदयं चकार. तत् श्रुत्वा हर्षोल्लसितमानसो रामः स्वपुत्रमिलनार्थं प्रस्थितः, तदानीमेव विनयप्राग्भारनम्रीभूतशरीरौ लवांकुशावपि पितुः सन्मुखमागत्य पद्मपदपद्मयोर्निजभ्रमरायितं ख्यापयंतौ नेमतुः, प्रवेशमहोत्सवपूर्वकं तौ नगरे समानीय रामेण चिरविरहनिजहृदयोद्भूतसंतापस्तद्वदननिर्गतोदंतवाग्जलधाराभिरुपशामितश्च. अथ लक्ष्मणसुग्रीवप्रमुखाः शीघ्रं पुंडरीकनगरे गत्वा ततो महासतीं सीतामानयामासुः, नगरबहिःस्थितया सीतयोक्तं प्रथमं मे शीलपरीक्षां कारयिष्यामि. ततो रामादिसकलनगरलोकसमूहा नगरबहिः समागताः, तदा सीतया तत्र खदिरांगारधगधगायमानैका खातिका निर्मापिता, प्रविष्टं च तन्मध्ये स्वशीलपरीक्षायै. ततस्तस्याः शीलप्रभावेण साग्निखातिका निर्मलजलकल्लोलयुता

संजाता, तस्यां कमलोपरि हंसलीलायितं दधाना सीता साक्षाल्लक्ष्मीरिव रामादिनिखिलनगरलोकमनोगतसंशयदारिद्र्यं दूरीचकार. देवैर्जयजयारावपूर्वकं सीतोपरि सुमनोवृष्टिर्विहिता, घोषितं च निखिलजगज्जनजनितचमत्कारसकलललनालिशिक्षणीयाचरणीयाचारविचारेयं महासती सीता निर्दोषैव. अथ लक्ष्मणादयो विश्वेऽपि नगरनिवासिजननिकरा सीताचरणारविंदे नमस्कृत्य निजापराधं क्षमयामासुः, रामोऽपि नयनाश्रुधाराछद्मना निजांतःकरणमालिन्यं क्षालयन् स्वकीयापराधं क्षमयामास, कथितं च तेन सीतायै हे प्रियेऽधुना तव चरणन्यासैश्चिरोत्कंठितामिमामयोध्यां नगरीं पावनीकुरु ! सीतयोक्तं हे राम ! अधुना वैराग्यामृतरसास्वादतृप्तीभूतं मे मानसमसारसंसारसुखविषास्वादतो विमुखीभूतमेव. अतोऽहं गतवृजिनजिनैकध्यानपरा रागाद्यंतरंगारिपराभवं शमसंवेगादिसुभटसहायेन परिहृत्य संसारिजनभंगुरप्रेमाभिलाषपराङ्मुखी अवर्णनीयाविचलाभंगुरैकप्रेमपात्रं चिरोत्कंठितां मुक्तिसखीमेव मिलितुमिच्छामि.

☒ तत् श्रुत्वाऽश्रुजलाविलनेत्रो रामः स्वकीयाविचारितकार्यनिंदनपरः पश्चात्तापोदधिमग्नोऽनेकविधाः प्रार्थनास्तस्यै नगरांतरागमनाय चकार. सीतयोक्तं हे राजन् संप्रति त्वया संसारसागरनिमज्जनैकहेतुर्मम विषये मोहो नैव कर्तव्यः, न च किंचिदत्रविषये भवतामपराधोऽपि मे दृष्टीगोचरी भवति. मम कर्मणामेवायं दोषः, किंच संसारघोरांधकारेऽनादिकालतो मोहनीलिकांधीभूतांतर्विलोचनानां रागादिचौरहीयमाणरत्नत्रयधनानां पामरप्राणिनां निसर्गतो दयालुतार्द्रीभूतांतःकरणा ज्ञातजिनसिद्धांतरहस्यत्वेन गीतार्थपदवीं प्राप्ताः सुगुरवो ज्ञानांजनशला-

कया नेत्ररोगं दूरीकृत्य पुनश्च रत्नत्रयदानपूर्वकमक्षयानंतसौख्यैकभांडागाररूपं मोक्षनगरंप्रति तान्नयंति, अतस्त्वदक्षयसुखप्राप्त्यर्थमहमपि तेषामेव सुगुरूणां शरणमंगीकरिष्यामि, अतो हे राजन् मह्यमाज्ञां देहि ? रामेणापि तस्या अत्याग्रहं विनिश्चित्याज्ञा दत्ता. वैराग्यपरंपरया तया बहुपरिवारेण सह दीक्षा गृहीता. घनघातिकर्मैधनदहनैकदाहनिभानि विविधानि तपांसि तप्त्वा कालं कृत्वा सा माहेंद्रपदवीं प्राप्ता, ततोऽनुक्रमेण च मोक्षं यास्यति. ततो द्वादशसहस्रवर्षायुःक्षये लक्ष्मणः कालं कृत्वा चतुर्थे नरके गतः श्रीरामेण विरहातुरेण षण्मासं यावन्मृतलक्ष्मणशरीरमुत्पाट्य भ्रमितं, ततो देवीभूतजटायुपक्षिजीवेन प्रतिबोधितो रामस्तस्याग्निसंस्कारं कृत्वा दीक्षां गृहीतवान्. एकदा कायोत्सर्गस्थितस्य रामस्य परीक्षणकृते शक्रेण सीतारूपं तस्याग्रे प्रकटीकृतं, परं रामस्तु निश्चल एव स्थितः. प्रांते श्रीरामर्षिः शत्रुंजयतीर्थे समागत्य केवलज्ञानमासाद्य मोक्षं गतः, रावणलक्ष्मणावपि कतिचिद्भवांतरे मोक्षं गमिष्यंति.

॥ इति शीलकुलके सीता कथा ॥

मूलम्—चालणीजलेण चंपाए । जीए उग्घाडिअ उवारतिगं ॥
कस्स न हरेइ चित्तं । तीए चरिअं सुभद्दाए ॥ ७ ॥

व्याख्या—चालनिकया निष्कासितं यज्जलं तेन यया चंपानगर्या द्वारत्रिकं समुद्घाटितं, तस्या सुभद्रायाश्चरित्रं कस्य चित्तं न विस्मापयति ? अपितु सर्वेषामपि चित्ते विस्मयं करोतीत्यर्थः ॥७॥

सुभद्रायाः कथा चेत्थं—

☒ वसंतपुरनगरे जितशत्रुनामा राजास्ति. तत्र जिनदासाभिधानः श्रेष्ठी वसति, तस्य जिनधर्मैकतत्परा शीलवत्यभिधा भार्या, तस्याः कुक्षिशुक्तिसमुद्भवा मुक्तामया विद्याद्यनेककलाकलापाभिरामा जिनधर्मैकचित्ता सुभद्राख्या तनयाभूत्. तस्या वदनेंदुमालोक्य भीतमिव मिथ्यात्वघोरतिमिरं दूरीभूतमेव. इतस्तत्र चंपानगरीवास्तव्यो बुद्धधर्मैकलीनो बुद्धदासाभिधानः श्रेष्ठी व्यवसायार्थं समागतः, व्यापारादिनिमित्तं गमनागमनप्रसंगतो जिनदासेन सह तस्य मैत्री जाता. एकदा व्यापारार्थं जिनदासगृहागतस्य बुद्धदासस्य हृदयं सुभद्रावदनेंदुं निरीक्ष्य चकोरलीलायितं प्राप्तं. अथ सुभद्रागतमानसो बुद्धदासो निजगृहे समागतः, ततस्तेनैकस्मै स्वमित्राय स्वकीयाभिलापो निवेदितः, मित्रेणोक्तं हे बुद्धदास ! जिनदासो जैनधर्मिणं विनान्यस्मै कस्मैचिदपि स्वतनयां न दास्यति, तत् श्रुत्वा बुद्धदासः कपटश्रावकीभूय त्रिसंध्यं जिनपूजापरायणः प्रतिक्रमणादिक्रियातत्परश्च संजातः, सर्वदा मुनिवंदनं कृत्वा धर्मकथाव्याख्यानादि शृणोति. एवं बुद्धदासं जैनधर्मैकचित्तं विलोक्यैकदा जिनदासेन हृष्टेन स्वयमेव निजांगजा सुभद्रा तस्मै परिणायिता. अथ तौ दंपती तत्र सुखेन सांसारिकभोगान् भुंजानौ तिष्ठतः. अथ कतिचिद्दिवसानंतरं बुद्धदासो बहुद्रव्यमुपार्ज्य सुभद्रासहितश्चंपायां गतः, तत्र जिन-

धर्मपरायणां सुभद्रां वीक्ष्य बुद्धधर्मानुयायी श्वशुरपरिवारस्तस्या उपरि द्वेषमहवत्. अतः सुभद्रा पृथग्गृहेऽवसत्. सुभद्रां दृढजिनधर्मानुरागिणीं विज्ञाय जैनमुनयस्तस्या गृहे आहाराद्यर्थं समागच्छंति. तस्याः श्वश्रूननांदप्रभृतिपरिवारः सर्वदा साधोर्दुर्जन इव छिद्राण्यन्वेषयति. एकदा बुद्धदासभगिन्या बुद्धदासाय कथितं हे भ्रातस्तव भार्या दुःशीला ज्ञायते, तस्य गृहे सर्वदा जैनमुनयः समागच्छंति, तैः सह सैषा तव भार्या हास्यविनोदादिकुतूहलानि करोति. तत् श्रुत्वा बुद्धदासेन तामवगणय्योक्तं मम भार्या दुःशीला नैवास्ति, यूयं सर्वे धर्मविरोधतस्तस्या उपरि द्वेषं वहथ, किंच ज्ञातचरणकरणधर्मा जैनसाधवोऽपि कदापि दुःशीला न भवेयुः.

☒ अथैकदा कोऽपि पाणिपात्रो जिनकल्पी साधुः सुभद्रागृहे आहारार्थं समागतः, सुभद्रया तन्मुनिनयनं अंतःपतिततृणन्याकुलं दृष्टं, निष्कासितं च लाघवतो जिह्वाग्रेण, तदा सुभद्राललाटस्थं कुंकुमतिलकं मुनिललाटे लग्नं. कुंकुमतिलकालंकृतभालं मुनिं सुभद्रागृहान्निस्सरंतं विलोक्य छिद्रविलोकनैककार्यया ननांद्रा बुद्धदासमाकार्य तद्वितथमपि सुभद्रादुःशीलत्वं प्रकटीकृत्य तस्मै दर्शितं, तद् दृष्ट्वा शंकाकुलचेता बुद्धदासस्तस्या गृहे गमनागमनं तत्याज, विस्तृता च सा वार्तानिलारूढेव सकलेऽपि नगरे. अथ सुभद्रा निजनिमित्तं जिनशासनमालिन्यमुपस्थितं ज्ञात्वा हृदि खिन्ना सती कायोत्सर्गं चकार, गृहीतश्च तयेत्यभिग्रहो यदा ममोपरितः कलंकमिदमुत्तरिष्यति तदैवाहं कायोत्सर्गं पारयिष्यामि. अथ तस्याः सतीत्वमाहात्म्यतः शासनदेवतया प्रत्यक्षीभूय कथितं हे वत्से प्रातरहमस्या नगर्याः प्रतोलीकपाटान्नियंत्रयिष्यामि, त्वया सूत्रतंतुबद्धचालिन्या कूपाज्जलं निष्कास्य

प्रतोली सिंचनीया, एवं कृते सत्येव कपाटाः समुद्घटिष्यंति, जिनशासनापभ्राजना च विलयं यास्यति. इत्यु-
क्त्वा साऽदृश्यीभूताः, अथ प्रातर्नगरप्रतोल्यनुद्घटनतः सर्वेऽपि मनुष्यतिर्यंचो व्याकुलीभूय स्थिताः, राज्ञापि
तत्रागत्य हस्त्यादिभिः कपाटा आकर्षिताः, परं केनाप्युपायेन ते नोद्घटिताः, तदा व्याकुलीभूतो भूपतिस्तद्दै-
विककोपकृत्यं विचिंत्य स्नानं कृत्वा शुद्धवस्त्राणि परिधाय गंधद्रव्ययुतबलिदानादि विधाय कथयामास यः कोऽपि
देवः क्रुद्धो भवेत्तेन सर्वोपरि कृपा कर्तव्या. तदा चंपानगरीस्था कापि महासति सूत्रतंतुबद्धचालिन्या कूपा-
ज्जलं निष्कास्य यदि तज्जलेन प्रतोलीः सिंचयिष्यति तदैव तस्याः शीलमाहात्म्यतः प्रतोल्यः समुद्घटिष्यंती-
त्याकाशवाणी जाता. ततो राज्ञा निजराज्ञीः सतीशेखरा मत्वाहूताः किं तु तास्वेकापि तत्कार्यं कर्तुं न
शक्ता जाता, ततो राज्ञा पटहोद्घोषणा कारिता यन्नगरमध्ये या कापि सती भवेत्तयैतत्कार्यं कृत्वा नगरजनदुःखं
दूरीकर्तव्यं, परं नगरनारीमध्यात्कापि तत्कार्यं कर्तुं समुद्यता नाभूत. तदा सुभद्रया कायोत्सर्गं पारयित्वा श्वश्रूं-
प्रति कथितं हे मातर्यदि भवदाज्ञा चेत्तदाहमेतत्कार्यं विधाय नगरलोकान् संकटरहितान् कुर्वे. तत् श्रुत्वा हृदय-
गतेर्ष्योद्गारान्निष्कासयंतीव सावदत् हे सतीमन्ये मया तु प्रथमत एव तव सतीत्वं ज्ञातं, अधुना लोकानां तद्-
ज्ञापने किमपि प्रयोजनं नास्ति, अतो गृहमध्यस्थितैव तव सतीत्वं पालय? मास्मानपि व्रीडापात्रं कुरु?
श्रुता च मया पूर्वमपि जैनानां पाखंडाः, सुभद्रा तु मौनमाधाय तद्वचांस्यवगणय्य स्नानं कृत्वा पवित्रवस्त्राणि
परिधाय पंचपरमेष्टिध्यानं कुर्वंती नृपसमीपे प्राप्ता. राज्ञोक्तं हे भगिनि नगरलोकं संकटविमुक्तं कृत्वा तव सक-

त्वसतीशिरोमणित्वं प्रकटीकुरु? ततः सा नृपादिनगरलोकपरिवृता कूपोपकंठमागत्य सूत्रतंतुबद्धचालिन्या मिलितलोकोत्कंठया सह कूपाज्जलमाचकर्ष. अथ तज्जलमादाय प्रतोलीपार्श्वे समागत्य तयोक्तं यदि मया मनोवाक्कायाभिरखंडितं शीलं पालितं भवेत्तर्हि प्रतोलीकपाटा उद्घटंतु, इत्युक्त्वा तया प्रतोलीकपाटौ सिंचितौ तत्क्षणमेव चोद्घटितौ. इत्थं तया प्रतोलीत्रयकपाटा उद्घाटिताः, गगनांगणागतागणितदेववृंदैर्दुंदुभिनादपूर्वकं जयजयारावमुच्चरद्भिस्तस्या उपरी पुष्पवृष्टिर्विहिता. ततस्तयोक्तमथ चतुर्थप्रतोलीकपाटौ या कापि स्वकीयसतीत्वख्यापनोत्सुका चंपायां भविष्यति सैवोद्घाटयिष्यति. एवं तत्सतीत्वं दृष्ट्वाऽपारप्रमदोल्लसितमानसा नृपादयो नगरलोका आश्चर्यमासाद्य तस्याश्चरणौ पूजयामासुः, श्वशुरादयश्च लज्जावनतवदनाः स्वकीयापराधं क्षमयामासुः, बुद्धदासोऽपि तद्वदनेंदुं निरीक्ष्य समुद्र इव हर्षकल्लोलोच्छलितमानसो बभूव. ततस्तद्दत्तधर्मोपदेशामृतधारासिक्ता नृपश्वशुरादिनगरलोका गतमिथ्यात्वातपा जैनधर्मानुरागिणो बभूवुः, एवं सतीसुभद्रया शीलसलीलतो निजकलंकपंकं दूरीकृत्य जिनशासनप्रभावना कृता, कियत्कालं गृहस्थावासे श्रावकत्वमाराध्य प्रांते चारित्रं गृहीत्वा सुभद्राबुद्धदासौ स्वर्गं गतौ. ॥ इति शीलकुलके सुभद्रासतीकथा ॥

मूलम्—नंदउ नमयसुंदरी सा । सुचिरं जीए पालिअं सीलं ॥
गीहत्थणंपि काउं । सिहिया य विडंबणा विविहा ॥ ८ ॥

व्याख्या—सा नर्मदासुंदरी चिरकालं यावन्नंदतु, यया कृत्रिमं शैथिल्यं कृत्वा विविधा नानाप्रकारा विडंबनाः कदर्थनाः सहिताः, निर्मलं शीलं च पालितं. ॥ ८ ॥

☒ तस्याः कथा चेत्थं—वर्धमानाभिधनगरे संप्रतिनामा राजा, ऋषभसेनाभिधश्च सार्थवाहः परिवसति, तस्य भार्या वीरमती, तस्याः सहदेववीरदासाख्यौ द्वौ पुत्रौ, ऋषिदत्ताभिधाना च पुत्री, क्रमेण सा युवजनस्पृहणीययौवनावस्थां प्राप्ता, बहुभिर्व्यापारिधनिकपुत्रैर्मार्गितापि मिथ्यात्वतिमिरांधभूतेभ्यस्तेभ्यः सा तत्पितृभ्यां न ददे. अन्यदा चंद्रपुरनगराद्रुद्रदत्ताभिधः कश्चित् श्रेष्ठी तन्नगरे समाययौ. अन्यदा तेन रुद्रदत्तेनासत्यमपि प्रमाणविदां दययेव व्योमांबुजोदाहरणं निजवदनांभोजेन सत्यीकुर्वती निजप्रासादगवाक्षस्था सा ऋषिदत्ता दृष्टा. तां दृष्ट्वा मन्मथशरविद्धो रुद्रदत्तो गतचैतन्य इव बभूव. ततस्तेन स्वकीयमित्राय कुबेरदत्ताय स्वकीयाभिप्रायं निवेद्य पृष्टं, भो मित्र रूपनिर्जितनिर्जरांगनागर्वेयं कस्य पुत्री? तेनोक्तं मित्र इयं जिनधर्मैकतत्परस्य ऋषभसेनसार्थवाहस्यांगजास्ति, किं च जैनंविना सोऽन्यस्मै कस्मैचिदपि निजांगजां नैव दास्यति. तत् श्रुत्वा स कपटश्रावकीभूय नित्यं जिनपूजासाधुवंदनावश्यकादिक्रियापरः समजनि. अथ ऋषभसेनस्तं जिनधर्मपरायणं निजसाधर्मिणं ज्ञात्वा तस्मै निजतनयां ददौ.

☒ अथायं रुद्रदत्तः श्वशुरमापृच्छ्य ऋषिदत्तामादाय चंद्रपुरनगरे समायातस्त्यक्तश्च तेन तत्र जिनधर्मः क्रमेण ऋषिदत्तापि भर्तृस्नेहतः संसर्गदोषेण जिनधर्मे शिथिला जाता. क्रमेणैषा गर्भिणी जाता, संपूर्ण-

समये तस्या महेश्वरनामा पुत्रो जातः, क्रमेण सकलविद्याभ्यासं कृत्वा स यौवनवयः संप्राप्तः. इतश्च ऋषिदत्ताया वृद्धभ्राता सहदेवाभिध आसीत्, तस्य सुन्दर्याख्या भार्या बभूव, तस्या एकदा नर्मदायां स्नानकरणार्थं दोहदः समुत्पन्नस्ततः सहदेवसार्थवाहः क्रयाणकानि समादाय सुन्दरीसहितो नर्मदोपकंठे समागत्य तस्या दोहदं पूरयामास. तत्र व्यापारे बहुलाभं विज्ञाय तेन नर्मदापुरीत्यभिधानं नगरं संस्थाप्यैकं जैनमंदिरमपि निर्मापितं. क्रमेण संपूर्णसमये तयैका पुत्री जनिता. श्रेष्टिना पुत्रवत्तस्या जन्ममहोत्सवं कृत्वा नर्मदासुन्दरीति नाम दत्तं. अथ क्रमेण शशिलेखेव वर्धमाना सकलकलाकलापवंधुरा सा यौवनं प्राप्ता. अथैकदा ऋषिदत्तया तस्या अवर्णनीयरूपलवणिमादिगुणान् श्रुत्वा चिंतितं चेदेषा मम पुत्रस्य महेश्वरस्य पाणिग्रहणं कुर्यात्तदा मे मनोऽभिलाषः सफलीभवेत्, परं मां जिनधर्मपराङ्मुखीं विज्ञाय मम भ्राता तां निजतनयां मम पुत्राय नैव दास्यतीति चिंतयंती सा विलापं कर्तुं लग्ना. तावद्रुद्रदत्तेन तत्कारणं पृष्टा सा निजहृदयगताभिलाषं कथयामास. तत श्रुत्वा सोऽपि चिंताचितचित्तः समभवत. अथ पार्श्वस्थेन महेश्वरेण तद्वृत्तांतं कर्णगोचरीकृत्योक्तं हे पितरौ युवां विषादं मां कुरुतं, अहमेव तत्र गत्वा केनाप्युपायेन तां परिणीय समागमिष्यामीत्युक्त्वा स शीघ्रमेव तत्रागत्य मातुलाय मिलितः, ततः क्रमेण तेन विनयादिगुणगणैर्मातुलादीनां मनस्तथावर्जितं यथा ते सर्वेऽपि तस्योपरि हर्षोल्लसितहृदयाः संजाताः, महेश्वरोऽपि नित्यं निजशुद्धभावेन देवगुरुवंदनावश्यकादिक्रियाभिर्जिनधर्माराधकः समभूत्. अथ तं तथाविधं जिनधर्मपरायणं विज्ञाय मातुलेन तस्मै नर्मदासुन्दरी परिणायिता. कियत्कालं तत्रस्थित्वा

स श्वशुराज्ञया तामादाय निजनगरे समायातः, वधूसहितं निजतनयं समागतं दृष्ट्वा पितरावत्यंतं प्रमुदं प्राप्तौ. क्रमेण नर्मदासुन्दर्या श्वशुरादीन् प्रतिबोध्य मिथ्यात्वघोरसागरे निमज्जतः समुध्धृत्य सर्वेऽपि ते जिनधर्मैकयानपात्रे समारोपिताः.

अथैकदा सा नर्मदासुन्दरी गवाक्षस्था निजवदनतो दिवापि नगरजनानां चंद्रोदयभ्रमं कारयंती तांबूलं चर्वंती निष्टीवनं चकार. अकस्माच्च तन्निष्टीवनं पथि गच्छतो जैनमुनेरेकस्य मस्तकोपरि पतितं. मुनिनोक्तं यद्येवं त्वं मुनीनामासातनां करोषि तेन तव भर्तुर्वियोगो भविष्यतीति निशम्य भयसहितं विषादं दधाना सा तूर्णमेव गवाक्षादुत्तीर्य मुनेश्चरणयोर्नमस्कृत्यानुपयोगतो विहितं निजापराधं क्षमयामास. मुनिनोक्तं हे महानुभावे! मम हृदये मनागपि क्रोधो नास्ति, मन्मुखादेतद्वाक्यं वृथैव निर्गतं तेन त्वं खेदं मा कुरु? अथ नर्मदासुन्दरी स्वकर्मणामेव दोषं ददती गृहे समागता. अथैकदा महेश्वरदत्तो व्यापारार्थं द्वीपांतरं प्रति प्रस्थितस्तदा मोहाकुलमानसया स्त्रिया भणितं हे स्वामिन्नहमपि भवता सार्धमेव समागमिष्यामि, यतो भवद्वियोगं सोढुमहमशक्तैव. तस्या अत्याग्रहं विज्ञाय सोऽपि तया सह प्रवहणारूढो द्विपांतरप्रति चलितोऽवगाहितश्च तेन भूयान् पंथा अथैकदा रात्रौ प्रवहणमध्ये केनचित्पुरुषेण गायनं कर्तुं प्रारब्धं. तन्निशम्य नर्मदया भर्तुरग्रे कथितं हे स्वामिन् योऽयं पुरुषो गायति, तस्य शब्दानुसारेणाहं जानामि यदयं पुरुषो श्यामवर्णः स्थूलहस्तपादो दुर्बलदेहो मषांकितगुह्यस्थानो द्वात्रिंशतिवर्षप्रमाणो विशालहृदयश्चास्ति. तत् श्रुत्वा भर्त्रा चिंतितं नूनमियमसती वर्त्तते,

नोचेदियमेतादृशी वार्ता कथं जानीयात् ? अथ प्रभाते तेन स पुरुषो दृष्टः, पृष्टश्च तदा तत्सर्वमपि यथोक्तं मिलितं. अथ श्रेष्ठिना निजहृदयोद्भूतक्रोधानलमवसरेक्षणभस्मनाच्छाद्य स्थितं.

☒ इतः कतिचिद्दिवसानंतरं राक्षसद्वीपमासाद्य नाविकैः कथितं भोः लोका अहमत्र प्रवहणं स्थिरीकरोमि, अयं राक्षसद्वीपः समायातः, यः कोऽपि जलेंधनादिग्रहणेच्छुर्भवेत्तेन तत् शीघ्रमेव ग्राह्यमित्युक्त्वा तेन प्रवहणं स्थिरीकृतं. सर्वेऽपि लोकास्तत्र शनैः शनैरुत्तीर्य जलेंधनादिसंचयं चक्रुः. अथ महेश्वरेणापि तया नर्मदया सहोत्तीर्य चिंतितं किमहमेतां दुःशीलां जलधौ निधानीकरोमि वा विषं दत्त्वा यमकिंकरीत्वं प्रापयामीति विचारयन् स तया सह क्रीडामिषेण कदलीकानने समागतः, सुप्तश्च क्षणं कदलीदलकोमलशय्यायां. अथ तत्र नर्मदासुंदरी आंदोलितकदलीदलालिभिः सुरभिवनवातैस्तूर्णं निद्रां प्राप्ता. एवं सुखसुप्तां तत्रैव विमुच्य महेश्वरदत्तस्तूर्णं ततः समुत्थाय रत्नाकरतटमागत्य प्रवहणोपरि समारूढः, कथितं च तेन कपटकुटिलचेतसा नाविकादिलोकानां पुरो यन्मम महिला राक्षसैर्भक्षिता, अहं च कथमपि प्रपलाय्यागतोऽस्मि, निशाचरप्रकराश्च पृष्टे समागच्छंति, तत इतस्तूर्णं प्रवहणं सज्जीकृत्य वाहयत ? इति श्रुत्वा भयाकुलचेतसो नाविका द्रुतं ततः पोतं वाहयामासुः. अथ पोतस्थितेन महेश्वरेण चिंतितं सम्यग्जातं यद्व्यपगतलोकापवादं मयैषा दुःशीला त्यक्ता. अथ पवनप्रेरितः पोतोऽयं यवनद्वीपे प्राप्तः, कियत्कालानंतरं स श्रेष्ठी ततो बहुधनमुपार्ज्य निजगृहे समायातः, कथितं च तेन निजपरिवाराय राक्षसभक्षणादि निजभार्यास्वरूपं, शुचं प्राप्तेन परिवारेण च तस्याः प्रेतकार्यादि कृतं,

महेश्वरश्चान्यां भार्यां परिणीतवान्. अथ तत्र सुप्तोत्थिता नर्मदासुंदरी तत्र निजभर्त्तारमदृष्ट्वा हृदयास्फोटं पूत्कारं कुर्वंती विविधविलापैर्वनवासिजंतूनपि रोदयंति हा नाथ मामिहैकाकिनीं मुक्त्वा त्वं कथमत्रज इति पुनः पुनः प्रजल्पंती नयनाश्रुजलैर्वनवृत्तसंचयान् सिंचयंती वदनतो दीर्घोष्णनिःश्वासान्निष्कासयंतीतस्ततोऽटंती तटिनीपतेस्तटमागता. परं तत्रापि प्रवहणमनालोक्य हृदयोद्भूतातीव्रदुःखतो मूर्छां प्राप्ता. सुरभिशीतलानिलतः पुनः सचेतनीभूय नानाविलापमुखरीकृतकाननैषा चिंतयामासाथानन्यशरणाया ममात्मघात एव शरणं. पुनस्तया चिंतितं संसारसागरतरणैकयानपात्रनिभजिनागमे प्रतिषिद्धवालमरणकरणतो न ममात्मनः कापि श्रेयोऽर्थप्राप्तिः, किं च न जानेऽहमत्र भर्त्रा कथमेकाकिनी त्यक्ता ? नूनं मया तदा या जैनमुनेराशातना कृता तन्मे दुष्कर्म उदयमागतमेव. इति विचार्य सा मृत्तिकात एकां श्रीजिनप्रतिमां कृत्वा सर्वदा तत्र पूजयति वनफलादि च भक्षयति. इत्थं सा नमस्कारध्यानपरायणा स्वकर्मनिंदनतत्परा धर्मप्रभावतो वनवासिक्रूरप्राणिभिरनुपद्रुता निजसमयं गमयांचकार.

☒ अथैकदा तस्याः पितृव्यो वीरदासाभिधानो बब्बरकुलंप्रति गच्छन् जलेंधनाद्यर्थं प्रवहणस्थस्तत्र समागतस्तेन रत्नाकरोपकंठे भ्रमंती नर्मदासुंदरी वीक्ष्योपलक्षिता च. विस्मयमापन्नेन तेन पृष्टं हे पुत्रि त्वमत्रैकाकिनी कथं समागतासि ? इत्युक्ता सा नयनाभ्यामश्रूणि मुंचंति सकलमपि निजवृत्तांतमादितः कथयामास. अथ वीरदासस्तामाश्वास्य निजप्रवहणमध्ये समारोप्याग्रे चलितः, क्रमेण बब्बरकुले समागत्य राज्ञश्च प्राभृतं दत्वा

स सुखेन तत्र व्यापारे समुद्यतोऽभवत्, नर्मदासुंदर्यपि तत्र सुखेन तिष्ठति. अथ तस्यां नगर्यामेका हरिण्यभिधाना रूपजितनिर्जरांगना वारांगना वसति, तस्यै संतुष्टेन राज्ञैवं वरो दत्तोऽस्ति यद्यः कोऽपि नूतनव्यापारी अत्र समागच्छेत् स तस्यै वारांगनायै दीनारसहस्रमर्पयेत्. अथ वीरदासं तत्रायातं श्रुत्वा तस्या वारांगनाया दासी तद्दीनारसहस्रं गृहीतुं तत्पार्श्वे समायाता. तत्र रूपलवणिमादिभिर्निखिलनगरनारीगर्वतिरस्कारिणीं नर्मदासुंदरीं विलोक्य विस्मयमापन्ना गृहे समागत्य सा हरिणींप्रति कथयामास, हे स्वामिन्! मयाद्य वीरदासगृहे निखिलनागरपुरुषवशीकरणैकलवणिमा यैका प्रमदा विलोकिता सा चेदस्मद्गृहे भवेत्तदा नूनं कल्पवल्ल्येव गृहांगणे प्रफुल्लिता ज्ञातव्या. इतो वीरदासो हरिण्यै दीनारसहस्रं समर्पयितुं तद्गृहे समागतः, हरिण्या च दीनारसहस्रं गृहीत्वा मिष्टवचनसत्कारादिभिस्तस्य मनो वशीकृत्य तत्पार्श्वात्तन्नामांकिता मुद्रिकाधिगता. अथ वीरदासस्ततो निःसृत्य व्यापारार्थमन्येषां व्यापारिणां गृहे गतः, तदवसरं प्राप्य कपटपेटया हरिण्या दास्यै कथितं, त्वमेतन्मुद्रिकाभिज्ञानं दर्शयित्वा तत्पितृव्याकारणछद्मना तां युवतीं द्रुतमत्रानय ? अथ सैषा कपटपाटवोपेता चेट्यपि तथैव कृत्वा नर्मदासुंदरीं तत्रानयामास. वेश्यया च सा भूमिगृहे गुप्तीकृता. अथ निजस्थानं समागतेन वीरदासेन नर्मदामनालोक्य व्याकुलीभूय नगरमध्ये सा गवेषिता, परं तां निर्भाग्यो लक्ष्मीमिव कुत्राप्यलब्ध्वा स हरिणीगृहे समागतः, तेन तस्यै बहुधा पृष्टं परमनृतैकखन्या तया सत्यं न जल्पितं. भूरिदिवसानंतरं नर्मदागवेषणश्रांतः, शोकाकुलमानसः स ततो निःसृत्य भृगुकच्छपुरे समायातः: अथ

तत्रैको जिनदासाभिधानः परोपकारैकदक्षः श्राद्धवर्यो वसति, तत्पुरतो दुखितेन वीरदासेन निजसकलोऽपि वृत्तांतः कथितस्तदा तेनोक्तं हे बंधो त्वं खेदं मा कुरु? अहं बुद्धिप्रयोगेण निश्चितं नर्मदां समानयिष्यामी त्युक्त्वा दयार्द्रांतःकरणेन तेन क्रयाणकैः प्रवहणानि पूरितानि, प्रस्थितश्च स बब्बरकुलंप्रति. इतो वीरदासगमनानंतरं वारांगनाया सा नर्मदा भूमिगृहाद्बहिर्निष्कासिता, कथितं च तस्यै त्वमथ वारांगनाचारमंगीकुरू? भुंक्ष्व च वियोगरहितानि विषयसुखानि? नर्मदाया तु तत्कथमपि नांगीकृतं, वेश्यया पंचशतकशाप्रहारैस्ताडितापि सा स्वकीयशीलभंगं कर्तु मनसापि नैच्छत्. इतो दैवयोगेन नर्मदाशीलमाहात्म्यतस्तद्दिने एव हरिणी मृता. तदा भीताभिरन्याभिस्तत्परिवारवेश्याभिः सा नर्मदा गृहान्निष्कासिता. इतश्च राज्ञा तद्रूपादि श्रुत्वा तदानयनार्थं निजप्रधानपुरुषप्रेषणपूर्वकं सुखासनिका मुक्ता. अथ नर्मदा स्वशीलरक्षणार्थं बुद्धिमुपार्ज्य कृत्रिमग्रथिलत्वमंगीकृत्य सुखासनिकामवगणय्य तैः सार्धं चलिता, मार्गे च ग्रथिलेवानेकविधानि कुतूहलानि कुर्वंती पंकिलमेकं पल्वलं वीक्ष्य तत्र पतित्वा शरीरे च कर्दमलेपं कृत्वा लोकानां पुरः कथयति, भो लोका यूयं पश्यताहं मम शरीरे कस्तूरिकालेपं करोमि, किं च यः कोऽपि जनः समीपे समायाति तंप्रति सा कर्दममुच्छालयति, हस्ताभ्यां च धूलिमुत्पाट्य स्वशिरसि निःक्षिपति, लोकांश्चैवं धूलिधूसरान् विदधाति. ततः प्रधानपुरुषै राज्ञोऽग्रे तस्या ग्रथिलत्वं ज्ञापितं, राज्ञा मांत्रिकानाहूय नानाप्रकारमंत्रतंत्रादिप्रयोगः कारितस्तेन त्वेषा सविशेषं स्वकीयग्रथिलतां प्रकटीकृत्य धूलिपाषाणादीनक्षिपत्. अथ तां ग्रथिलां ज्ञात्वा राज्ञापि सा त्यक्ता. अथ सा

नागरडिंभादिभिरुपद्रुता निजग्रथिलतां प्रकटयंती नगरमध्ये परिभ्रमति. इतोऽसौ जिनदासश्रेष्ठी प्रवहणयुतो बब्बरकुले समागत एव डिंभगणैः परिवेष्टितां जिनस्तवनान्युच्चारयंतीं इतस्ततः परिभ्रमंतीं ग्रथिलां नर्मदां विलोकयामास. श्रेष्ठिना चिंतितं नूनमेषा ग्रथिला नास्ति. श्रेष्ठिना तस्यै प्रोक्तं हे पुत्रि त्वं मा भयं कुरु? इति श्रुत्वा नर्मदया शिशवो भापयित्वा दूरं निष्कासिताः, तदा श्रेष्ठिना पृष्टं हे पुत्रि केयं तेऽवस्था? तव पितृव्य वीरदासकथनतोऽहं भृगुकच्छनगरवास्तव्यो जिनदासनामा श्रेष्ठी ते शुद्ध्यर्थमेवात्रायातोऽस्मि. तत् श्रुत्वा हृष्टा नर्मदा निजोदंतकथनपूर्वकं बभाण हे तात मामस्मात्संकटान्निष्कासय? जिनदासेनोक्तमथ त्वया राजमार्गे नगरनारीपानीयघटाः कर्करादिप्रयोगेण भंजनीयाः, अथ तत्संकेतपुरस्सरं तौ द्वावपि नगरमध्ये समागतौ, तत्र नर्मदा हास्यादिविविधकुतूहलानि कुर्वंती नगरनारीशिरःस्थान् कूपोध्धृतजलभृतघटान् कर्करादिभिर्बभंज, गतश्च राज्ञोऽग्रे नागरजनकृतस्तत्पूत्कारः, राज्ञोक्तमस्ति कोऽपीदृशो नरो य एतां पुरमध्याद्बहिर्निष्कासयेत्. वेश्यामरणतो भीतानां नागराणां मध्ये केनापि तत्कार्यं नांगीकृतं, तदा जिनदासेनागत्योक्तं स्वामिंश्चेत्तवाज्ञा तर्हि द्वीपांतरगमनोत्सुकोऽहमेनां प्रवहणे समारोप्य द्वीपांतरे नयामि, राज्ञा तु हर्षेण नगरजनप्रियं तत्कार्यं तस्मै समर्पितं.

☒ अथ जिनदासेन नृपाज्ञया लोकानां दर्शनाय बलात्कारेण तस्याश्चरणौ निगडितौ, बध्ध्वा च तस्या हस्तौ सा प्रवहणमध्ये मुक्ता, वाहितानि च प्रवहणानि, पथि तया सर्वग्रथिलतां त्यक्त्वा स्नानं कृत्वा जिनदासदत्तवस्त्राभूषणानि परिहितानि. क्रमेण प्रवहणानि भृगुकच्छे प्राप्तानि, मिलिता च नर्मदा निजपितृव्याय, पितृव्योऽपि

हृष्टः सन् जिनदासस्य महोपकारं मन्यमानस्तया सह नर्मदापुर्यां समागतस्तां दृष्ट्वा सर्वमपि कुटुम्बं प्रमुदितं, तयापि सर्वं निजविडंबनं कुटुंबाग्रे प्रकटीकृतं. अथैकदा ज्ञानी मुनिरेकस्तत्र समायातस्तंप्रति वंदनार्थं सर्वे गताः देशनांते नर्मदापित्रा पृष्टं हे भगवन् केन कर्मणा नर्मदा दुःखिनी जाता.? मुनिनोक्तं सा पूर्वभवे नर्मदानद्य-धिष्टायिका देव्यासीत्, एकदा शीतादिपरीषहसहनार्थं साधुरेकस्तत्र समायातः, तं वीक्ष्य मिथ्यात्वभावेन तया तस्योपसर्गाः कृताः, परं साधुं निश्चलं ज्ञात्वा तं क्षामयित्वा सम्यक्त्वमंगीकृतं. ततश्च्युत्वेयं तव तनया नर्मदा-सुन्दरी जाता. भवांतराभ्यासतस्तद्गर्भोत्पत्तिसमये तस्या मातुर्नर्मदानदीस्नानदोहदो जातः, साधूपसर्गकरणतस्तया च दुःखं प्राप्तं. इति श्रुत्वा नर्मदया जातिस्मरणं प्राप्य दीक्षा गृहीता; एकादशांगान्यधीत्य विविधतपसा शरीर-शोषं विधायैकदा सा परिवारयुता चंद्रपुरीं समागता, महेश्वरदत्तोपाश्रये च स्थिता श्वश्रूश्वशुरभर्त्रादीनुपलक्ष्य धर्मं श्रावयति, परं ते तां नोपलक्षयंति. अथैकदा तया महासत्या स्वरलक्षणादीनि व्याख्यातानि यत्स्वरश्रवणेनैवेत्थं पुरुषादीनां वर्णाकारतिलमषवर्षादीनि ज्ञायंते, तत् श्रुत्वा महेश्वरेण चिंतितं यद्येवंविधं वर्णनं शास्त्रमध्ये वर्त्तते, तदा नूनं मया सा निरपराधा प्रिया परित्यक्ता. इति चिंताकुलहृदयेन तेन पृष्टं हे महासति उक्तज्ञानयुक्ता मयैका निर्दोषा मम स्त्री परित्यक्ता साथ कीदृशी भविष्यति? साध्व्योक्तं त्वं खेदं मा कुरु? सैवैषाहं नर्मदासुंदर्यस्मीत्युक्त्वा प्रतीत्यर्थं तया सर्वोऽपि संकेतितवृत्तांतः कथितः, अथ तामुपलक्ष्य महेश्वरेण क्षमा याचिता, साध्व्योक्तं नैष तव दोषो मम कर्मणामेवायं दोषः, ततो महेश्वरऋषिदत्ते वैराग्यतो दीक्षां जगृ-

हतुः, क्रमेण ते त्रयोऽप्यनशनं कृत्वा देवलोके गताः, भवैकेन च मोक्षं गमिष्यंति.

॥ इति शीलकुलके नर्मदासुन्दरी कथा ॥

मूलम्—भद्दं कलावईए । भीसणरन्नंमि रायचत्ताए ॥
जं सा सीलगुणेणं । छिन्नंगा पुण नवा जाया ॥९॥

व्याख्या—कलावत्याः सत्या भद्रं कल्याणमस्तु, रौद्रारण्यमध्ये राज्ञा त्याजिता या सा स्वशीलगुणेन कृत्वा छिन्नांगा सती पुनर्नवा जाता. ॥ ९ ॥

तस्याः कथा चेत्थं—

☒ जंबूद्वीपे मंगलावतीविजये शंखपुरे नगरे शंखनामा राजा राज्यं करोति, अथैकदा विदेशागतत-नगरनिवासिनागश्रेष्ठिपुत्रदत्तेन राज्ञोऽग्रे प्राभृतमानीय मुक्तं. कुशलोदंतपूर्वकं राज्ञा पृष्टं चेत्किमप्याश्चर्यं त्विलोकितं भवेत्तदा कथय? तेनोक्तं हे स्वामिन् देवशालनगरे मयैकस्त्रियो महास्वरूपं दृष्टमित्युक्त्वा तेन राज्ञोऽग्रे तत्प्रतिकृतिचित्रपट्टो मुक्तः, तद् दृष्ट्वा राज्ञोक्तं भो दत्त नूनमियं कापि देवीव दृश्यते मानुष्या इदं रूपं तु दुर्लभं. दत्तेनोक्तं स्वामिन्निंयं देवशालपुरेशितुर्विजयसेनराज्ञः श्रीमतीराज्ञीकुक्ष्युद्भवायाः कलावत्याः प्रतिकृ-

तिरस्ति. तया चैवं प्रतिज्ञा कृतास्ति यद्यः कोऽपि मम चतुःप्रश्नानामुत्तरं प्रदास्यति तस्यैवाहं पाणिग्रहणं करिष्यामि.

☒ अथैकदा राज्ञा मां प्रतीत्यादिष्टं यदस्याः कलावत्या योग्यः कोऽपि राजकुमारो गवेषणीयः, तत् श्रुत्वाहं तस्याः प्रतिकृतिमादाय भवंतं च तद्योग्यं ज्ञात्वात्र समागतोऽस्मि, तत् श्रुत्वा मदनातुरमानसेन राज्ञोक्तं हे दत्त येनाप्युपायेन मच्चित्तधनचौरिकां तां दापय? दत्तेनोक्तं हे राजन्! युष्मद्भिः सरस्वती समाराधनीया, यथा तच्चतुःप्रश्नप्रत्युत्तरदानपूर्वकं सा भवतः सुलभा भवेत्. तत् श्रुत्वा राजा ब्रह्मचर्यं पालयन् सरस्वतीसमाराधनतत्परो जातः, सप्तमे दिने सरस्वत्या प्रत्यक्षीभूयोक्तं हे वत्स तव करस्पर्शनमात्रेणैव स्तभस्थपुत्तलिका तच्चतुःप्रश्नानामुत्तराणि दास्यतीत्युक्त्वा सा तिरोभूता. अथ शंखराजा हृदयगततत्प्राप्त्यभिलापप्रेरितो दत्तसहितो देवशालपुरं प्रति प्रस्थितः, शंखराजानं तत्रागतं ज्ञात्वा विजयसेनराज्ञा महताडंबरेण तस्य प्रवेशमहोत्सवः कृतः, अथ नृपतिकारितस्वयंवरमंडपे दानशालायां भोजनार्थिनो विप्रा इव कन्यार्थिनोऽनेके राजानो मिलिताः, अथ श्वेतांबरोपशोभिता हृदयस्थितमुक्तमाला नानालंकरणालंकृतांगोपांगा हस्तन्यस्तवरमाला कलावती स्वयंवरमंडपे विदग्धसखीयुता समायाता.

अथ प्रतिहारी जगाद—

भूपति सघला बोलजो । चार बोल सुविचार ॥
कवण देव गुरु तत्त्व कुण । सत्त्व कहो कुण सार ॥१॥

☒ तत् श्रुत्वा केचिद्राजानो हरिं केचिद्‌ब्रह्माणं केचिद्विष्णुं देवं कथयंति. गुरुतत्त्वसत्त्वादिस्वरूपवार्तामपि कोऽपि न जानाति. अथ शंखराज्ञा तत्प्रश्नोत्तरदानार्थं स्तंभन्यस्तशालभंजिकोपरि स्वहस्तो न्यस्तः, तदैव सा जल्पिता येन पुरुषेण मम मस्तकोपरि हस्तो विन्यस्तस्तस्य सत्पुरुषस्य महिम्नाहं प्रत्युत्तरं यच्छामीत्युक्त्वा सोवाच—

वीतराग देवो गुरु । पंचमहाव्रतधार ॥
दया धर्म ए तत्त्व छे । सत्त्वेंद्रियजय सार ॥१॥

☒ इति स्वकीयचित्तकलापिकादंविनीध्वनितुल्यं प्रश्नोत्तरध्वनिं श्रुत्वा मयूरीवामंदानंदसंदोहयुता कलावती द्रुतं शंखराजकंठे वरमाळां चिक्षेप. अथ तां सुमुहूर्ते परिणीय शंखराजा निजनगरं प्रति प्रस्थितः, महोत्सवपूर्वकं पुरिप्रवेशं विधाय कलावत्या सह विषयसुखं भुंजानोऽयं सुखेन राज्यं पालयति. अथैकदा कलावत्या स्वप्ने कामकुंभं वीक्ष्य राज्ञे तद् ज्ञापितं, राज्ञोक्तं हे प्रिये सर्वशुभलक्षणोपेतो राज्यभारधुरंधरस्ते मनोज्ञः पुत्रो भविष्यति. अथ कलावतीं सगर्भां विज्ञाय विजयसेनराज्ञा सा निजप्रधानपुरुषान् संप्रेष्य स्वगृहे समाहूता. तैः

प्रधानपुरुषैः सह कलावत्यर्थे तद्भ्रात्रा जयसेनेन मनोहरवस्त्रोपेते द्वे भुजाभरणे प्रेषिते आस्तां. राज्या तु तदाभूषणवस्त्राणि राज्ञोऽदर्शयित्वैव पेटायां मुक्तानि. अथ तेषां प्रधानपुरुषाणां महताग्रहेणापि राज्ञा निजराज्ञी न प्रेषिता. ततस्ते व्याघुट्य निजनगरं प्रति गताः.

⊠ अथैकदा कलावती ते भुजाभरणे परिधाय हास्यविनोदं कुर्वंती सखीनामग्रे कथयति, हे सख्यः! येन पुरुषेण ममैतान्याभरणवस्त्राणि मुक्तानि तेन सह ममात्यंतप्रीतिर्वर्तते, कदा स दिवसः समायास्यति यदाहं तेन सह मिलित्वा ममात्मानममंदानंदसंदोहपराकाष्ठां प्रापयिष्यामीत्यादिमिश्रशब्दानुचारयंत्येषा प्रच्छन्नस्थितेन राज्ञा दृष्टा. तत् श्रुत्वा च क्रोधाध्मातचित्तो राजा विचारयामास यदस्याः केनाप्यपरपुरुषेण सार्धमवर्णनीयस्नेहो वर्त्तते, यस्यैतान्युद्गारसन्निभानि वचनानि तस्या दुःशीलत्वं प्रकटीकुर्वंति. अथास्याः परित्याग एव युक्त इति विचार्य तेन रात्रौ मातंगीद्वयमाहूयोक्तं युवाभ्यां कलावतीं रथे समारोप्य वनमध्ये नीत्वाऽभूषणयुतं तस्या हस्तद्वयं च छेद-यित्वा, तां च तत्रैव मुक्त्वात्रागत्य तद्धस्तद्वयं मे समर्पणीयं. अथ ते मातंग्यौ तां रथाधिरूढां कृत्वाऽरण्ये समागत्य कथयामासतुः, हे मातर्न ज्ञायते यत्केन कारणेन राज्ञा त्वं परित्यक्तेत्युक्त्वा राज्ञ आदेशस्तस्यै ताभ्यां प्रोक्तः, तत् श्रुत्वैषा विविधान् विलापान् करोति. इतस्ताभ्यां तस्या हस्तावलंकारयुतौ छेदयित्वा प्रस्थितं. अथ महावेदनाव्याकुलया तया तत्र पुत्ररत्नं प्रसूतं, परं कररहिता सा तस्य जलशुद्धिं कर्तुमप्यसमर्थासीत्. इतस्तस्याः शीलमाहात्म्यतस्तत्र जलवृष्टिर्जाता, नद्यां च जलपूरं समागतं, एवं मेघवृष्ट्यैव तत्पुत्रदेहशुद्धिर्जाता, ततस्तया

किंचिदनुकूलं स्वदैवं विज्ञायोक्तं यदि मया त्रिकरणशुद्ध्या शीलं पालितं भवेत्तदा मम करौ पुनः समागच्छतां. तत्क्षणमेव गगनांगणात्कुसुमवृष्टिपूर्वकं तस्या अलंकारोपेतं करयुगलं स्थानस्थितं बभूव. अथैषा निजार्भकमादाय तटिन्यपरतटे संप्राप्ता, इतस्तत्र स्नानार्थमागत एको वृद्धस्तापसस्तां तथावस्थामचिरप्रसविनीं विज्ञाय दयार्द्रांतःकरणः कथयामास, हे सुभगे हे पुत्रि! एतदवस्थया त्वयात्र वने स्थातुमयुक्तमतो ममाश्रमे समागच्छेत्युक्त्वा स तां स्वाश्रमे समानीतवान्. ततस्तां दुःखितामाश्वास्य तापसेन पृष्टं हे पुत्रि! त्वं कस्य भार्या? कस्माच्चा-सन्नप्रसविन्यप्यरण्यमध्ये समागता? तत् श्रुत्वा कलावत्या स्वकीयः सकलोऽपि वृत्तांतस्तापसाय कथितः, कृपा-लुना तापसेन सा पुनरप्याश्वास्य स्वाश्रमे रक्षिता. धर्मध्यानयुता सा तत्र सुतसहिता निजसमयं गमयांचकार.

☒ अथ मातंगीयुगलेनालंकारसहितं कलावतीकरयुगलं राज्ञोऽग्रे मुक्तं, राजा तदलंकारं यावद् गृह्-णाति तावत्तद्बंधुजयसेनकुमार नामांकितं दृष्टं, ततः संभ्रांतेन राज्ञा तस्याः सखी तद्विषये पृष्टा, तयोक्तं स्वामिन् देवशालनगरागतप्रधानपुरुषाणां हस्तेन राज्या भ्रात्रा जयसेनेनाभूषणवस्त्रादीनि निजभगिनीकृते प्रेषितान्य-भवन्, तत् श्रुत्वा राज्ञा ते प्रधानपुरुषा आहूय पृष्टास्तदा तैस्तथैव यथास्थितवृत्तांतो निवेदितः, तत् श्रुत्वा राजा वज्राहत इव निश्चेतनीभूय भूमौ पपात. प्रधानादिभिः शीतलानिलजलादिभिः सचेतनीकृतो नृपो विविधान् विलापान् कर्तुं प्रवृत्तः, विरहानलोद्भूतांगारराशिभिस्तन्मुखकमलं म्लानिं प्राप्तं. दुःखव्याकुलोऽसौ वह्नौ प्रवेष्टुं समुद्यतोऽभूत्. तदा दत्तव्यवहारिणा समागत्य राज्ञे विज्ञप्तिः कृता, हे स्वामिन् सप्तदिवसावधि त्वं प्रतीक्षस्व

यावदहं तत्र गत्वा तस्याः शुद्धिं करिष्ये. इति राजानं प्रतिबोध्य स तां गवेषयितुमरण्यमध्ये भ्रमणं चकार. इतस्तेन सरिदुपकंठे कतिचित्तापसा दृष्टाः, तेभ्यस्तेन पृष्टं भो तापसा भवद्भिः किं काचिदेकाकिनी महिलात्र दृष्टा ? तैरुक्तं तव तया सार्धं किं कार्यमस्ति ? ततस्तेन सर्वं वृत्तांतं कथयित्वोक्तं हे तापसास्तस्याः कलावत्या वियोगेन राजा निजदेहं त्यजति, ततो यदि सा चेत्समासाद्यते तर्हि जीवितदानपुण्यं भवेत्. इति श्रुत्वा तैरनुमितं नूनमयं राज्ञः प्रधानोऽस्तीति विचार्य तैर्दत्ताय पुत्रसहिता सा कलावती दर्शिता. दत्तं दृष्ट्वा कलावत्या नयनाभ्यामश्रुधारा पतिता, ततोऽसौ तामाश्वास्य राज्ञो वृत्तांतं निवेदयामास, कथितं च पुनस्तेन हे भगिनि कृतं कर्म विना भुक्तं नैव प्रहीयते, तीर्थंकरादिसत्पुरुषा अपि निजकर्मफलानि भुक्त्वैवाधिगतानंतसौख्यात्मकमोक्षभाजो भवंति. अथ त्वं निजवदनेंदुदर्शनतो विरहवडवाग्निदग्धं नृपहृदयानंदमहोदधिं चपलमुल्लसितं कुरु ? अन्यथा नृपो नूनमग्नौ प्रविश्यात्मघातं करिष्यति, अथ कलावती तापसानापृच्छ्य दत्तेन सह रथस्थिता चचाल, तूर्णं च निजनगरपरिसरे प्राप्ता, राजापि तामागतां श्रुत्वा नयनाभ्यामश्रूणि मुंचन् द्रुतं सन्मुखमागतः, निजापराधं च क्षामयित्वा महोत्सवपूर्वकं पुत्रसहितायास्तस्या नगरप्रवेशंकारयत्, ततोंगजन्मनोऽपि तेन स्वप्नानुसारेण पूर्णकलश इति नाम दत्तं. अथैकदा कलावत्या राज्ञे पृष्टे हे स्वामिन् ! केनापराधेनाहं वनमध्ये त्यक्ता कृता च छिन्नहस्ता ? तदा लज्जितेन राज्ञा प्रोक्तं हे भद्रे त्वं तु सर्वथैव गतकलंकासि, मया तु किंचित्पूर्वदुष्कर्मानुसारेण यत्त्वयि अनाचरणं विहितं तन्मातंगैरपि न क्रियते, इति कथयित्वा तेन सर्वोऽप्युदंतः कथितः.

☒ इतस्तत्रैको ज्ञानी मुनिः समायातः, राजा कलावत्या सह मुनिं नंतुं समागतः, मुनिना देशना दत्ता, तत् श्रवणानंतरं राज्ञा मस्तकेंजलिं कृत्वा पृष्टं हे भगवन्ननया कलावत्या किमेतत्कर्मोपार्जितं येन मया निष्कलंकापि सा छिन्नहस्ता विहिता. मुनिरुवाच हे राजन! श्रीमहाविदेहे माहेंद्रपुरनगरे विक्रमाभिधराज्ञो लीलावत्यभिधभार्याकुक्षिसमुद्भवा सुलोचनाह्वया पुत्री बभूव, क्रमेणैषा यौवनं प्राप्यैकदा नृपोत्संगपंकजे हंसलीलायितं दधौ. तदैकेन केनचित्पुरुषेणैकः शुको राज्ञे प्राभृतीकृतः, पठितोऽसौ शुको राज्ञे मधुरवचनैराशीर्वादं ददौ. तुष्टेन राज्ञा स शुको निजपुत्र्यै समर्पितः, राजकुमारी तं शुकं सुवर्णपंजरे निक्षिप्य तस्मै भक्षणकृते दाड़िमद्राक्षादि ददाति. अथ क्रमेण तस्य शुकस्योपरि तस्यात्यंतप्रीतिः संजाता, क्षणवारमपि सा तस्य विरहं न सहते. एकदा सा सुलोचना निजानंदमहोदधींदुतुल्यं तं शुकं कनकपंजरगतं हस्ते गृहीत्वा क्रीडोद्याने सीमंधरस्वामिप्रासादे गत्वा प्रभुं नमस्कृत्यानेकरसिककाव्यैः स्तुतिं कर्तुं लग्ना. तदा राजकुमारीहस्तस्थसुवर्णपंजरगतः शुकोऽपि तां प्रभुप्रतिमां दृष्ट्वा चिंतयामास मया त्वेवंविधा प्रतिमा नूनं क्वापि दृष्टास्ति. इति चिंतयतस्तस्य जातिस्मरणज्ञानं समुत्पन्नं, तेन स निजपूर्वभवं चिंतयितुं लग्नो यथा मया पूर्वभवे चारित्रं प्राप्य शास्त्राण्यधीत्यापि वस्त्रपुस्तकपात्रादिमूर्छया चारित्रं विराध्य निजज्ञानं वृथा निर्गमितं. ततः कालं कृत्वाहमत्र वने शुकोऽभवं. अथ मयाद्यप्रभृति सर्वदा प्रभुमेनं प्रणम्यैव भोजनं कर्तव्यमित्यभिग्रहस्तेन गृहीतः अथ सुलोचना शुकसहिता पुनः स्वगृहे समायाता,

द्वितीयदिने सुलोचनया यदा स शुको हेमपंजराद्बहिर्निष्कास्य स्वहस्ते गृहीतस्तदा "नमो अरिहंताणं" इत्युच्चरन् समुड्डीय तत्र प्रासादे गत्वा प्रभुप्रतिमां प्रणम्य बहिरागत्य स वनफलानि भक्षयितुं लग्नः, सुलोचना त्वत्र शुकविरहातुरा चंद्रंविना चकोरीव विविधान् विलापांश्चकार.

☒ एवं रुदनपरां तां ज्ञात्वा पदातयः शुकानयनार्थं धावितास्तैश्च तत्राम्रतरुशाखायां शुकं विलोक्य गृहीत्वा चपलं कुमारिकायै समर्पितः, सुलोचनया क्रोधेनैतस्य गतिभंगकृते पार्श्वतो द्वावपि पक्षौ छेदितौ स्वर्णपंजरे च स निक्षिप्तः, अथ तत्रस्थेन तेन चिंतितं धिगस्तु मांप्रति यन्मया पूर्वभवे चारित्रं विराद्धं तेनात्र भवे मम पारवश्यं संप्राप्तं. अथ गृहीतनिजाभिग्रहपालनबद्धादरोऽयं जिनदर्शनवंचित आहारं परित्यज्यानशनं गृहीत्वा सौधर्मे देवलोके देवो जातः. सुलोचनापि शुकशोकविरहातुराऽनशनं प्रतिपद्य सौधर्मदेवलोके शुकदेवप्रिया जाता. ततश्च्युत्वा हे राजन् स शुकजीवस्त्वं जातः, सुलोचनाजीवस्तु कलावती जाता. एवं भवांतरेऽनया यत् शुकपक्षद्वयं छेदितं तेन कर्मोदयेन त्वयैतस्या हस्तौ छेदितौ. एतत् श्रुत्वा नृपराज्ञ्योर्जातिस्मरणं समुत्पन्नं स्वपूर्वभवान् विलोक्य वैराग्येण ताभ्यां चारित्रमंगीकृतं, ततः कालं कृत्वा तौ देवौ जातौ, कालांतरे मोक्षे च गमिष्यतः

॥ इति शीलकुलके कलावती कथा ॥

मूलम्—सीलवईए सीलं । सक्कइ सक्कोवि वन्निउं नेयं ॥
रायनिउत्ता पुरिसा । चउरोवि पवंचिआ जीए ॥ १० ॥

व्याख्या—शीलवत्याः शीलंप्रति शक्रोऽपींद्रोऽपि वर्णयितु न समर्थो भवति, यतः शीलगुणा अनंताः, इंद्रस्य च मतिः स्वल्पा, यया शीलवत्या राज्ञा नियुक्ताश्चत्वारोऽपि जनाः प्रवंचिताः संकटमध्ये निक्षिप्ताः, अर्थाच्चतुर्भिर्धूर्तजनैरिति प्रतिज्ञा कृता यद्वयं शीलवतीं भूंजयिष्यामस्तान् धूर्तान् सा वंचयामास. स्वशीलमपि च तया रक्षितं. ॥ १० ॥

शीलवती कथा चेत्थं —

☒ आनंदपुरेऽरिदमनाख्यो राजा राज्यं करोति, तत्र मणिमाणिक्यमुक्ताफलादिनिजद्रव्यसमूहतो रत्नाकरं केवलं मकराकरमेव मन्यमानो रत्नाकराख्यो राजमान्यः श्रेष्ठी परिवसति. तस्य श्रीनाम्नी जिनधर्मपरायणा भार्यासीत्. तया पुत्राभावतोऽजितबलाख्या देवी समाराधिता. भाग्ययोगेनैकं पुत्ररत्नं लब्ध्वा तस्य तयाजितसेनेति नाम दत्तं अथानुक्रमेण सोऽजितसेनो बाल्यभावमपाकृत्य महिला हृदयकलापिधनगर्जतुल्यां यौवनावस्थां प्राप्तः, अथैकदा तस्य रत्नाकरस्य कोऽपि सेवको मंगलावतीनगर्यां गतोऽभूत्. तत्र तेन जिनदत्त

श्रेष्टिनो गृहे कन्यकैका रुपादिगुणगणैर्दासीकृतामरांगना दृष्टा. अथ तेन पृष्टो जिनदत्तोऽवदत् यदि कोऽप्यस्यास्तुल्यरूपादिगुणोपेतोद्वासप्ततिकलानिपुणो वरो मिलिष्यति तदा तेन सार्धमहमेतस्या मे कन्यायाः पाणिग्रहणं कारयिष्यामि. तत् श्रुत्वा तेन सेवकेनोक्तं मम श्रेष्टिरत्नाकरस्यैकोऽजितसेनाभिधः कलाकलापनिपुणः पुत्रोऽस्ति. तत् श्रुत्वा हृष्टेन श्रेष्टिना स्वपुत्रीसंबंध करणार्थं निजपुत्रो जिनशेखराभिधस्तेन सार्धं तत्र प्रेपितस्तेन तत्रागत्य रत्नाकराय सर्वा वार्ता निरूपिता पाणिग्रहणं च मेलितं ततो रत्नाकरो निजपरिवारयुतो मंगलवत्यामागतः, महोत्सवपूर्वकं जिनदत्तेन निजपुत्रीशीलवत्याजितसेनेन सह परिणायिता, ततः पुत्रवध्वादिपरिवारपरिवृतो रत्नाकरः पुनः स्वनगरे समायातः, तत्राजितसेनः शीलवत्या सह विपयसुखानि भुंजानः सुखेन तिष्टति.

☒ अथैकदा रात्रौ सुखसुप्तया तया नदीमध्ये कटिभागबद्धरत्नपंचकं मृतकं यातीति वदंत्याः श्रृगाल्याः शब्दः श्रुतस्ततः शीलवती द्रुतं समुत्थायार्धरात्रौ मस्तके घटं धृत्वा नदींप्रति चलिता. जागरमाणेन श्वशुरेणार्धरात्रावपि तां बहिर्गच्छंतीं विलोक्य चिंतितं नूनमेपा दुःशीला वर्त्तते. शीलवती तु नदीतीरे समागत्य मृतकं च जलमध्यान्निष्कास्य तस्य कटीतटाद्रत्नानि गृहीत्वा तन्मृतकं श्रृगाल्यै भक्षणाय समर्पितं, ततस्तूर्णं गृहे समागत्य निजशय्यायां प्रसुप्ता, प्रभाते श्वशुरेण पुत्रादीनां तद् वृत्तांतं निरूप्यैकः कूटलेखो लिखितो यच्छीलवतीपिता शीलवतीं निजपार्श्वे कस्मैचिद्विलंबितप्रयोजनाय समाह्वयतीति. तल्लेखोदंतं शीलवत्यै ज्ञापयित्वा श्वशुरस्तामादाय प्रस्थितः, चतुरशीलवत्या श्वशुरादीनां मुखाकृतितस्तेपां तत्कपटपाटव निजहृदयगोचरी कृतं. अथ पथि

गच्छंतौ तौ विश्रामार्थं कस्यचित्तरोश्छायायां प्रसुप्तौ, श्वशुरस्तु तस्याश्चेष्टाविलोकनार्थं कृत्रिमनिद्रायुतो जागरमाणः प्रसुप्तः.

☒ इत एकः काको निकटस्थकरीरवृक्षस्थितो जल्पति यदत्र वृक्षमूले दशलक्षमितं द्रव्यमस्ति, तत् श्रुत्वा शीलवत्योक्तं हे काक प्रथमं शृगाल्युक्त्या मे भर्तृविरहोऽभवत्, अधुना त्वमप्युक्त्वा किं मातापित्रोरपि वियोगं कारयिष्यसि? तत् श्रुत्वाश्चर्यं प्राप्तेन श्रेष्ठिना द्रुतमुत्थाय पृष्टं भो वधु त्वं केन सार्धं वार्तालापं करोषि? तयोक्तमहं तु स्वभावेनैव जल्पामि. गाढाग्रहेण पृष्टया तया तद्द्रव्य वृत्तांतः श्वशुराय निवेदितस्ततो हृष्टेन श्वशुरेण तत्र खनित्वा तत्सर्वं धनं निष्कासितं. अथ श्वशुरेणोक्तमथेत आवां निजगृहे एव गमिष्यावः, शीलवत्योक्तमथ मम पितुर्ग्रामं निकटमस्ति, ततस्तत्र गत्वैवावां पुनर्निजनगरं प्रति गमिष्यावः, श्वशुरेणोक्तमथ पश्चादेव तत्र गमनवार्ता. इत्युक्त्वा श्वशुरस्तया सार्धं पश्चाद्वलितो मार्गे च तेन तदा रात्रौ गमनकारणं पृष्टा शीलवती यथास्थितं पंचरत्नप्राप्तिस्वरूपं जगौ. तेनात्यंतहृष्टेन श्वशुरेण गृहे समागत्य पुत्रादिपरिवाराय तस्याः सकलवृत्तांतं निरूप्य कथितमियं वधूर्नूनं साक्षाल्लक्ष्मीरिवास्मद्गृहेऽस्ति. क्रमेण स रत्नाकरश्रेष्टी श्रावकधर्मं प्रपाल्य सद्गतिं गतः.

☒ अथैकदा राज्ञाजितसेनमाहूय तस्मै मंत्रिपदवी दत्ता. एकदा नृपो निजसैन्ययुतः परदेशगमनोत्सुको

बभूव, कथितं च तेनाजितसेनाय यत्त्वयापि मया सार्धं परदेशे समागंतव्यमिति. अथाजितसेनेन गृहमागत्य शीलवत्यै तदुदंतकथनपूर्वकमुक्तं हे प्रियेऽधुना ते शीलखंडनचिंता मम जायते. तदा शीलवत्योक्तं हे स्वामिन् त्वं चिंतां मां कुरु? एतां मम पुष्पमालां निजकंठे स्थापयित्वा यूयं व्रजत? यदि सा म्लानिं प्राप्नुयात्तदा त्वया मम शीलभंगो ज्ञातव्यो नो चेदहमखंडितशीला ज्ञातव्या. अथ तां मालां कंठे निधाय स नृपेण सह प्रस्थितः, क्रमेण च ससैन्यो नृपो वृक्षादिरहितायां महाटव्यां प्राप्तः, अथाजितसेनकंठे तामम्लानां पुष्पमालां दृष्ट्वा नृपेण पृष्टं. हे मंत्रिन्नस्यामटव्यां पुष्पफलादिरहितायां कुत इयमम्लाना पुष्पमाला त्वया लब्धा? तदाजितसेनेन स्वकीयसकलोदंतपूर्वकं निजललनाया अखंडितशीलत्वयुक्तं महासतीत्वं प्रकटीकृतं. तत् श्रुत्वा विस्मितेन राज्ञा तत्परीक्षार्थं प्रच्छन्नवृत्त्या कामांकुरललितांगरतिकेल्यशोकाभिधानाश्चत्वारो विट्पुरुषाः सकलवृत्तांतकथनपुरस्सरं शीलवत्या पार्श्वे मुक्ताः, तेऽपि तस्याः शीलखंडनकृते प्रतिज्ञां कृत्वा ततश्चलिताः, नगरमध्ये समागत्य तैः शीलवत्या गृहनिकटे गृहमेकं गृहीत्वा निवासः कृतः, तत्र ते कामोन्मादजनकान्नृत्यगायनादिहावभावान् कुर्वंति, तत् श्रुत्वापि शीलवती बधिरेव तानुपेक्षते.

⊠ अथैकदा कामांकुरेण भोगादिप्रार्थनार्थं शीलवतीपार्श्वे दूती मुक्ता, तया तत्र गत्वा शीलवत्यै तद्वार्ता कथिता, शीलवत्या तु सा निर्भर्त्स्य गृहान्निष्कासिता. एवं शेषत्रयेणापि पृथक्पृथक् तथैव कृतं, परं शीलवती न चलिता. अथ शीलवत्या चिंतितं नूनं सा पुष्पमाला राज्ञा दृष्टास्ति, तेन चेर्ष्यया मम शीलभंगायैते पुरुषाः

प्रेषिताः संति. ततोऽथ मया निजचातुर्येण स्वशीलरक्षणपूर्वकं तेभ्योऽपि तेषां दुःशीलत्वफलं प्रदर्शनीयमिति विचिंत्य यदा सा दूती पुनरपि तैः प्रेरिता तस्याः समीपे समागता तदा शीलवत्योक्तमेतत्कार्यं द्रव्यं विना न भवेदतस्तैः प्रत्येकैरेकैकलक्षदीनारानयनपूर्वकं रात्रौ मम गृहे क्रमेणैकद्वित्रिचतुःप्रहरेषु समागंतव्यं. परं तेषु परस्परं केनापि कस्यचिदप्येषा वार्ता नैव प्रकाशनीया. इत्यादिष्टा दूती द्रुतं तत्रागत्य तेभ्यः पृथक्पृथक् तद्वृत्तांतं कथयामास, तत् श्रुत्वा तेऽपि हृष्टा रात्रिं प्रतीक्षमाणाः दूतीवचनतः परस्परमजल्पंतः स्थिताः, इतः शीलवत्या गृहे पूर्वं वर्षाजल-संग्रहार्थं निर्मापितैका जलरहिता कूपिका कपाटरहिता कृता. तस्योपरि च युक्त्या कपटशय्या कृता.

☒ अथ प्रथमप्रहरे कामांकुरितदुर्बुद्धियुतः कामांकुरो लक्षैकदीनारसहितस्तत्रागतः, शीलवतीकृतसत्कारतः स्वात्मानं धन्यं मन्यमानो यावत् स शय्योपरि निषीदति तावदेव भग्नांगोपांगः कूपिकांतः पतितः, एवं ते त्रयोऽपि सुहृदः क्रमेण परस्परविरहदुःखं सोढुमशक्नुवंत इव मिलित्वैव कूपिकांतः स्थिताः. अथ सा तेषां सर्वदा स्वल्पमेव धान्यं दवरकबद्धमृत्पात्रे निक्षिप्य ददाति. अथ कतिचिद्दिवसानंतरं राजा सर्वान् वैरिणो जित्वाऽजितः सेनसहितो निजनगरे समायातः, तेषां चतुःपुरुषाणां शुद्धिं च कृतवान्. परं केनापि तत्प्रवृत्तिर्न कथिता. अथ शीलवत्याऽजितसेनाय सर्वोऽप्युदंतः कथितो दर्शितं च तच्चतुर्लक्षमित धनं. अथ नारकवद्दुःखमनुभवंतस्ते चत्वारः पुरुषा अजितसेनं प्रति कथयामासुर्हे सत्पुरुष त्वमस्मान्निष्कासय ? शीलवत्योक्तं यदि मदुक्तं करिष्यथ तर्हि युष्मानहं निष्कासयिष्यामि, तैरपि तदंगीकृतं.

☒ अथ शीलवत्या विविधपक्वान्नानि निष्पाद्य तेषां करंडका भृताः, रक्षिताश्च प्रच्छन्नं भूमिगृहे. ततशीलवत्याः कथनतोऽजितसेनेन राजा भोजनायाहूतः, नृपोऽपि तत्रागत्य कामपि भोजनसामग्रीमदृष्ट्वा विस्मयं प्राप्तः, इतः शीलवत्या राज्ञोऽग्रे स्वर्णस्थालिका मुक्ताः, पश्चात्तयोक्तं भो यक्षाः पक्वान्नानि समानयत? तत्कालमेव तैश्चतुर्भिः पक्वान्नभृतवंशभाजनानि भूमिगृहत ऊर्ध्वीकृतानि. तस्मात्पक्वान्नानि समादाय तया राज्ञे परिवेषितानि. अथ तद्वीक्ष्य विस्मयमापन्नो राजा चिंतयति नूनमस्या गृहे देवाः पक्वान्नादि पूरयंति. भोजनानंतरं राज्ञा तद्गृहमजितसेनान्मार्गितं. शीलवत्योक्तं हे राजन् तान् यक्षानेवाहं भवद्भ्यः समर्पयिष्यामि. ततस्तया करंडकेषु निक्षिप्तास्ते चत्वारोऽपि पुरुषा नृपाय समर्पिताः, राजापि करंडकस्थांस्तान् रथे संस्थाप्य निजगृहे समायातः. अथ तेन तेभ्यो यक्षेभ्यः पक्वान्नादिप्राप्त्याशया रसवतीकृते सूदा निषिद्धाः, भोजनसमये राज्ञा करंडकस्थेभ्यः पक्वान्नादि मार्गितं, तदा तेभ्यो दीनस्वरो निर्गतो यद्वयं कुतो दद्मः? एवं तेभ्यो मनुष्यकृतं दीनस्वरं श्रुत्वा विस्मितेन राज्ञा ते करंडकाः समुद्घाटितास्तदा तेभ्यो विकरालरूपा दुर्बलशरीरिणः परिहितजीर्णवस्त्रप्रायाः प्रेता इव ते कामांकुराद्याः प्रकटीभूताः, राज्ञा पृष्टास्ते सर्वमप्युदंतमुक्त्वा शीलवत्याः प्रशंसां चक्रुः, तत् श्रुत्वा राजा शीलवतीमाकार्य निजापराधं क्षामयामास. इतस्तत्र ज्ञानिगुरवः समागताः, राजादयः सर्वेऽपि तस्मै वंदितुं गताः, देशनांते राज्ञा गुरुभ्य. पृष्टं हे भगवन् केन गुणेन धर्मेण वा शीलवती बुद्धिनिपुणा जाता? ज्ञानिनोक्तं पूर्वभवे कुशलपुरे कश्चिदेको दरिद्री बभूव, तस्य दुर्गिलाख्या भार्या, एकदा तया महासाध्व्यै पृष्टं हे भगवति

वयमाजन्म दरिद्रिणः स्मः, ततोऽस्मान् दुःखात्समुद्धर? साध्व्योक्तं महानुभावे पुण्यं कुरु? परपुरुषनिषेधं गृहाण? पुनः पंचमीतपश्च कुरु? दुर्गिलया तत्सर्वमप्यंगीकृतं. ततस्तौ दंपती शुद्धश्राद्धधर्मं पालयित्वा सौधर्मे देवलोके देवौ जातौ, ततश्च्युत्वा तस्या भर्तृजीवोऽयमजितसेनो जातः, सा चेयं शीलवती जाता, पंचमीतपःप्रभावतस्तस्या निर्मला बुद्धिरभवत्, पूर्वभवाभ्यासेन तया निर्मलं शीलं पालितं, तत् श्रुत्वा ताभ्यां द्वाभ्यामपि जातिस्मरणं प्राप्य वैराग्यतो दीक्षा गृहीता, शुद्धचारित्रं प्रपाल्य पंचमे देवलोके तौ देवौ जातौ, ततश्च्युत्वा मनुष्यत्वमासाद्य तौ मोक्षं गमिष्यतः.

॥ इति शीलकुलके शीलवती कथा ॥

मूलम्—सिरिवद्धमाणपहुणा । सुधम्मलाभुत्ति जीए पठविऊ ॥
सा जयऊ जए सुलसा । सारयससिविमलसीलगुणा ॥ ११ ॥

व्याख्या— श्रीवर्धमानप्रभुणा धर्मलाभ इति यस्याः प्रति श्रावकांबड़ेन सार्धं कथापितः, सा सुलसा जगति जयतु, सा कीदृशी? शरत्कालस्य यः शशी चंद्रस्तद्वन्निर्मला शीलादिगुणा यस्याः ॥ ११ ॥

तस्याः कथा चेत्थं—

राजगृहनगरे श्रेणिकाभिधो राजास्ति, तत्रैको नागनामा क्षत्रियो वसति, स महाशूरो जिनधर्म-

मर्मज्ञश्चासीत्. तस्य शीलादिगुणगणोपेता सुलसाभिधा भार्या बभूव. सा संतानरहितत्वात् सर्वदा स्वचित्ते खेदमवहत्. अथैकदा तां खिन्नां विज्ञाय भर्त्रा कथितं हे प्रिये! त्वया कश्चिद्देव आराध्यः, सुलसयोक्तं हे स्वामिन् मिथ्यात्विदेवाराधनेन श्रेयोऽभिलाषा निष्फलैव, अतोऽहं श्रीवीतरागगुरुपूजनपूर्वकं शुद्धसम्यक्त्वमाराधयिष्यामीत्युक्त्वा सा श्रीजिनधर्मसमाराधनैकव्यापारा जाता. इतः सौधर्मेंद्रेण निजसभायां सम्यक्त्वाराधने सुलसायाः प्रशंसा कृता, तदसहमानः कश्चिन्मिथ्यात्विदेवो ग्लानसाधो रूपं विधाय सुलसागृहे समागतः, सुलसया वंदित्वागमनकारणं पृष्टेन तेनोक्तं तव गृहे लक्षपाकतैलं वर्तते तन्मे रोगापनयनकृते देहि? तत् श्रुत्वा स्वं धन्यं मन्यमाना सुलसा तत्तैलकुंपिकामपवरकादानयामास. इतः सा कुंपिका देवकृतमायातः पतित्वा भग्ना, एवं कुंपिकात्रयं भग्नं तैलं सर्वं च नष्टं, तथापि तस्या मनसि तद्धानितो मनागपि खेदो न बभूव, प्रत्युत तया चिंतितं ममाभाग्यवशादेतत्साधोरुपयोगे नायातं. देवेन ज्ञानबलात्तच्चित्तं निश्चलं विज्ञाय प्रकटीभूय तत्तैलभाजनानि सज्जीकृत्य तैलसंभृतानि कृतानि, तस्या मस्तकोपरि च पुष्पवृष्टिः कृता, ततस्तेन सौधर्मेंद्रकृततत्प्रशंसादिसर्ववृत्तांतं कथयित्वा स्वापराधं च क्षामयित्वोक्तं हे सुलसे त्वं वरं मार्गय? तदा सुलसया संततिर्मार्गिता, तुष्टेन देवेन तस्यै द्वात्रिंशद्गुटिका प्रदत्ताः, कथितं च पुनरपि कार्यावसरे मम स्मरणं कर्तव्यमित्युक्त्वा सोऽदृश्यीभूतः, अथ सुलसया विचारितं द्वात्रिंशत्पुत्रोत्पत्तितः सामायिकादिधर्मक्रियाया अंतरायो भविष्यतीति विचार्य द्वात्रिंशल्लक्षणोपेतैकस्यैव पुत्रस्याशंसया तया सर्वा अपि गुटिकाश्चूर्णीकृत्य भक्षिताः.

☒ अथ समकालमेव द्वात्रिंशत्पुत्रगर्भोत्पत्तितः पीड्यमानया तया स देवः संस्मृतस्तदा देवेन तत्पीडोपशमनकरणपूर्वकं कथितं हे सुलसे त्वयैतत्समीचीनं न कृतं, एकनालोत्पत्तितस्ते सर्वेऽपि स्वल्पायुष्का भविष्यंतीत्युक्त्वा देवः स्वस्थानं गतः, अथानुक्रमेण तया द्वात्रिंशत्पुत्राः प्रसूता यौवनं च प्राप्यातिबलवंतः संतस्ते श्रेणीकनृपसेवां कुर्वंति. दैवयोगेन चिल्लणापहरणसमये ते सर्वेऽपि पंचत्वं प्राप्ताः, सुलसा तु गतशोकैव धर्मं करोति.

☒ अथैकदा श्रीवीरप्रभुश्चंपायां समवसृतस्तत्रांबड़परिव्राजकेन वंदनपूर्वकं प्रभोर्देशनां श्रुत्वोक्तं स्वामिन्नहं राजगृहनगरे व्रजामि. प्रभुणोक्तं तत्र सुलसाश्राविकायै मे धर्मलाभः कथनीयः, तथेति प्रतिपद्यांबरमार्गेण गच्छतांबड़ेन चिंतितं राजगृहे तु बहवः श्रावकाः संति, परं भगवता सुलसाधर्मलाभकथनान्नूनं तस्यां कश्चिद्विशेषः संभवति. अतस्तस्या मया परीक्षा कर्तव्येति विचार्य तेन राजगृहोद्याने समागत्य दिनत्रयावधि प्रतिदिनमाडंबरयुतं क्रमेण ब्रह्माविष्णुमहेश्वररुपं प्रकटीकृते, बहवो नगरलोकास्तं वंदनार्थमागताः, परं सख्यादिभिर्बहु प्रेर्यमाणापि सुलसा तं मायाविनं निश्चित्य निजसम्यक्त्वभंगभयात्तत्र न गता. चतुर्थे दिने निजलब्धिशक्तितः समवसरणरचनपूर्वकं तेन तीर्थंकररुपं प्रकटीकृतं, तथापि निश्चलमानसा सुलसा नागता. ततोंबड़ः स्वकीयमूलरुपं प्रकटीकृत्य सुलसागृहे समागतस्तदा सुलसयाभ्युत्थानस्वागतप्रश्नादिपूर्वकं तस्यादरः कृतः, ततोंबड़ेन यदि भगवतोक्तो धर्मलाभस्तस्यै कथितस्तदा हर्षेण रोमोद्गमोत्फुल्लगात्रया तया श्रीवीराय नमस्कारः कृतः अथांबड़ः प्रोवाच हे सुश्राविके मया श्रुतं यदत्र नगराद्बहिर्ब्रह्मादिदेवाः समागता आसन् त्वया ते वंदिता न वा?

सुलसयोक्तं हे अंबड सम्यक्त्वी जीवः कथं रागादिदोषदूषितांस्तान् वंदते ? किं चैवंविधा इंद्रजालिका जगति बहवः संति, अहं कदाचिदपि मिथ्यात्विनां संगं न करोमि पुनरंबडेनोक्तमिह खलु पंचविंशतितमस्तीर्थंकरोऽपि किं समागतोऽभूत् ? सुलसयोक्तं हे अंबड त्वं शुद्धश्रावकीभूय कथमेवं मिथ्यावचनं श्रद्धसि ? तीर्थंकराश्चतुर्विंशतिरेव श्रीवीरेण कथिताः संति. इति तस्या दृढसम्यक्त्वं निश्चित्यांबडेन स्वकृततत्स्वरुपादिवृत्तांतनिरुपणपूर्वकं निजापराधः क्षामितो गतश्च तां मुहुर्मुहुः प्रणम्य स्वस्थानं प्रति. सुलसापि निरतिचारतया धर्ममाराध्यानशनं कृत्वा देवलोके गता. आगामिचतुर्विंशत्यां च तस्या जीवः पंचदशमो निर्ममनामा तीर्थंकरो भविष्यति. मोक्षं च गमिष्यति.

॥ इति शीलकुलके सुलसाकथा ॥

मूलम्—हरिहरबंभपुरंदर । मयभंजणपंचवाणबलदप्पो ॥
लीलाइ जेण दलिउ । स थूलिभद्दो दिसउ भद्दं ॥ १२ ॥

व्याख्या—स श्रीस्थूलभद्रस्वामी भद्रं कल्याणं दिशतु, येन भगवता हरिः कृष्णो हरो रूद्रो ब्रह्मा पुरंदरश्च, एतेषां यो मदो गर्वस्तस्य भंजने समर्थ एतादृशो यः पंचबाणः कंदर्पस्तस्य दर्पोऽहंकारो लीलया

हेलया दलितो मर्दितोऽर्थात्कंदर्पमदं हत्वा तेन शुद्धं शीलं पालितमिति भावः. ॥ १२ ॥



श्री स्थूलभद्रकथा चेत्थं—

☒ भरतक्षेत्रे पाटलीपुत्रनगरे नंदाभिधो राजा, शकडालाख्यश्च मंत्री, तस्य लक्ष्मीवत्यभिधाना भार्या, तस्याः कुक्षिदरीसमुद्भूतौ सिंहाविव वैरिगजविदारणक्षमौ स्थूलभद्रश्रीकाख्यपुत्रौ द्वावभूतां तयोर्मध्ये श्रीयको नंद नृपस्य सेवां करोति, स्थूलभद्रश्च पितुः प्रसादेन कोशावेश्यागृहस्थितः सुखानि भुनक्ति. इतश्चैको वररुचिनामा काव्यकलाकलापनिपुणः साहित्यसारोदधिपारंगतो द्विजस्तत्रागतः, स निरंतरमष्टोत्तरशतनवीनकाव्यानि भूपस्तुतिगर्भितानि कृत्वा नंदनृपं स्तौति, तदा नंदः शकड़ालाभिमुखं पश्यति, शकड़ालस्तु तस्य मिथ्यात्वभावेन प्रशंसां न करोति. एवं स्तुतिं कुर्वतोऽस्य ब्राह्मणस्य भूरिदिनानि गतानि, किंतु राजा तस्मै किंचिदपि दानं न ददाति. वररुचिना चिंतितं शकडालकृतप्रशंसां विना राजा दानं नैव दास्यतीति विचार्य स शकडालगृहे समागत्य तस्य भार्यां स्तोतुं लग्नः, एवं प्रतिदिनं कुर्वतो वररुचेरुपरि लक्ष्मीवती संतुष्टा, तदा तेनोक्तं हे मातर्यथा नृपसंसदि मे काव्यानां शकड़ालः प्रशंसां कुर्यात्तथा कुरु ? लक्ष्मीवत्या तत्प्रतिपद्य शकडालाय तद् ज्ञापितं.

☒ अथ द्वितीयदिने यदा वररुचिः संसदि नृपस्तुतिगर्भनवीनकाव्यानि पठित्वा विरमितस्तदा स्त्रीवचनप्रेरितेन शकडालेनोक्तं स्वामिन् काव्यानि त्वेतानि मनोहराणि संति. ततस्तुष्टेन राज्ञा वररुचयेऽष्टोत्तर-

शतदीनारदानं दत्तं, अथैवं तं प्रति प्रतिदिनं राजा दानं दातुं लग्नः.

☒ अथैकदा मंत्रिणा चिंतितमयं तु मिथ्यात्ववृद्धिर्मत्सकाशाज्जाता, अतः सा निवारणीया, इति विचार्य द्वितीयदिने तेन राज्ञे कथितं स्वामिन्निमानि काव्यानि तु जीर्णानि संति, यतो मम पुत्र्योऽप्येतानि जानंति. तद्विषयेऽहं प्रातर्भवतः प्रतीतिं कारयिष्यामि. अथ तस्य मंत्रिणो यक्षायक्षदिन्नादिसप्तपुत्र्यः संति, स्वप्रज्ञातिशयस्तासां क्रमेणैकद्वित्र्यादिसप्तवारावधि श्रवणानंतरं काव्यादि सुखमुखोच्चारं भवति. प्रभाते मंत्रिणा संकेतपूर्वकं ताः सप्तापि कन्या यवनिकांतरे सभायां स्थापिताः, अथ वररुचिरप्यागत्य स्वकीयनवीनस्तुतिभिर्नृपं तुष्टाव. तदनंतरं मंत्रिकृतसंकेततो यक्षादिभिः सप्तभिरपि कन्याभिस्तान्येव स्तुतिकाव्यानि पठितानि, ततो रुष्टेन राज्ञा तस्मै दानं निवारितं. अथ वररुचिर्विषण्णो गंगातटे गत्वा जलमध्ये एकं कपटयंत्रं कृत्वा लोकानां पुरो गंगास्तुतिं कृत्वा कथयति, हे मातर्गंगे यदि राजा दानं न ददाति तर्हि त्वं मे यच्छेत्युक्त्वा जलांतःस्थं यंत्रं पादेनाकर्षयति, ततस्तत्र पूर्वमुक्ता दीनारग्रंथिर्बहिरापतति. एवं प्रतिदिनमाश्चर्यप्राप्तानां लोकानां पुरः स करोति. नगरे सर्वत्र सा वार्ता प्रसिद्धा जाता. राजापि तद्वृत्तांतमाकर्ण्याश्चर्ययुतस्तद्दर्शनगंतुमना मंत्रिसन्मुखमैक्षत. मंत्रिणोक्तं स्वामिन् प्रभाते वयमपि तत्र गत्वा तदाश्चर्यं विलोकयिष्यामः, अथ रात्रौ मंत्रिणा तत्र नदीस्थाने निजमेकं गुप्तचरपुरुषं प्रेष्य वररुचिन्यस्ता दीनारग्रंथिरानायिता.

☒ अथ प्रभाते नृपयुतो मंत्री तत्र समागतः, सर्वनगरलोका अपि तदाश्चर्यं द्रष्टुं समागताः, वररुचिरपि

मंत्रियुतं राजानमागतं दृष्ट्वा महता स्वरेण गंगास्तुतिं पठमानो दीनारग्रंथिं पादप्रचारपूर्वकं मार्गयामास. परं तत्कपटपाटवतः कुपितेव गंगा तस्मै किमपि नार्पयति. शंकाकुलेन वररुचिना यंत्रे बहुशः पादप्रहारा दत्ताः परं तत्पादप्रहारतो विशेषतः क्रुद्धेव गंगाजलोच्छलनोद्भूतसीकरकणचपेटाभिस्तं ताडयामास. तदासौ विषण्णो न्यग्मुखीभूय स्थितः, इतः शकडालेन सा ग्रंथिर्निजकक्षातो निष्कास्य राज्ञोऽग्रे मुक्त्वा सकलोदंतपूर्वकं प्रकटितश्च तस्य कपटजालो लोकानां पुरः, अथात्यंतं कुपितो वररुचिः शकडालमंत्रिणश्छिद्राण्यन्वेषयामास. एकां मंत्रिगृहदासीं द्रव्यदानादिनावर्ज्य स सर्वदा मंत्रिगृहवार्तां पृच्छति.

☒ अथैकदा मंत्रिगृहे श्रीयकोद्वाहमहोत्सवः समारब्धः, तत्प्रसंगे नृपोपहारार्थं मंत्रिणा नवीनच्छत्रचामरासनशस्त्रादीनि स्वगृहे निष्पाद्यंते. दासीमुखात्तदुदंतं लब्ध्वा वररुचिना सुखभक्षिकादिभिर्बाला आवर्जिताः, पाठितं च तेषामिदं लोकभाषाकाव्यं—

मूढ लोक जाणे नहि । जं शकडाल करेसी ॥
नंदराय मारी करी । सिरियो राज ठवेसी ॥ १ ॥

☒ अथ ते बालका नगरमध्ये स्थाने स्थाने भ्रमंतस्तदेव काव्यं पठंति. राजापि तत् श्रुत्वा

शंकितो निजगुप्तपुरुषान् मंत्रिगृहचर्याविलोकनाय प्रेषयामास, तैरपि केनचिन्मिषेण मंत्रिगृहे समागत्य तत्सर्वसामग्री दृष्टा, कथितश्च तदुदंतो राज्ञे. तदा राज्ञा चिंतितं नूनं बालवाक्यं सत्यं दृश्यते. ततः प्रभाते यदा मंत्री सभायामागत्य नृपाय प्रणामं कृतवान् तदा नृपः पराङ्मुखीभूय तस्यानादरं कृतवान्. द्रुतमेव मंत्रिणा गृहमागत्य श्रीयकमाहूय कथितं हे वत्स, केनापि दुर्जनेन प्रेरितो नृपोऽद्य ममोपरि क्रुद्धोऽस्ति ततश्च यावत्सकलकुलविनाशकालो न समापतेत्तावता कुलरक्षणप्रयत्नो विधेयः, अथाहं प्रभाते मुखमध्ये तालपुटविषं धृत्वा नृपंप्रति नमिष्यामि. तदा त्वया करवालेन मम शिरश्छेदः कर्तव्यः, महता कष्टेन कथमपि तत्कार्यकरणाय तं प्रतिबोध्य मंत्री प्रभाते सभायामागत्य नृपाय प्रणामं कृतवान्. परं राजा पराङ्मुखो जातस्तदैव श्रीयकेन करालकरवालतो मंत्रिशिरश्छेदः कृतः, हा हेति कथयता राज्ञा श्रीयकः पृष्टो हे वत्स किमेतत्त्वया कृतं? श्रीयकेनोक्तं स्वामिन् यो भवतोऽपमानपात्रं जातस्तेन पित्रापि किं प्रयोजनं? यतो येन कर्णस्त्रुट्यते तत्सुवर्णमपि निरुपयोग्येव. तत् श्रुत्वा संतुष्टो राजा तस्मै मंत्रिमुद्रां दातुं लग्नः, श्रीयकेनोक्तं हे स्वामिन् मम वृद्धभ्राता स्थूलभद्रो वेश्यागृहे वसति, तत्रस्थेन तेन सूर्योदयास्तमप्यजानता द्वादशसुवर्णकोटिर्विलसितास्ति. तमाहूयेयं मुद्रा दातव्या. राजा तमाहूय शकडालमरणकथनपूर्वकं तस्मै मंत्रिमुद्रिकां दातुं प्रवृत्तस्तदा स्थूलभद्रेणोक्तमहं विमृश्योत्तरं दास्यामि. राज्ञोक्तमस्यामशोकवाटिकायां गत्वा विमृश्य द्रुतं समागच्छ? इत्युक्तः स्थूलभद्रोऽशोकवाटिकायां गत्वा विचारयति, अहो धिक्संसारं यया मंत्रिमुद्रया जनकाय मरणं दत्त, तया मे किं श्रेयो भविष्यति? अयं संसारः केवलं

स्वार्थव्याकुल एव, न कोऽपि कस्यापि वल्लभोऽस्तीति विचार्य तेन " करेमि भंते " इत्यादिपाठः समुच्चरित-स्तदैव शासनदेवतया तस्मै संसारांभोनिधिपारप्रापणार्थं पोत इव साधुवेषो दत्तः, सांसारिकवेषं शरीरविलग्नं भुजंगमिव परित्यज्य तेन स वेषः स्वीकृतः, अथ साधुवेषयुतोऽसौ चपलं नृपसभायामागत्य धर्मलाभाशिषं दत्तवान्. राज्ञोक्तं किमिदं त्वया कृतं, तेनोक्तं राजन् मयैतदेवालोचितमित्युक्त्वा स्थुलभद्रस्ततो मुक्तनिर्मोको नाग इव निर्गतः, राज्ञा तद्गमनमार्गविलोकनाय तत्पृष्टे निजसेवका मुक्ताः, स्थूलभद्रस्तु चांडालपाटकमिव वेश्या-पाटकं दूरतो मुक्त्वा श्रीसंभूतिविजयसमीपे समागत्य दीक्षां गृहीतवान्. सेवकमुखाद्राज्ञा तं तथाभूतं विज्ञाय श्री-यकाय मंत्रिमुद्रा प्रदत्ता.

☒ अथ स्थूलभद्रं दीक्षितं विज्ञाय विरहातुरा कोशा श्रीयकपार्श्वे समागत्य रुदनं चकार. श्रीयकेनो-क्तमेतत्सर्वमपि विपरीतकार्यं वररुचिना कृतमस्तीत्युक्त्वा तेन सर्वोऽपि वृत्तांतस्तस्यै कथितस्तदा कोशापि वररुचे-रुपरि भृशं कोपातुरा जाता. श्रीयकेनोक्तं त्वद्भगिन्योपकोशया सह वररुचेः संबंधोऽस्ति, ततस्तां कथयित्वा स कथंचिदपि मदिरापानासक्तः कार्यस्ततोऽहं येन केनाप्युपायेनैतद्वैरनिष्क्रियां करिष्यामि, कोशयापि तदंगीकृत्य त-थैव कारितं.

☒ अथ वररुचिर्निर्भयः सन् सर्वदा नृपसभायां समायाति, काव्यैश्च नृपं प्रसन्नीकृत्य द्रव्यं गृह्णाति.

अथैकदा निर्जनमवसरं प्राप्य श्रीयकेन राज्ञो विज्ञप्तिः कृता, स्वामिन् संप्रति भांडागारे द्रव्यं स्तोकमस्ति. राज्ञा शकडालं स्मृत्वा कथितं तस्मिन् सुमंत्रिणि सति मम भांडागारे कदापि द्रव्यन्यूनता नाभूत्. श्रीयकेनोक्तं स्वामिन्ननेन मद्यपेन वररुचिना तदा बालानां मृषाकाव्यमध्याप्य भवन्मनो विप्रतारितं. राज्ञोक्तं किमयं मद्यपानं करोति? श्रीयकेनोक्तं प्रभातेऽहं भवतां तत्प्रतीतिं कारयिष्यामि.

⊠ अथ श्रीयकेन गृहे समागत्य मालिनमाहूयोक्तं प्रभाते राजसभायां सर्वेभ्यस्त्वयैकैकं कमलं देयं, तदा वररुचेर्हस्ते त्वया मदनफलरसभावितं कमलं देयमित्याग्रहपूर्वकमुक्त्वा स विसर्जितः.

⊠ अथ प्रभाते राज्ञः सभा मिलिता, तदा वररुचिरपि निजव्यसनतो नित्यनियमानुसारेण कृतमदिरापान एव सभायामागतः, संकेतानुसारेण मालिना सभास्थसर्वजनेभ्य एकैकं कमलं दत्तं, वररुचयेऽपि तीव्रमदनरसभावितं कमलं दत्तं. स्वभावेनैव सर्वेऽपि निजनिजपुष्पाण्याघ्रातुं लग्नास्तदा वररुचिरपि यावत्तत्पुष्पमाघ्राति तावत्तन्मदनरसगंधस्वभावतस्तस्य वमनं जातं, वमननिर्गतमदिरामिषतस्तस्यांतःकरणमालिन्यं सभायां प्रकटीभूतं, वमितमदीरोद्भूतदुर्गंधात्तत्प्रकटीभूतदौर्जन्यादिव राजादिसभागतसकलजना व्याकुलतां नाट्यामासुः, राज्ञोत्थाय प्रोक्तमरे एनं मालिन्यमालाकलितं दुष्टमद्यपं नगराद्बहिर्निष्कास्य काननगोचरीक्रियतां? तत् श्रुत्वा लज्जावनतकंधरः सकलसभाजनैर्हास्यास्पदं प्राप्यमाणः प्राहारिकैर्यष्टिमुष्ट्यादिभिस्ताड्यमानः स सभाया निर्गत्य नगरबहिर्गतः, अथ सा वार्ता

मरुद्दारुढेव ग्रामे ग्रामे नगरे नगरे च विस्तृता, सर्वैर्द्विजैर्मिलित्वा स ज्ञातिर्बहिष्कृतः, ततोऽसौ त्रपया पंडितादिष्टकृततत्त्रपुपानो मृतः. अथ श्रीयको निष्कंटकः सन् पितृवैरनिष्क्रियात आनंदितमानसः सुखेन मंत्रिपदं भुनक्ति.

☒ इतः श्रीस्थूलभद्रमुनिर्गुरुसमीपे एकादशांगान्यधीतवान् जातश्च गीतार्थः, अथासन्ने चातुर्मासके शिष्यैर्विविधाभिग्रहा गुरुपार्श्वे गृहीताः, एकेनोक्तमहं चातुर्मासोपवासयुतः सिंहगुहाद्वारे कायोत्सर्गोपेतः स्थास्यामि, द्वितीयेनोक्तमहं दृष्टिविषसर्पबिले कायोत्सर्गस्थश्चतुर्मासावधि स्थास्यामि. तृतीयेनोक्तमहं कूपार्धप्रदेशकाष्टे कायोत्सर्गपूर्वकं चातुर्मासं स्थास्यामि. एवमन्यैरपि शिष्यैर्विविधाः सुकरा निजशक्त्यनुसारेणाभिग्रहा गृहीताः स्थूलभद्रेण विज्ञप्तं स्वामिन्नहं षड्रसाहारभोजनयुतो ब्रह्मचारित्वेन कोशावेश्यागृहे तस्याश्चित्रशालायां चातुर्मासं करिष्ये, गुरुणा निजज्ञानबलेन तेषां सर्वेषां तत्तत्करणे योग्यतां विज्ञायादेशा दत्ताः, अथ ते त्रयोऽपि शिष्या निजनिजस्थाने गताः, स्थूलभद्रमुनिरपि कोशावेश्यागृहे समायातः, कोशा तं वीक्ष्य हृष्टा सती चिंतयामास नूनमेष कोमलकमलसुकुमालः खड्गधारातीव्रं चारित्रं पालयितुमशक्नुवन् मम भाग्यद्वरकाकृष्ट इवात्र समायातोऽस्तीति विचिंत्य सा सहसाभ्युत्थाय सन्मुखमागत्य हृदयगतस्नेहोद्गारान्निष्कासयंतीव स्वागतं स्वामिन्नित्यादिविविधस्नेहालापानुचरंती नानाप्रकारान् हावभावान् कुर्वंती जगाद, हे स्वामिन् मम दास्या आज्ञामादिशध्वं? स्थूलभद्रेणोक्तं हे कोशे चतुर्मासावधिस्थितिकृते तत्र चित्रशालां समर्पय? वेश्ययोक्तं स्वामिन्नहमपि त्वदीयैवास्मि तर्हि चित्रशालाया मार्गणे प्रश्नः कः!

स्वामिन् सुखेनैव मम हृदये इव चित्रशालायां निवासं कुरुत ? अथ दमितमदनविकारः स्थूलभद्रो महामुनिर्वेश्यार्पितचित्रशालायां धर्मध्यानपरः स्थितः, ततो हृष्टया कोशया षड्रसोपेतानेकप्रकाररसवतीं निष्पाद्य स भोजितः, भोजनानंतरं सकलशृंगारभासुरा पादारुणनखांशुनिकरैर्मदनार्कोदयं दर्शयंती निजोरुणा मदनगंधगजेंद्रबंधनकृते स्वर्णस्तंभविभ्रमं प्रकटयंती मुष्टिग्राह्यकटीतटेन मृगेंद्रकटीगर्वमपि खर्वयंती निजपीनतुंगकठिनोरुस्तनयुगलदंभेन यूनां मदनोदधिपारप्रयाणार्थं कुंभौ दर्शयंती स्वकीयवदनेंदूदयतो विरहाकुलपुंसां चित्तचकोरानमंदानंदसंदोहं प्रापयंती नूपुरझणत्कारैः पुरुषहृदयसुप्तमदनं गतनिद्रं कुर्वंती कर्णांताकृष्टभ्रूचापोन्मुक्तकटाक्षशरपंक्तिभिर्मदनांधपुरुषहृदयानि विदारयंती विविधविलासोपेतहावभावान् दर्शयंती सा कोशाभिधवेश्या श्रीस्थूलभद्रमुनिसमीपे चित्रशालायां समागता. तत्र तया नूपुरकिंकिणीनादानुयायि तिरस्कृतभरतनाट्याचार्यनृत्यकलाडंबरं लज्जीकृताप्सरोगणकलकलाकलापं नृत्यमकारि.

☒ एवंविधनृत्यकलाहावभावादिभिरपि तमक्षुब्धं ज्ञात्वा सा निजवचनचातुरीं दर्शयामास. हे स्वामिन् पूर्वमावाभ्यां यथा विविधविलासोपयुक्ता भोगा भुक्ताः संति, तथैवाधुनापि त्वं निशंको मया सह भोगान् भुंक्ष्व ? किमनेन यौवनवयोविडंबननिभेन चारित्रेण ? यौवनवयोवृक्षफलास्वादनयोग्योऽयं वर्षाकालः किं त्वयैवं विडंबनमात्रेण वृथैव निर्गम्यते ? चिरकालवियोगानलविधुरां मां भवत्कमलामलकोमलांगालिंगनामृतसंचयसिंचनेनोपशांतां कुरु ? तस्या इत्यादिवचनविलासशरनिकरैरपि स्वीकृतचारित्राभेद्यसन्नाहो महामुनिस्थूलभद्रो मनसापि मनाग्भेदभावं न प्राप्तः, एवं तया सर्वदा विविधहावभावपरिमंडितवाग्विलासादिटंकनैर्मुनिमनो भेत्तुं प्रयत्नः कृतः, परं

श्रीस्थूलभद्रमहामुनिहृदयं वज्रनिर्मितमिव मनागपि नो भिन्नं.

☒ अथ स्वकीयोपांगेक्षणप्रचंडानिलैरपि सुमेरुमिव तं निश्चलं विज्ञाय मस्तकन्यस्तांजलिः कोशावेश्या निजापराधमेवं क्षामयामास, हे महामुने मोहदशावशंगतया मया भवतः क्षोभाय योऽपराधः कृतः स मयि कृपापरैर्भवद्भिः क्षमाविषयीकार्यः. इति श्रुत्वा स्थूलभद्रमुनिनोक्तं हे कोशे संसारबिलोद्भवा एते विषयदृग्विषभुजंगमा निजविषानलज्वलज्ज्वालाभिः प्राणिनां चैतन्यधनं क्षणादेव भस्मीकरोति. अतस्त्वमपि निजचैतन्यधनरक्षणकृते त्रिविधोपदेशमणिमंत्रधारामंडितं जिनोपदिष्टधनागमामृतनिकुरंबं स्वीकुरु? ततः प्रबुद्धया तया श्राविकात्वमंगीकृतं.

☒ अथ वर्षाकाले व्यतीते सति पंचाननगहनगुहानिवास्यादयस्ते त्रयोऽपि वाचंयमा अखंडिताभिग्रहा गुरुसमीपमुपाययुस्तदा गुरुभिः स्वासनात्किंचिदुत्थाय सन्मानपूर्वकं तेभ्यः प्रोक्तमहो भवद्भिर्दुष्करं कार्यं कृतं. शिष्या अपि गुरून्नमस्कृत्य स्वासनान्यलंचक्रुः. इतो महात्मा स्थूलभद्रोऽपि निजपवित्रपादन्यासैरुपाश्रयभूमिमलंचकार. तद्दर्शनमात्रत एव तदखंडब्रह्मचर्यमाहात्म्यदवरकाकृष्ट इव गुरवोऽपि ससंभ्रममासनादुत्थायोपाश्रयद्वारागतं स्थूलभद्रमहामुनिममंदानंदोद्गारसन्निभैः स्वागतादिवचनामृतरसैर्महादरेण ब्रह्मचारिशिरोमणित्वराज्याभिषेकं कुर्वाणा इव स्नपयामासुः, हे दुष्करदुष्करदुष्करकारकेतिपदत्रयीमुच्चरंतस्तस्यानिर्वचनीयब्रह्मचर्यपटहोद्घोषणां कुर्वंत इव सन्मानयामासुश्च. स्थूलभद्रोऽपि चिरदृष्टगुरुचरणारविंदयो रोलंबायितशिरा नमस्कारं कृतवान्. ततोऽयं निखिलब्रह्मचारिराज-

हंसोपमः स्थूलभद्रवाचंयमो निजासनकमलमलंचकार.

☒ अथ स्थूलभद्रंप्रति गुरुदत्तबहुसन्मानादि विलोक्येर्ष्यानलप्लुष्टहृदयास्ते त्रयोऽपि मुनयो घनागम वचनामृतरसैः सिच्यमाना अप्युपशांतभावं न प्राप्ताः, विचारितं च तैर्गुरवोऽपि नूनं मोहोद्भटसुभटप्रेर्यमाणा मंत्रिपुत्रत्वेन तस्मै बहुसन्मानादि चक्रुः, मोहपटलावृतलोचनैर्गुरुभिः किल षड्रसाहारोपेतचिरपरिचित वेश्यागृहस्थितिः प्रत्यक्षदूषणात्मकापि यदुत्तमोत्तमगुणगणोपेता दृष्टा तन्नूनं तेषां पक्षपातमेव सूचयति.

☒ अथ चेत् षड्रसाहारपूर्वकवेश्यागृहस्थितितो दुष्करदुष्करदुष्करकारकेति त्रिपदात्मका पदवी लभ्यते तर्हि वयमप्यागामिचतुर्मास्यां तस्या एव कोशाया गृहे स्थितिं करिष्यामोऽधिगमिष्यामश्च तां महापदवीं गुरुभ्य इति निश्चित्य ते त्रयोऽपि निजहृदयगतेर्ष्यानलं मौनभस्मनाच्छाद्य चतुर्मासक्षणं प्रतीक्षमाणाः स्थिताः, क्रमेण तन्मनोऽभिलाषरज्ज्वाकृष्टेव चतुर्मास्यपि निकटं संप्राप्ता, तदा तेषां त्रयाणां मध्यादेकेन गतचतुर्मास्यां सिंहगुहानिवासिसाधुना पूर्वकृताभ्यासवशात्स्वं वेश्यामृगींप्रति सिंहमिव मन्यमानेन नतिपूर्वकं गुरवो विज्ञप्ताः, हे भगवन्नहमप्यस्यां चतुर्मास्यां निर्विकारः कोशावेश्यागृहे स्थितिं करिष्यामि. तत् श्रुत्वा गुरुणा चिंतितं नूनमेष स्थूलभद्रमहात्मन ईर्ष्ययैव प्रेर्यमाणो तत्र गमनोत्सुको जातोऽस्ति. तत्र गतश्चासौ कोमलकदलीस्तंभ इव वेश्यावशाकंपितो मूलगुणोन्मूलितो ध्रुवं विशरारुतां गमिष्यतीति ज्ञानोपयोगतो गुरुणा निश्चित्योक्तं हे महानु-

भाव ! एतदभिग्रहापारपारावारपारं प्राप्तु ते सामर्थ्यं मे मानसे नानुमीयते. अतस्त्वमन्यमेवाभिग्रहं गृहाण ? अथैवं गुरूक्तवचनप्रदीपं हृदयोद्भूतेर्ष्यानिलेन विधाप्य मानतिमिरावृतलोचनोऽसौ वाचंयमः स्वच्छंदतया त्वरितचरणैः संचरन् कोशावेश्यागृहावटेऽपतत्. कोशाप्यनुमानतस्तं स्थूलभद्रेर्ष्ययागतं विज्ञाय सन्मानपूर्वकं तस्य निवासकृते निजचित्रशालामर्पयामास. षड्रसभोजनास्वादानंतरं कोशापि तंप्रति पूर्वोक्तविधिना नृत्यादिहावभाववचनविलासादींश्चकार. क्रमेण च निशितकटाक्षेपुप्रहारैस्तस्य चरणकरणात्मकलोहभित्तिमपि विदार्य महासुभटीव सा वेश्या तन्मनोमहादुर्गे प्रविश्य तस्य मूलोत्तरगुणद्रविणसंचयविनाशकृत्कामाग्निं प्रदीपयामास.

☒ तदैव कामज्वरपीडितोऽसौ त्रिदोषतां प्राप्त इव निजामूल्यरत्नत्रयविक्रयेणापि निजतापोपशांतये तस्या अधरामृतपानं मार्गयितु त्रिविधप्रार्थनादुर्ललितानि वचनानि जजल्प. तदा तत्प्रतिबोधनैकधिया वेश्ययोक्तं हे साधो घनधनंविनाऽस्मद्भोगामृतास्वादो न लभ्यतेऽतो तदानय ? मुनिनोक्तं मम पार्श्वे किमपि धनं नास्ति. तयोक्तं हे साधो यदि तव मया सार्धं भोगकरणेच्छा भवेत्तर्हि त्वं द्रुतं नेपालदेशे व्रज ? तद्देशाधिपतिर्विदेशागतसाधवे रापादलक्षदीनारमौल्यं रत्नकंबलैकं ददाति, तद्गृहीत्वा त्वमत्रागत्य मे च तत्समर्प्य सुखेन मया सह भोगान् भुंक्ष्व ? तत् श्रुत्वा भोगाभिलाषानिलप्रेरित इव स साधुर्निजचारित्रमार्गं विस्मृत्य घनागममप्यवगणय्योत्पथेनापि गच्छन्नेपालदेशे संप्राप्त. तत्र राजानं मिलित्वा ततो रत्नकंबलं च गृहीत्वा पथि चौरभयेन तद्वंशांतर्निक्षिप्य चलित', मार्गे सत्यवचनतश्चौरविमुक्तोऽसौ रत्नकंबलयुतो वेश्यासमीपे समागतः, ततःतद्रत्नकंबलं वेश्यायै

समर्प्य तेन भोगप्रार्थना कृता, वेश्यया तु तत्कालमेव तस्मिन् मुनौ पश्यति सति तद्रत्नकंबलेन निजचरणप्रमार्जनं विधाय तद्दुर्गंधकर्दमोपेतनिजगृहखालविवरे प्रक्षिप्तं तद् दृष्ट्वा मुनिनोक्तं हे सुभगे मया महाकष्टेनानीतं महामूल्यमेतद्रत्नकंबलं कथं त्वया खालविवरे निक्षिप्तं ? वेश्ययोक्तं हे मुने त्वं किंचित्प्रयाससाध्यमेतद्रत्नकंबलं तु शोचसि, परं भवकोटिदुर्लभं तवैतच्चारित्ररत्नं मया गणिकामात्रयापि भोगाभिलाषधनैर्विनाश्यमानं कथं न शोचसि ? इति श्रुत्वा प्रबुद्धो मुनिः पुनर्वैराग्यमासाद्य वेश्यायै कथयामास, हे कोशे ! त्वयाहं संसारसागरे निमज्जन् सम्यक् तारितः अहमज्ञानवशात्स्थूलभद्रमहामुनेरीर्ष्ययात्र समागमं. परमथ पश्चात्तापं गतो विचारयामि यन्मेरुरिव महाचंडानिलविषयैरकंपितः क स्थूलभद्रो वाचंयमेशः, क चाहं तूल इवैषत्फुत्कारमात्रतोऽपि विशरारुतां गम्यमानः ? अथ तं मुनिं प्रतिबुद्धं विज्ञाय कोशापि तं प्रणम्योवाच हे मुने ! भवत्प्रतिबोधार्थं मया यत्किंचित्त्वांप्रति विरुद्धाचरणमाचरित तन्मयि कृपापरेण त्वया क्षंतव्यं. अथ स्वात्मानं निंदन् द्रुतं गुरुसमीपे समागत्य सर्वोदंतं निवेद्य निजापराधं च क्षमयित्वा स पुनरालोचनापूर्वकं शुद्धचारित्रं जग्राह.

☒ अथैकदा तुष्टेन नंदराज्ञा सा कोशा कस्मैचिद्रथिकाय समर्पिता, परं संप्रति परपुरुषभोगाभिलाषपराङ्मुखा कोशा तंप्रति सर्वदा स्थूलभद्रगुणगणान् वर्णयामास, तदसहमानेन तेन रथिकेन तस्यै निजकलाकलापप्रदर्शनार्थं गवाक्षस्थेन बाणानुबाणानुसंधानकलयाम्रगुच्छं समाकृष्य वेश्यायै समर्पितं. कोशयापि सर्षपभृतस्थालं पुष्पैराच्छाद्य तदंतर्गतसूच्युपरि नृत्यं विधाय स्वविज्ञानमपि तस्मै दर्शितं. तद् दृष्ट्वा तुष्टेन रथिनोक्तं हे सुभगे त्वया

दुष्करकार्यं कृतं. वेश्ययोक्तं हे रथिक त्वया मया च कृते द्वे अपि कार्ये दुष्करे न, किं तु स्थूलभद्रेण यत्कार्यं कृतमस्ति तद्दुष्करेभ्योऽपि दुष्करं ज्ञेयमित्युक्त्वा तया सर्वोऽपि स्थूलभद्रोदंतस्तस्मै निवेदितस्ततः प्रतिबुद्धेन तेन दीक्षा गृहीता. इतोऽथ द्वादशवार्षिको दुष्कालः पतितः, साधुसाध्वीभिश्च महाकष्टेन स निर्वाहितः, तदापत्तौ पठनपाठनाभावतः सिद्धांताः साधूनां मुखपाठतो विस्मृताः, दुष्कालानंतरं पाटलीपुत्रे सर्वसंघो मिलितः, तदा यो यः सिद्धांतभागो यस्य यस्य मुखपाठे मिलितस्तत्सर्वमेकीकृत्य महाप्रयासेनैकादशांगानि पूर्णीकृतानि.

☒ अथ तस्मिन् काले चतुर्दशपूर्ववेत्ता श्रीभद्रबाहुस्वामी नेपालदेशे विहृतवान्. तस्याकारणार्थं पाटलीपुत्रमिलितसंघेन पूर्वोद्धारकृते तत्र द्वौ मुनी प्रेषितौ, मुनिभ्यां तत्र गत्वा श्रीभद्रबाहुस्वामिने संघसंदेशो ज्ञापितः, तेनोक्तं संप्रति मया महाप्राणध्यानं समारब्धमस्त्यतस्तत्र मयाऽगंतुं न शक्यते. तदा तौ साधू पश्चात् पाटलीपुत्रे समागत्य तत्संदेशं श्रीसंघाय निवेदयांचक्रतुः, संघेन पुनर्द्वौ साधू तत्र प्रेष्य तस्मै संदेशितं च यः कश्चित्संघाज्ञां न मन्यते तस्य को दंडो देय इति. तद्वचनतात्पर्यं विचिंत्य श्रीभद्रबाहुना कथितं श्रीसंघो महां कृपापरो भूत्वात्र बुद्धिनिधीन् साधून् प्रेषयतु, तेभ्योऽहं पूर्ववाचनां दास्यामि, येन श्रीसंघकार्यसफलताविधानपूर्वकं ममापि ध्यानांतरायो न भवेत्. श्रीसंघेनापि तत्स्वीकृत्य स्थूलभद्राद्याः पंचशतबुद्धिनिधानमुनयस्तत्र प्रेषिताः, कियता कालेनैकं स्थूलभद्रमहात्मानंविनाऽन्ये सर्वेऽपि साधवः सिद्धांताध्ययनोद्विग्नमानसाः संतः पश्चाद्वलिताः, स्थूलभद्रेण तु तत्र स्थित्वा दशपूर्वाण्यधीतानि.

☒ अथैकदा गृहीतदीक्षा यक्षाद्याः स्थूलभद्रभगिन्यस्तत्र गुरुवंदनार्थं समागताः, भद्रबाहुस्वामिनं वंदित्वा तत्र च स्थूलभद्रमुनिमदृष्ट्वा ताभिर्विनयावनतमस्तकाभिः पृष्टं हे गुरवः स्थूलभद्रमुनिः क्वास्ति ? गुरुभिरुक्तं निकटदेवकुले स्वाध्यायपरः स्थितोऽस्ति. तत् श्रुत्वा ता महासत्यो निजभ्रातरं वंदितुं तन्निकटस्थलदेवकुलंप्रति गमनं चक्रुः, दूरतस्ताः समागच्छंतीर्विलोक्य निजचापल्यतः कुतूहलोत्कंठितमानसेन तेन निजविद्याबलात्स्वकीयं विकरालसिंहरूपं विकुर्वितं. ताश्च तत्रस्थं महाभयंकरं पंचाननं विलोक्य मुग्धमृग्य इव भयकंपितचित्ता द्रुतं पश्चाद्वलित्वा गुरुसमीपमागताः, प्रोक्तं च ताभिर्हे गुरवस्तत्र त्वस्मद्भ्रातरं नूनं कवलीकृत्यैको भयंकरः पंचाननः समुपविष्टोऽस्ति गुरुभिर्ज्ञानोपयोगचक्षुषा विलोक्य कथितं संप्रति तत्र सिंहो नास्ति, स्थूलभद्र एव समुपविष्टोऽस्ति. गुरुवचनप्रामाण्यं मन्यमानास्ताः पुनस्तत्र गता दृष्ट्वा च स्थूलभद्रं हृष्टाः संत्यो वंदनां विधायाग्रे समुपविष्टाः, स्थूलभद्रेण पृष्टं श्रीयकः क्वास्ति ? तदा तास्वेकावदत् तेनाप्यस्माभिः सहैव दीक्षा गृहीता, परं क्षणमपि बुभुक्षितुमसमर्थत्वादेकाशनमपि नाकरोत्. इतः पर्युषणापर्वोपागतं, महासत्याग्रहतस्तेन तद्दिने पौरुषी कृता, तदनंतरं सार्द्धपौरुषी, एवं महताग्रहेण तपोवृद्धितः संध्या समागता.

☒ ततो महासत्या तस्मै प्रोक्तमधुना रात्रिस्तु सुखेनैव निर्गमिष्यत्यतः प्रभाते एव पारणकं कार्यं. इतोऽर्द्धरात्रिसमये तेनाराधनापूर्वकं कालः कृतः, प्रभाते मुनिघातपातकालिप्तमात्मानं मन्यमानया महासत्या पारणकं न कृतं, संघेन मिलित्वा महासत्यै कथितं शुद्धाध्यवसायेन तत्तपःकारणे त्वं निर्दोषैव, तथापि तयोक्तं मां यदि

वीतरागो निर्दोषां प्रकटीकुर्यात्तदैवाहं पारणं विधास्ये. तदा संघेन कायोत्सर्गपूर्वकं शासनदेवताराधिता, ततः सा प्रकटीभूय संघाज्ञया तां महासतीं सीमंधरपार्श्वेऽनयत्. तत्र सीमंधरप्रभुस्तां निर्दोषां प्रकटीकृत्य चूलिकाद्वयं दत्तवान्. ततो महासत्या शासनदेवीसहायेनात्रागत्य ते चूलिके संधाय समर्पिते. इत्यादिवार्तालापं विधाय ताः सर्वाः स्वकीयोपाश्रये समागताः, इतश्च स्थूलभद्रो वाचनाकृते श्रीभद्रबाहुसमीपे समागतः, परं गुरुणा सिंहरूपविकृतितस्तमयोग्यं कथयित्वा वाचना न दत्ता. स्थूलभद्रेण बहुविधविनयोपायैः क्षमा याचिता परं गुरुणा पाठो न दत्तः, संघेन मिलित्वा महताग्रहेण क्षमायाचनपूर्वकं गुरवो विज्ञप्तास्तदा तैः केवलं सूत्रपाठतः शेषचतुःपूर्वाणि स्थूलभद्राय पाठितानि, ऊक्तं च त्वयापि शिष्येभ्यो दशपूर्वाण्येव देयानि न त्वपराणि.

☒ अथैकदा स्थूलभद्रमुनिर्विहरन्नेकस्मिन्नगरे पूर्वमित्रगृहे समागतः, मित्रं तु विदेशगतमभूत्, तस्य भार्यया सन्मुखमागत्य मुनेः स्वागतं कृतं, स्थूलभद्रेण तां विषण्णां विज्ञाय पृष्टं मम सुहृत्सोमः क्वास्ति ? तयोक्तं हे भगवन् स तु धनार्जनकृते देशांतरे गतोऽस्ति. तदा दयालुना स्थूलभद्रेण तस्य गृहमध्ये स्तंभाधो भूतलांतर्द्रव्यसमूहं ज्ञानोपयोगतो दृष्ट्वा तस्यै तत्स्तंभसन्मुखं मुहुर्मुहुर्निजहस्तं विधायोपदेशो दत्तः, ततो महामुनिस्थूलभद्रोऽन्यत्र विजहार. कियद्दिवसानंतरं स सोमोऽपि स्वांतरायकर्मयोगतो धनार्जनं विनैव विषण्णः सन् गृहे समागतः, भार्यया च स्थूलभद्रागमनवृत्तांतः कथितः, हृष्टेन सोमेनोक्तं तेन प्रभुणा किं कथितं ? तयोक्तं हे स्वामिन् तेन भवन्नाम गृहीत्वोक्तं स क्व गतोऽस्ति ? मयोक्तं हे भगवन् धनार्जनकृते देशांतरं गतोऽस्ति,

ततस्तेन महात्मना मुहुर्मुहुरेतत्स्तंभंप्रति हस्तं प्रसार्य मह्यमुपदेशो दत्तः, इति श्रुत्वा सोमेन चिंतितं नूनं तस्य महात्मनः संज्ञा निरर्थका नैव भवेदिति विचार्य तेन तस्य स्तंभस्याधो भूमिः खनिता, तत्कालमेव ततः सपादलक्षमितं द्रव्यं निर्गतं. अथ श्रीस्थूलभद्रस्वामि प्रांतेऽनशनं विधाय स्वर्गे गतः.

॥ इति श्रीशीलकुलके स्थूलभद्रकथा ॥

मूलम्—मणहरतारुणभरे । पत्थिज्जंतोवि तरुणिनिअरेण ॥
सुरगिरिनिच्चलचित्तो । सो वयरमहारिसी जयऊ ॥१३॥

व्याख्या—मनोहरयौवनभरे स्त्रीणां वृंदैः प्रार्थितोऽपि यः श्रीवज्रस्वामी सुरगिरिवन्मेरुवन्निश्चलचित्तोऽभूत् स श्रीवज्रस्वामी जयतु ॥१३॥

श्री वज्रस्वामिकथा चेत्थं—

☒ मालवदेशे तुंबवननामा ग्रामोऽस्ति, तत्रातिधनवान् धर्मवांश्च धनगिरिनामा व्यवहारी वसति, स वैराग्यवासितमानसोऽपि पितृभ्यां महताग्रहेण सुनंदाभिधकन्यया सह परिणायितः, अथो धनगिरिणा चिंतितं पुत्रोत्पत्त्यनंतरमहं दीक्षां गृहिष्ये. कालांतरे सुनंदायाः कुक्षौ कोऽपि देवजीवो गर्भत्वेनोत्पन्नस्तदा धनगिरिणा वैराग्येण मोहोन्मादं परिहृत्य श्रीसिंहगिरिगुरुसमीपे दीक्षा गृहीता, धनगिरिमुनिर्निजमातुलार्यसमितमुनिना सह

शास्त्राध्ययनं करोति.

☒ अथ सुनंदाया संपूर्णसमये तेजोऽभिराममेकं पुत्ररत्नं प्रसूतं. तस्य जन्मोत्सवे गृहे मिलिता नार्यः परस्परं कथयंति यद्यस्य बालस्य पिता दीक्षां नाग्रहिष्यत्तर्हि बालस्यास्य जन्मोत्सवं स महताडंबरेणाकरिष्यत्. तत् श्रुत्वा तस्य बालस्य जातिस्मरणं संपन्नं, ततस्तेन दीक्षाग्रहणेच्छुना मातुरुद्वेगाय रात्रिंदिवा रुदनं कर्तुं समारब्धं, एवं रुदतस्तस्य षण्मासा व्यतिक्रांताः, उद्विग्नया मात्रा प्रातिवेश्मिकादिकथनतो चिंतितं यदस्य पिता चेदत्र समागच्छेत्तर्हि रुदनशीलो बालोऽयं तस्मै एव मया समर्पणीयः, इतो धनगिर्यादिपरिवारयुताः श्रीसिंहगिरयस्तत्र समागताः, धनगिर्यार्यसमितावुभावपि गुरुमापृच्छ्याहारार्थं चलितौ. तदा श्रुतोपयोगतो गुरुणोक्तमद्य युवाभ्यां सचित्ताचित्तं यदपि मिलेत्तद्ग्राह्यं, तथेति कृत्वा तौ विहरमाणौ सुनंदागृहे समागतौ. तौ समालोक्योद्विग्नया तया प्रोक्तं रुदनशीलोऽयं भवदंगजो भवतैव ग्राह्यः, अस्य दिवारात्रिं रुदतोऽगजस्योद्विग्नया मम न किंचिदपि प्रयोजनमस्ति, ताभ्यामपि गुरुवचनं संस्मृत्य सर्वसाक्षियुतं तं बालं झोलिकायां निक्षिप्याग्रे चलितं.

☒ अथ स बालोऽपि रुदनतो विरराम, क्रमेण च तावुपाश्रये समागतौ. झोलिकां भूरिभारयुतां दृष्ट्वा गुरुणा तस्य वज्र इति नाम विधाय साध्वीनामुपाश्रये रक्षितस्ताभिश्च शय्यातरश्राविकायै पोषणार्थं समर्पितः, तत्रोपाश्रये पालनके सुप्तो वज्रो महासतीना पठनश्रवणेनैकादशांगानि सूत्रार्थतः पठितवान्. गुरवस्त्वन्यत्र विजह्रुः, वज्रोऽयं श्राविकागृहे क्रमेणाष्टवार्षिको जातः, तस्य सरससुकोमलवचनैः श्रीसंघोऽप्यत्यंतं प्रमोदं प्राप्तः.

⊠ अथ सुनंदा स्वकीयांगजमेवंविधं निपुणं मनोहररूपवाग्विलासादियुतं दृष्ट्वा दुर्ललितेव मोहदशां प्राप्ता श्राविकायै मुहुर्मुहुः कथयामास, ममांगजोऽयमतो मह्यं समर्पय ? श्राविकयोक्तमेतद्गुरुन्यासोऽस्ति कथमहं तुभ्यं समर्पयामीत्युक्ता निराशा शोचनीया सुनंदा मोहवशेन सर्वदा तद्गृहे समागत्यान्येव वज्रं दूरादेव विलोक्य हृदि दूना पुनर्निजगृहे समायाति, चिंतयति च यदि धनगिरिरत्रागमिष्यति तर्हि ममैनं पुत्रं तस्य कथयित्वा गृहिष्यामीति विचिंत्य सा घनाघनमिव तदागमनं प्रतीक्षमाणा स्थिता, इतस्तदाशागुणाकृष्टा इव धनगिर्यादियुताः श्रीसिंहगिरिसूरयस्तत्र समागताः, हृष्टा सुनंदा द्रुतमुपाश्रये समागत्य धनगिरितः पुत्रं मार्गयामास. धनगिरिणोक्तं हे महानुभावे तदैव त्वया बहुजनसाक्षिकं सोस्माकं समर्पितोऽस्ति अतस्ते पुनर्नैव मिलिष्यति परस्परं विवादो जातः, प्रांते राज्ञोऽग्रे सर्वे गताः, राज्ञोक्तं यस्याहूतो बालो गच्छेत्तस्य समर्पणीयः, द्वितीयदिने राजसभा मिलिता तदा सुनंदा विविधप्रकारसुखभक्षिकावस्त्रालंकारकुतूहलकारिवस्तूनि गृहीत्वा राजसभायां समागता, मुनयोऽपि श्रीसंघयुता वज्रमादाय तत्र समागताः.

⊠ अथ नृपाज्ञया सुनंदा बहुसुखभक्षिकादिवस्तूनि दर्शयित्वा वज्रमाह्वयामास, तदा वज्रेण चिंतितं यद्यपि माता पूज्या, तस्यै दुःखदानं नैव युक्तं, परं यदि मातरं प्रीणयामि तदा संघापमानं भवेत्, तच्च महद्दूषणं, किंच मम दीक्षातो वैराग्यमापन्ना मे मातापि दीक्षां गृहिष्यतीति विचार्य स मातुरंतिके नायातः. ततो राजाज्ञया धनगिरिणा वज्रंप्रत्युक्तं हे वत्स अस्माकं पार्श्वे रजोहरणमुखवस्त्रिके स्तः, यदि तवेच्छा भवेत्तदा

गृहाण ? तदा वज्रेण रजोहरणं रागाद्यंतरंगारिरजोहरणैकदक्षं संसारसुभटभंगैकमुद्गरं च मन्यमानेन द्रुतं गृहीत्वा नृपसभायां नर्तितं. तद्दृष्ट्वा संघः प्रमुदितः, सुनंदयापि क्षणं विलप्य कथितं यदि मे भर्तृपुत्राभ्यां दीक्षांगीकृता तर्हि संप्रत्यहमपि चारित्रं गृहीष्यामीत्युक्त्वा मातृपुत्राभ्यां सिंहगिरिगुरुसमीपे दीक्षा गृहीता. प्रांते सुनंदा चारित्रं प्रपाल्य सद्गतिं गता.

☒ अथैकदा गुरवो बहिर्गता आसन् तदा श्रीवज्रस्वामी सर्वसाधूनामुपधीन् गृहीत्वा शिष्यस्थाने च संस्थाप्य मध्यस्थितः स्वयं वाचनाचार्य इवैकादशांगपाठान् महता स्वरेण दातुं प्रवृत्तः, इतो गुरवस्तत्रोपाश्रयद्वारं समागताः, महता ध्वनिनैकादशांगवाचनादानपरं वज्रस्वामिनं विज्ञायाश्चर्यगतमानसेन गुरुणा तदक्षोभार्थं महता स्वरेण नैषिधिकीमुच्चार्योपाश्रये प्रविष्टं. गुरुशब्दं श्रुत्वा वज्रस्वामि सहसोत्थाय सकलोपधीन् योग्ययोग्यस्थानेषु मुक्त्वा द्रुतं गुरुसन्मुखमागत्य निजात्मक्षालनमिव गुरुचरणक्षालनं कृतं. अथ गुरुभिर्वज्रस्वामिज्ञानज्ञापनार्थं सर्वसाधुभ्यः कथितमहं स्तोककदिनान्यध्यासन्नग्रामे गमिष्यामि, साधुभिरुक्तं हे स्वामिन् तर्हि अस्माकं वाचनाः कः प्रदास्यति ? गुरुभिरुक्तमयं वज्रस्वामि युष्मभ्यं वाचनाः प्रदास्यति, साधुभिस्तदाकर्णाधिगताश्चर्यैरपि गुरुवचनं प्रमाणमितिमन्यमानैस्तूष्णिं स्थितं. प्रभाते गुरुविहारानंतरं श्रीवज्रस्वामिना सर्वसाधुभ्यस्तथा वाचना दत्ता यथा मासैकपाठोऽपि तैर्दिवसैकमध्ये साश्चर्यं हृद्गोचरीकृतः, कालांतरे गुरवस्तत्र समागतास्तैः पृष्टाश्च शिष्या वज्रस्वाम्यधिगतवाचनाप्रशंसां चक्रुः, ततो गुरुभिः श्रीवज्रस्वामिने वाचनाचार्यपदं दत्तं.

☒ अथैकदा परिवारयुता गुरवोऽवंतींप्रति प्रस्थिताः, मार्गे श्रीवज्रस्वामिपूर्वभवमित्रतिर्यग्जृंभकदेवैः श्रावकरूपं कृत्वाऽहारकृते श्रीवज्रस्वामिनो निमंत्रिताः, परं तैर्देशकालानुमानादिभिस्तं देवपिंडं विज्ञाय न गृहीतस्तदा तुष्टैस्तैस्तस्मै वैक्रियलब्ध्याकाशगामिनीविद्ये प्रदत्ते. क्रमेण गुरुवचनतस्तेन श्रीभद्रगुप्ताचार्यपार्श्वाद्दशपूर्वाणि पठितानि. तदा तिर्यग्जृंभकदेवकृतमहोत्सवपूर्वकं गुरुभिस्तस्याचार्यपदं दत्तं. क्रमेण श्रीसिंहगिरिसूरीणां स्वर्गगमनानंतरं वज्रस्वामी निजचरणन्यासैर्भूपीठं पावयन्ननेकभव्यजीवकल्पपादपान्निजोपदेशामृतधाराभिः सिंचयन् विजहार. इतः पाटलीपुत्रनगरे धनश्रेष्ठिनो धारिणीभार्याकुक्ष्युद्भवारूपनिर्जितनिर्जरांगना रुक्मिण्यभिधाना पुत्री वर्त्तते, सा निजगृहनिकटस्थोपाश्रये साध्वीभ्यः शास्त्राध्ययनं करोति.

☒ अथैकदा साध्वीमुखात् श्रीवज्रस्वामिनो रूपादिगुणवर्णनं निशम्य मुग्धतया तयैवं प्रतिज्ञा कृता यदस्मिन् भवे मम भर्त्ता श्रीवज्रस्वाम्येव भवतु. तत्पित्रा तत्प्रतिज्ञां विज्ञाय तस्यै कथितं हे मुग्धे स वज्रस्वामी तु वीतरागो निस्पृहो भवभीतः संसारसागरतरणैकबद्धकक्षो विषयपराङ्मुखो वर्त्तते. इतः श्रीवज्रस्वाम्यपि विहरन् पाटलीपुत्रनगरे समागतस्तदा स धनश्रेष्ठी शतकोटीदीनारद्रव्यविविधालंकारवस्त्रादियुतां तां रुक्मिणीं पुरस्कृत्य श्रीवज्रस्वामिसमीपे समागत्य कथयामास हे स्वामिन्नियं मे पुत्री भवद्गुणगणाकृष्टहृदया भवंतमेव परिणयितुं गृहीताभिग्रहा वर्त्तते, तदेतद्द्रव्ययुतां तां स्वीकुरु ? गुरुणोक्तं हे महानुभाव धनकन्ययोर्लोहशिलानिर्मितनौनिभयोः संसारसागरतरणैकाभिलापस्य मे प्रयोजनं नास्ति. तत् श्रुत्वा विषण्णया रुक्मिण्योक्तं हे स्वामिन्

तर्हि मया कृता प्रतिज्ञा कथं पूर्यते ? गुरुणोक्तं यदि तव ममोपर्येव रागो वर्त्तते तर्हि त्वमपि मयाचीर्णमेव पंथानमनुसर ? किमेभिरसारैः क्षणविध्वंसिविषयजन्यसौख्यैः ? किं च प्रांते रागाद्यंतरंगारिनिकरैरप्यगम्यायां मोक्षनगर्यां गत्वा तत्रावां मिलित्वा निशंकं निर्भयं शाश्वतानंताभंगुरानंदसंदोहयुतं सुखास्वादं लभिष्यावहे, कृते चैवं तव प्रतिज्ञापि पारं प्रयास्यति. इति श्रुत्वा प्रतिबुद्धया तया वैराग्यं प्राप्य तत्सकलद्रव्यव्ययुतमहोत्सवपूर्वकं दीक्षा गृहीता. अथैतो द्वादशवार्षिको दुष्कालः समागतस्तदा धान्याद्यभावतः सकलसंघो दुःखभाग्बभूव. कृपालुः श्रीवज्रस्वामि निजविद्याप्रभावतः सकलसंघं काष्टपट्टे समारोप्याकाशमार्गेण सुभिक्षयुतायां नगर्यां समागतः, तत्र पर्युषणापर्वणि बौद्धमतानुयायिराज्ञा द्वेषभावतो जिनमंदिरे पुष्पनिषेधः कृतस्तदा संघाज्ञया श्रीवज्रस्वामी जिनशासनप्रभावनार्थं निजविद्याबलेन नंदनवनाद्विंशतिलक्षदिव्यपुष्पाण्यानयत्. तद् दृष्ट्वा प्रतिबुद्धेन राज्ञा जैनधर्मोंगीकृतः, अथ श्रीवज्रस्वामिनो निजशिष्यं वज्रसेनं गणं समर्प्याकथयन् यदा त्वं सोपारकनगरे लक्षमूल्यपाकतो भिक्षां लभसे तद्दिनतः सुकालो भविष्यतीति कथयित्वा स्वयमनशनं प्रतिपद्य स्वर्गे गताः, अथ श्रीवज्रसेनसूरिरपि विहरन् क्रमेण सोपारकं प्राप्तस्तत्र च तेन लक्षमूल्यपाकतो भिक्षा लब्धा गतश्च दुष्कालः, श्रीवज्रसेनसूरीतो नागेंद्रचंद्रनिर्वृत्तिविद्याधराख्याश्चत्वारः शाखा निर्गताः.

॥ इति श्रीशीलकुलके वज्रस्वामिकथा ॥

मूलम्—मुणिउं तस्स न सक्का। सड्ढस्स सुदंसणस्स गुणनिवहं॥
जो विसमसंकडेसुवि। पडिओवि अखंडसीलधरो॥ १४॥

व्याख्या—तस्य सुदर्शनश्रेष्ठिनः श्रावकस्य गुणनिवहं ज्ञातुं पंडिता अपि समर्था न, यो महानुभावो विषमसंकटे पतितोऽप्यखंडशीलधारकः संजातः॥ १४॥

तस्य कथा चेत्थं—

☒ अंगदेशे चंपानगर्यां दधिवाहनो राजा, तस्य रूपनिर्जितरंभाऽभयानामभार्या. किं च तस्यामेव नगर्यां रुषभदासाख्यः श्रेष्ठी, तस्य भार्याऽर्हद्दास्यभिधानास्ति. तयोर्गृहे सुभगाभिधो गोमहिष्यादिपालको गोपालोऽस्ति, स सर्वदा गोमहिष्यादिचारणार्थं वने याति, अथैकदा वनात्पश्चाद्वलमानेन तेनैको निर्वस्त्रः शीतपरीषहं गृह्णन् प्रतिमास्थो मुनिर्दृष्टः सुभगो गृहमागत्य तत्साधुशीतकष्टं स्मरन् रात्रिं कथंचिदतिक्रम्य प्रभाते पुनर्गोमहिष्यादियुतस्तत्र वने समागतः, मुनिं च तथैव ध्रुवमिव तत्र निश्चलं दृष्ट्वा हृदि चमत्कृतः, तावन्मुनिः "नमो अरिहंताणं" इत्युच्चरन्नाकाशे समुत्पतितः, तदा सुभगेन चिंतितं "नमो अरिहंताणं" इति नूनं गगनगामिनी विद्या संभवतीति विचार्य स दिवारात्रि तदेव पदं जल्पति.

☒ अथैकदा वर्षाकाले तस्मिन् गोमहिष्यादियुते वने स्थिते सति नद्यां जलपूरं समागतं, तदा पशवस्तु तरित्वा परपारं प्राप्ताः, सुभगस्तु तटिनीतटस्थित एव चिंतयति मम पार्श्वे या गगनगामिनी विद्या वर्त्तते, तस्या अद्याहं परीक्षां करोमीति ध्यायन् "नमो अरिहंताणं" इत्युच्चरन्नद्यां पपात, इतो जलांतःस्थख-दिरकाष्टाग्रेण विद्धो मृत्वा नमस्कारध्यानमाहात्म्येनार्हद्दासीकुक्षौ पुत्रत्वेनोत्पन्नः, तस्या गर्भानुभावतो धर्ममयदोहदाः समुत्पन्नाः, संपूर्णसमये पुत्रजन्म जातं, सर्वांगसुंदरं च तं दृष्ट्वा तस्य सुदर्शन इति नाम दत्तं. क्रमेण यौवनं प्राप्तोऽसौ पित्रा मनोरमया कन्यया सह परिणायितः, जैनधर्माभिलाषैकमानसेन तेन गुरुसमीपे परस्त्री-भोगनियमो गृहीतः. अथ तत्रैव नगरे कपिलनामैकः पुरोहितो वसति, तेन सह सुदर्शनस्य प्रीतिर्जाता.

☒ अथैकदा पुरोहितभार्या कपिला सुदर्शनस्य मनोहरं रूपं दृष्ट्वा मदनातुरा जाता. कपिले ग्रामांतरं गते सति सैकदा सुदर्शनसमीपे समागत्य कथयामास भो सुदर्शन तव मित्रशरीरेऽद्याकुशलमस्त्यतोऽसौ त्वां मिलनार्थमाह्वयति. तत् श्रुत्वा सरलः सुदर्शनो मैत्र्यगुणाकृष्ट इव द्रुतं तया सह मित्रगृहे समागतः, सुदर्शने गृहांतः समायाते सति कपिलया गृहकपाटौ दत्तौ. सुदर्शनेन चिंतितं नूनमेतद्ब्रह्मादीनामप्यगोचरं स्त्रीचरित्रं दृश्यते. इतः कपिला स्फारशृंगारा नानाविधहावभावान् दर्शयंती निजांगोपांगान् प्रकटीकुर्वंती मारविकाराविर्भा-वकलितैर्विविधवचनैस्तस्मै भोगप्रार्थनां चकार. तदावसरज्ञेन सुदर्शनेनोक्तं हे कपिले एतत्कार्यं जगति कस्य प्राणिनः प्रियं नास्ति ? परं त्वया तु सर्वथैवायं मिथ्या प्रयत्नः कृतो यतोऽहं क्लीबोऽस्मि. तत् श्रुत्वा

गलितमदनविकारया तया सद्यो गृहकपाटौ समुद्घाटितौ, तदा सुदर्शनोऽपि द्रुतं ततो निःसृत्य व्याधपंजरमुक्तपक्षीव निजगृहे समायातो गृहीतश्च तेनाद्वितीयेन परगृहगमने नियमः, इतश्चैकदा विश्वेऽपि नगरजना इंद्रमहोत्सवे समागते वनमध्ये गंतुं प्रवृत्ताः, अभयाराज्ञ्यपि कपिलायुता सुखासनस्थिता वने चचाल. मार्गे ताभ्यां पंचांगजपरिवृता तांबूलचर्वणारुणाधरपल्लवा स्तनफलस्तबकान्विता विकसितहास्यकुसुमोत्करा जंगमा कल्पवल्लीव सुदर्शनभार्या मनोरमा दृष्टा. तां भूरिपुत्रवतीं दृष्ट्वा साधारणस्त्रीस्वभावतः कपिलयाऽभयायै पृष्टं हे सखि कस्येयं भार्या वर्त्तते ? अभययोदितमियं पंचपुत्रोपेता सुदर्शनश्रेष्टिभार्यास्ति. तदाश्चर्यं गतया कपिलया हसित्वोक्तं हे सखि क्लीबस्यापि किं संततिः संभवति ? अभययोक्तं त्वया कथं ज्ञातं यत्सुदर्शनः क्लीबोऽस्ति ? तदा तयाप्यतिस्नेहेन स्वकीयः सर्वोऽपि वृत्तांतस्तस्यै कथितः. तत् श्रुत्वा हसित्वाभययोक्तं हे सखि त्वमीदृशी चतुरापि तेन धूर्त्तेन वंचिता, नूनं स परस्त्रीसंगे एव नपुंसकोऽस्ति, स्वगृहे गृहिण्याः पुरतो नपुंसको नास्त्येव. तत् श्रुत्वा हास्यकोपकलितया कपिलया प्रोक्तं हे भगिनि मम चातुर्यं तु भस्मनि हुतमिव निरर्थकं गतं, परं यदि संप्रति त्वं चेत्सुदर्शनं वंचयेस्तदैवाहं तवापि चातुर्यं सत्यं जानामीत्युक्त्वा साभिमाना राज्ञ्यपि तत्कार्यार्थं प्रतिज्ञां चकार.

☒ अथ कतिचिद्दिवसानंतरं राज्ञ्या निजधात्रीमातुः पुरो निजप्रतिज्ञावार्ता कथिता. धात्र्या प्रोक्तं त्वं चिंतां मा कुरु ? तवेमां प्रतिज्ञामहं पूरयिष्यामीत्युक्त्वा तामाश्वासयामास. अथ क्रमेण तया ज्ञातं यत्सुदर्शनोऽष्टमीप्रमुखपर्वणि पौषधं गृहीत्वा कस्मिंश्चिच्छून्यगृहे कायोत्सर्गस्थस्तिष्टति. अथ कार्त्तिकपूर्णिमायां कौमुदीमहोत्सवे

समागते सति राजादिनगरलोका वनमध्ये गताः, राज्ञी तु निजदेहापाटवमिषेण निजप्रासादे एव स्थिता. अथ धात्री प्रथमत एव निर्मितां सुदर्शनसदृशीं काष्टमयीं प्रतिमां सुखासने संस्थाप्य सखीभिः परिवृता यक्षप्रतिमोत्सवमिषं कुर्वाणा राजदुर्गप्रतोल्या बहिर्निर्गता. प्रतोलीरक्षकैश्च स काष्टमयी यक्षप्रतिमा दृष्टा. बहिरागत्य तां प्रतिमां गुप्तापवरके संस्थाप्य शून्यगृहे कायोत्सर्गस्थं सुदर्शनं मार्जारी मूषकमिवोत्पाद्य सा तस्मिन् सुखासने स्थापयामास, पुनस्तेनैव मार्गेण राजदुर्गप्रतोल्यां समागता, सविश्वासैरारक्षकैरनिवारिता सुदर्शनयुतं सुखासनं राज्ञीसमीपे समानयत्. राज्ञी तं दृष्ट्वा हृष्टा सती विविधहावभावान् प्रदर्शयंती कटाक्षविक्षेपपूर्वकं तस्मै भोगप्रार्थनां चकार. सुदर्शनस्तु मेरुरिव तस्या विविधवचनप्रपंचचंडवातैरक्षुब्ध एव कायोत्सर्गध्याने स्थितः, तदा तया निर्लज्जया स्वकीयवस्त्राणि परित्यज्यानेकविधानुकूलोपसर्गास्तस्य कृतास्तथापि तं निश्चलं ज्ञात्वा तया नानाविधभयवचनानि कथितानि. परं सुदर्शनस्तु चतुःप्रहरान्यावत्कायोत्सर्गे एव तस्थौ. अथ प्रातःकाले यदा नृपागमनावसरो जातस्तदा निःकृपया तया निजदेहं स्वनखैर्विदार्य वस्त्राभूषणानि च त्रोटयित्वा निजदुराचरणोद्घोषणं कुर्वतीव पूत्कारं चकार. तत्क्षणमेव प्राहरिकैस्तत्रागत्य कायोत्सर्गस्थः सुदर्शनो दृष्टो ज्ञापितश्च तैर्नृपाय. नृपोऽपि तत्रागत्य सुदर्शनं दृष्ट्वा चिंतितवान् यदमृतादपि विषप्रकटीभवनं न संभवतीति विचार्य राज्ञा सुदर्शनस्तद्वृत्तांतं पृष्टः, सुदर्शनेन राज्ञीदयया किमपि न जल्पितं. तदा राज्ञानुमितं नूनमेष नीतिपथभ्रष्टो विज्ञायते. इति विचिंत्य राज्ञा दुर्गपालायादिष्टं यदेनं नगरमध्ये विडंब्य शूलायामारोपयेति. राज्ञ आदेशमासाद्य यमदूतैरिवा-

तिभयानकैर्दुर्गपालसेवकैः स कचेष्वाकृष्य बहिर्निष्कासितस्ततो मुंडितार्धमस्तकं कंठस्थापिताऽर्कपुष्पमालं कृतरक्तांजनललाटतिलकं शिरोधार्यमाणसूर्पछत्रमेवंविधविविधविडंबनापूर्वकं सुदर्शनं रासभोपरि समारोप्य ते राजमार्गे चेलुः इतस्तं वृत्तांतं श्रुत्वा तद्भार्यया मनोरमया चिंतितं चंद्रादपि कदाचिदंगारवृष्टिर्भवेत् परं मम भर्तुः परस्त्रीलंपटत्वमसंभवितमेवेति विचार्य सा गृहदेवालये गत्वा जिनं पूजयित्वा कथयामास हे शासनदेवि मम भर्त्तुः सानिध्यं कार्यमित्युक्त्वा सा कायोत्सर्गे तस्थौ. तत्क्षणमेव शासनदेव्या प्रकटीभूय तस्यै कथितं हे महासति त्वं चिंतां मा कुरु ! अहं तच्छीलमहात्म्यात्सांनिध्यं करिष्यामित्युक्त्वा साऽदृश्या बभूव अथैवं विडंब्यमानं सुदर्शनं ते शूलीसमीपे समानीय तस्यामारोपयामासुः, तत्क्षणमेव सा शूली सिंहासनरूपा जाता. ततस्तैस्तस्मै खड्गादिप्रहारा दत्तास्ते प्रहारा अप्यलंकारतां भेजुः, अथ तैर्दुर्गपालसेवकैस्तद्वृत्तांतो राज्ञे निरूपितस्तदा राजा स्वयं तत्रागत्य तथास्थितं च सुदर्शनं दृष्ट्वा प्रणामं कृत्वा स्वापराधं क्षामयामास. सन्मानपुरस्सरं च तं तद्गृहे प्रेषयामास. ततो राजा तत्सत्यवृत्तांतं विज्ञायाऽभयां गृहान्निष्कासयितुं लग्नस्तदा सुदर्शनेनागत्य राजानं च विज्ञप्य तस्यै अभयदानं दापितं. किंतु लज्जया विपण्णीभूतया तया गलपाशेनात्मघातः कृतः. अथ तस्या धात्रीमातापि राज्ञा नगरान्निष्कासिता पाटलीपुत्रे देवदत्तागणिकागृहे स्थिता. कियता कालेन सुदर्शनो वैराग्यमासाद्य दीक्षां गृहीत्वा पाटलीपुरे समागतः तदाऽभयाधात्री तमुपलक्ष्य कपटश्राविकीभूयाहारदानमिषेण देवदत्तागृहे समानीय देवदत्तायुता तस्य नानाविधोपद्रवांश्चकार. किंतु तं निश्चलं विज्ञाय संध्यायां स्वयमेव मुमोच. सुदर्शनमुनिरपि स्मशाने गत्वा

कायोत्सर्गेण तस्थौ. तत्र व्यंतरीभूतोऽभयाजीवः पूर्ववैरेणागत्य तं प्रत्यनेकानुपसर्गांश्चकार, किंतु शुभध्यानेन सुदर्शनमुनिना केवलज्ञानमासादितं. देवैश्च महोत्सवः कृतः, अभयाजीवव्यंतर्यापि सम्यक्त्वमंगीकृतं. देवदत्ताभयाधात्रीमात्रादिभिश्च श्रावकत्वमंगीकृतं. क्रमेण च सुदर्शनकेवली मोक्षं गतः.

॥ इति श्रीशीलकुलके सुदर्शनश्रेष्ठिकथा ॥

मूलम्—सुंदरि सुनंद चिल्लण–मणोरमा अंजणा मिगावईअ ॥
जिणसासणसुपसिद्धा । महासइओ सुहं दिंतु ॥ १५ ॥

व्याख्या—सुंदरी सुनंदा चिल्लणा मनोरमा अंजनासुंदरी मृगावती, आदिशब्दादन्या दमयंतीप्रमुखा महासत्यो ज्ञातव्याः, जिनशासनमध्ये प्रसिद्धास्ता महासत्यः सुखं ददतु. ॥ १५ ॥

☒ अत्र सुंदरी कथा–तपःकुलके विख्यातास्ति, श्रीवज्रस्वामिमातुः सुनंदायाः कथा वज्रस्वामिकथायां कथिता यया भर्तुर्वियोगेऽपि शुद्धं शीलं पालितं. सुदर्शनश्रेष्ठिभार्यामनोरमायाः कथा सुदर्शनश्रेष्ठिवृत्तांते कथिता.

☒ अथ चिल्लणांजनासुंदरीमृगावतीनां कथाः कथ्यंते, तत्र प्रथमं चिल्लणायाः कथा प्रारभ्यते—

चिल्लणा सती कथा —

विशालायां नगर्यां श्रीवीरप्रभुमातुलश्चेटकाभिधो राजा राज्यं करोति. तस्य च सप्त पुत्र्यो वर्त्तंते, चेटकराज्ञा द्वादश श्रावकव्रतानि गृहितानि.

☒ अथ तस्य सप्तपुत्रीमध्यात्सुज्येष्टाचिल्लणाभिधाने द्वे पुत्र्यौ कुमारिके आस्तां. श्रेणिकेन सुज्येष्टां मनोहररूपां निशम्य चेटकंप्रतिदूतं प्रेष्य सा मार्गिता. किं तु न्यूनकुलत्वेन चेटकः श्रेणिकाय तां नार्पयत् ततोऽभयकुमारः सुगंधितैलविक्रयकारकवेषं धृत्वा वैशाल्यां समागत्य चेटकराजद्वाराग्रे आपणं कृत्वा स्थितः. ततो यदा सुज्येष्टाया दासी तैलग्रहणार्थं समायाति तदा स स्तोकमूल्येन बहुतैलं ददाति श्रेणिकचित्रप्रतिकृतिं च दर्शयति. तदनंतरं दासी तां प्रतिकृतिं सुज्येष्टायै दर्शयामास. सापि श्रेणिकराजप्रतिकृतिंदृष्ट्वा मोहिता. ततस्तया बुद्धया ज्ञातं नूनं मदानयनकृतेऽत्राभयकुमारः समागतोऽस्तीति विचिंत्य लेखं लिखित्वाऽभयकुमाराय ज्ञापितं यदि त्वं प्रवीणोऽसि तदा मां श्रेणिकेन सह मेलय ? ततोऽभयकुमारेण प्रच्छन्नतया सुज्येष्टायाः प्रासादावधि सुरंगैका कारिता. तन्मध्ये रथस्थः श्रेणिकः सुलसाया द्वात्रिंशत्पुत्रैः सह समागतो दत्तश्च संकेतः सुज्येष्टायै, तयोक्तं ममाभरणकरंडकं गृहीत्वाधुनैवागच्छामीत्युक्त्वा त्वरितपदैः सा प्रासादमध्ये समागता. तदा चिल्लणा तामतित्वरमाणां विलोक्यापृच्छद् हे भगिनि त्वं कथं व्याकुला दृश्यसे ? सुज्येष्टया चिंतितं भगिन्यै कथयित्वैव गच्छामीति विचार्य सा सर्वमप्युदंतं कथयित्वाभूषणकरंडकं गृहीतुमपवरकमध्ये गता. तमवसरं प्राप्य द्रुतं चिल्लणा

सुरंगायामागत्य श्रेणिकरथे समारूढा, विह्वलतया श्रेणिकेनापि तामनुपलक्ष्य रथो नोदितः, इतः सुरंगायामागता सुज्येष्ठा रथमनालोक्य प्रासादे च चिल्लणामप्यदृष्ट्वा पूत्कारं चकार, तत्क्षणमेव चेटकराजसेवकैः सुरंगायां प्रविश्य पृष्टस्थसुलसाद्वात्रिंशत्पुत्रा मारिताः, इतोऽविलंबं रथं प्रेरयमाणः श्रेणिकश्चेल्लणायुतो राजगृहे समागतः. कृतं च चेल्लणया सहैव तेन पाणिग्रहणं. पश्चात्सुज्येष्टया वैराग्येण श्रीवीरप्रभुसमीपे दीक्षा गृहीता.

☒ अथ चिल्लणायाः कोणिकहल्लविहल्लाख्यास्त्रयस्तनयाः संजाता·, श्रीवीरेण ता सप्तापि भगिन्यः सतीत्वेन व्याख्याताः, श्रेणिकोऽपि क्षायियसम्यक्त्वधारी वर्त्तते. अथैको द्विजजीवो मृत्वा दर्दुरो जातः स भगवद्वंदनार्थमागच्छन् पथि श्रेणिकाश्वखुरेण मृतः श्रीवीरध्यानतो देवश्च जातः.

☒ अथैकदा देवसभायां सौधर्मेंद्रेण श्रेणिकसम्यक्त्वप्रशंसा कृता, तदश्रद्धानेन तेन कुष्टिरूपं कृत्वा प्रभुपार्श्वे समागत्य प्रभोः स्पर्शः कृतः, मत्स्यजालधारिसाधुरूपं कृतं, गर्भिणीसाध्वीरूपं च कृतं, एवं तेन बहुधा श्रेणिकसम्यक्त्वपरीक्षा कृता, परं तं निश्चलं विज्ञाय संतुष्टेन तेन श्रेणिकायैको हारो गोलकद्वयं च दत्तं. श्रेणिकेन स हारश्चेल्लणायै दत्तो गोलकद्वयं च नंदाराज्यै समर्पितं, क्रुद्धया नंदया तद्गोलकद्वयं भित्तावास्फालितं, तत्क्षणमेवैकस्मात्कुन्डलद्वयं द्वितीयमध्याच्च क्षौमयुगलं निर्गतं, तद् दृष्ट्वा नंदा हृष्टा सती तत्कुन्डलद्वयेन चीवरद्वयेन च स्वशरीरं भूपयति, चिल्लणा च हारं धारयति.

☒ अथैकदाऽभयकुमारेण श्रेणिकं प्रतिबोध्य नंदामातृसहितेन श्रीवीरसमीपे दीक्षा गृहीता, कुन्डलयुगलं

चीवरयुगलं च चिल्लणापुत्रहल्लविहल्लाभ्यां समर्पिते, एकदा श्रेणिकेन कोणिकाय राज्यं दातुं चिंतितं, सेचाणकहस्तिहारौ च हल्लविहल्लाभ्यां दत्तौ. तद् दृष्ट्वा क्रुद्धेन कोणिकेन कालादिदशकुमारैः सहालोच्य श्रेणिकः काष्टपंजरे निक्षिप्तः, स्वयं च राज्ये स्थितः श्रेणिकं सदा कशाप्रहारैस्ताडयति. चिल्लणा महादुःखं दधाति.

☒ अथैकदा कोणिकभार्यया पद्मावत्या पुत्ररत्नं प्रसूतं. कोणिकोत्संगस्थेन तेन पुत्रेण भोजनसमये स्थाल्यां मूत्रितं, तन्मिश्रितं भोजनं भुंजानेन तेनोक्तमहो कीदृक् स्वादु धान्यमस्ति ? तत् श्रुत्वा चिल्लणया रुदनं कृतं, तदा कोणिकेन पृष्टं हे मातस्त्वं कथं रोदिषि ? मात्रोक्तं यदा पूर्वं त्वदंगुली दुःखितासीत् तदा त्वत्पित्रा श्रेणिकेन सा निजमुखे धृतासीत्, स्वपुत्राः सर्वेषां वल्लभाः संति परं त्वं तु पितरं सर्वदा ताडयसीति दुःखेनाहं रोदिमि. तदैव पितृस्नेहोल्लसितार्द्रीभूतमानसः स काष्टपंजरभंगाय कुठारं गृहीत्वा धावितः, श्रेणिकेन तं तथावस्थमागच्छंतं विलोक्य भीतेन तालपुटविषमाघ्रायात्मघातः कृतो गतश्च स प्रथमं नरकं. तद् दृष्ट्वा कुणिको महापश्चात्तापं कुर्वन्नाक्रंदितुं लग्नः, शोकातुरेण तेन तन्नगरं त्यक्त्वा चंपानगर्यां वासः कृतः.

☒ अथ हल्लविहल्लौ तत्कुंडलाद्याभूषणानि परिधाय सेचनकगजस्थितौ नगरमध्ये भ्रमतस्तौ च दृष्ट्वा कोणिकभार्या कोपातुरा स्वभर्त्रे कथयामास हे स्वामिन्नेतानि वस्तूनि त्वं बलादपि ताभ्यां गृहाण ! ततो भार्याप्रेरितेन तेन तानि वस्तूनि ताभ्यां मार्गितानि, ताभ्यामुक्तमावाभ्यां पित्रा समर्पितानि तत्कथं दीयते ? तदा कोणिकेन बलादपि तानि गृहीतुं यदि प्रयत्नः कृतस्तदा तौ सांतःपुरौ सर्ववस्तूनि गृहीत्वा सेचानकोपरि

समारुह्य विशालायां निजमातुलचेटकराजसमीपे गतौ. तद् ज्ञात्वा कोणिकेन दूतं प्रेष्य चेटकात्तौ मार्गितौ. चेटकेनोक्तं शरणागतार्पणे क्षत्रियाणां धर्मो नश्यति. तदा कोणिको निजसैन्यमादाय विशालायां प्राप्तः, चेटकोऽपि सन्मुखमागतः, सैन्ययोर्महायुद्धं जातं, तस्मिन् युद्धे कोटयेकाशीतिलक्षमनुष्या मृताः, श्रेणिकराज्ञः कालादिदशकुमाराश्चेटकेन मारिताः, प्रांते कोणिकमजेयं ज्ञात्वा चेटकः प्रतोलीं पिधाय विशालायां प्रविष्टः, कोणिको द्वादशवर्षपर्यंतं विशालां परिवेष्टय स्थितः, प्रांते स विशालां भंक्त्वा चंपायामागतः, चेटकोऽनशनमाराध्य स्वर्गे गतः हल्लविहल्लावपि दीक्षामादाय स्वर्गे गतौ.

☒ अथैकदा श्रीवीरश्चंपायां समवसृतस्तदा कोणिकेन प्रभुं प्रणम्य स्वगतिः पृष्टा, स्वामिनोक्तं: त्वं षष्टं नरकं प्रयास्यसि ? कोणिकेनोक्तं सप्तमं नरकं के व्रजंति ? प्रभुणोक्तं केचिच्चक्र्याद्या गच्छंति, ततोऽसौ गृहमागत्य चक्रादिकृत्रिमचतुर्दशरत्नानि मेलयित्वा देशसाधनाय निर्गतः, क्रमेण तमिस्रागृहोद्घाटनकृतप्रयत्नः कृतमालदेवेन स भस्मसात्कृतो मृत्वा च षष्टे नरके गतः, चेल्लणा तु श्रीवीरप्रभुसमीपे दीक्षामादाय सद्गतिं गता ॥

॥ इति श्री शीलकुलके चेल्लणा कथा ॥

## अथांजनासुंदरीकथा कथ्यते —

☒ जंबुद्वीपे भरतक्षेत्रे वैताढ्यपर्वते प्रल्हादनपुराभिधं नगरमासीत्, तत्र प्रल्हादाभिधराज्ञः पद्मावतीराज्ञी-कुक्ष्युद्भवः पवनंजयाख्यः पुत्रो बभूव. स निजमित्ररुषभदत्तेन सह सुखेन निजसमयं गमयति.

☒ अथ तस्मिन्नेव वैताढ्यपर्वतेंजनपुराभिधं नगरं, तत्रांजनकेतुराज्ञोंजनावतीराज्ञीकुक्ष्युत्पन्नांजनासुंदर्यभिधाना पुत्री सकलकलाकलापोपेता बभूव. यौवनं प्राप्तां तां विलोक्य राज्ञा तस्या विवाहार्थं मंत्री पृष्टः, मंत्रिणोक्तं दत्तकुमारो रूपादिगुणोपेतोऽस्ति परं केवलिना सोऽष्टादशमे वर्षे मोक्षगामी प्रोक्तोऽस्त्यतस्तस्मै स्वल्पायुषे कन्या कथं दीयते ?

☒ अथैकदा नंदीश्वरयात्रायामनेके विद्याधराः संमिलितास्तत्रांजनकेतुराज्ञा पवनंजयकुमाररूपमालोक्य तेन सहांजनसुन्दर्या विवाहो मेलितस्ततः सर्वे यात्रां विधाय निजनिजगृहे समेताः, पवनंजयेन स्वमित्ररुपभदत्तायोक्तं लग्नदिवसो दूरेऽस्ति, ततोंजनारूपविलोकनायावां तत्र गमिष्यावः, इत्युक्त्वा स प्रच्छन्नतयाकाशमार्गेण मित्रयुतस्तत्र समागतः, तदांजनसुन्दरी निजसखीयुता गवाक्षस्थितासीत्. सख्योक्तं हे अंजने पूर्वं त्वदर्थं यो दत्तकुमारो वरो विलोकितः स स्वल्पायुर्दोषयुतो बभूव, तेन तं विहाय तव विवाहः पवनांजयेन सह मेलितः, अंजनयोक्तं हे सखि स्तोकमप्यमृतं समीचीनं, बह्वपि विषं तु कष्टदमेव. प्रच्छन्नस्थितः पवनंजयस्तद्वचः श्रुत्वा कुपितः करवालं

गृहीत्वा तस्या वधकृते सज्जीभूतः, परं मित्रेण निवारितः, ततस्तौ द्वावपि स्वस्थाने समागतौ.

⊠ अथ लग्नदिवसे महोत्सवपूर्वकं तयोर्विवाहो जात. परमंतःकोपानलज्वलितं पवनंजयं विज्ञाय कमलसुकुमालांजनासुन्दरी म्लानिं प्राप तथापि सा निजपतिव्रतत्वैकतत्परा भर्त्तुर्भक्तिं कुर्वाणा स्वकर्मणामेव दोषं ददाति.

⊠ अथैकदा पवनंजयः पितुरादेशाद्वरुणेन सह युद्धं कर्त्तुं समुद्यतस्य निजमित्रस्य रावणस्य सहायार्थं भूरिसैन्यं गृहीत्वा मित्रयुतः प्रयाणाभिमुखो बभूव. तदासौ निजमातरं नंतुं समागतः, परं तत्र स्थितामंजनां दृष्ट्वाप्यनालोक्य मातरं नत्वा प्रयाणमकरोत्. तदांजनसुन्दरी मनस्यतीवदूना नयनांबुदनिर्गताश्रुधाराभिर्निजकर्ममलं क्षालयंतीव रुदनं चकार.

⊠ अथ पथि पवनंजयोऽनेकराजहंससंचयालंकृतकमलजालं स्फटिकामलजलांतर्गतप्रकटदृश्यमानशौक्तिकेय—कदंबकैर्निजौदार्यशंसिसुमानसत्वं प्रकटयंतं पालीगतद्रुमालिचलत्कोमलकिसलयवृन्ददंभेनात्यादरपूर्वकं पथिकप्राघूर्णकानाह्वयंतं तटगतानेककोकिलादिपक्षिकृतकलकलारावमिषेण जगद्विस्तृतस्वकीयकीर्त्तिविरुदावलिं ख्यापयंतं मानसाख्यं तडागं दृष्ट्वा विश्रामार्थं तत्र निजसैन्यं स्थापयामास. तत्र भोजनजलक्रीडादि कृत्वा मानससरोरम्यतां च दृष्ट्वा सोऽमंदानंदकलितो बभूव. इतश्चतुर्याममितमपि पतिविरहमसहमाना तेजस्वितारकनिकरदंभतोंतःसुवर्णबिंदुशालिनीलांबराच्छादितदेहभागा चंद्रोपलझरज्जालनिर्झरनिकरधारामिषतो निजनायकविरहोद्भवनयनाश्रूणि निष्कासयंती काननमध्यभागज्वलदौषधीसमूहच्छद्मना निजहृदयोद्भूतविरहानलं प्रकटीकुर्वंती विकसितकुमुदकदंबकदंभेन कटाक्षविक्षेपान् कुर्वंती निज-

भोगविलासांतरायभयान्निखिलजगज्जंतुजातं गाढनिद्रावशं कुर्वती प्रथमपतिसंगरंगभंगभयाल्लज्जयेव निजाकाशावासप्रकाशितं दिनकरदीपं विध्यापयंती स्वकीयप्रियपतिचंद्रमसंमिलनायात्यंतमुत्सुका तमिस्रा समागता, इतः पतिवियोगतश्चक्रवाकी कृताक्रंदं श्रुत्वा पवनंजयेन निजमित्ररुपभद्रसाय पृष्टं हे सखे किमियं पक्षिणी विलापान् करोति ? तेनोक्तं हे मित्र इयं चक्रवाकी निजपतिवियोगदुःखिनी हृदयस्फोटं विलापान् करोति, तत् श्रुत्वा पवनंजयेनांजनासुंदर्यंतरायकर्मक्षयवशादिति मनसि चिंतितं यदि पक्षिणामप्येतादृशं विरहदुःखं भवति तर्हि मया त्यक्तांजनसुन्दरी तु द्वादशवर्षवियोगदुःखाक्रांतास्तीति विचार्य तेन मित्रायोक्तं हे मित्र अहं त्वतस्तत्र गत्वांजनसुन्दर्या मिलित्वा द्रुतं पश्चादागमिष्यामि.

☒ अथ मया विरहदुखं सोढुं न शक्यते. इत्युक्त्वा पवनंजयो निशायामेवाकाशमार्गेण प्रच्छन्नतयांजनागृहे समागतः, तत्र तेन शय्यायां जलंविना शफरीवेतस्ततो लुठ्यमाना वदनाद्दीर्घोष्णनिःश्वासान् निष्कासयंती नेत्राश्रुजलधाराभिरार्द्रीकृतशय्यावरणा निजपतिनामाक्षरमालां गणयंती चिरपतिविरहदुःखशिथिलीभूतांगोपांगांजनासुंदरी दृष्टा. इतः पवनंजयो द्रुतं तत्र चंद्र इव प्रादुर्भूय तन्मनोगतशोकतिमिरनिकरं दूरीकृत्य चकोरमिव तामवर्णनीयानंदोल्लसितां चकार. ततः स्वानुभूतचक्रवाकीवार्त्तां तस्यै निवेद्य तया सह गाढालिंगनपूर्वकं भोगविलासं विधाय स प्रभाते प्रस्थितुं लग्नस्तदांजनसुन्दर्योक्तं हे स्वामिन्नद्यैव मया ऋतुस्नानं कृतमस्ति, ततः कदाचिन्मे गर्भोत्पत्तिसंभवोऽस्ति. एवं च सति लोका मह्यं कलंकं प्रदास्यंति. तत् श्रुत्वा पवनंजयेनोक्तं हे प्रिये त्वं चिंतां

मां कुरु? त्वरितमहं समागमिष्यामि, तथापीयं मम नामांकिता मुद्रिका त्वया रक्षणीया कार्यावसरे च सा दर्शनीयेत्युक्त्वा मुद्रिकां च तस्यै दत्वा पवनंजयः प्रस्थितः. अथात्रांजनसुन्दरी निजपतिबहुमानेन हृष्टा सती गर्भं दधार, तृतीयमासे गर्भप्रकटीभवनतः श्वशुरादयस्तामसतीं मन्यमाना गृहान्निष्कासयितुं प्रवृत्तास्तदांजनया तदभिज्ञानमुद्रिकादर्शनपूर्वकमुक्तं मम भर्तुरेव गर्भोऽस्ति, परं तैस्तद्वचनममन्यमानैः सा गृहान्निष्कासिता.

☒ अथ सा धात्र्या सह नगरान्निर्गत्य पितुर्गृहे गमनोत्सुका जाता, परं तया चिंतितं अस्यामवस्थायां पितृगृहे गमनमप्यनुचितमिति विचार्य सा वने एव स्थिता निजकर्मोदयविपाकं मन्यमाना जिनधर्मध्यानलीनमानसा वनफलानि भुंजाना झरन्निर्झरनिर्मलजलं पिबंती च पूर्णावधौ पुत्ररत्नमजनयत् इतस्तया वनमध्ये कश्चिदेको मुनिर्दृष्टस्तस्मै तया सपुत्रया वंदनं कृतं, मुनिनापि धर्मोपदेशो दत्तः, ततस्तया निजदुःखानि कथयित्वा मुनिः पृष्टः हे भगवन् किं मयेदृक्कर्म बद्धं येनाहमेवंविधदुःखभाजनं जाता. मुनिनोक्तं पूर्वभवे त्वमेका सपत्नीयुता व्यवहारिभार्यासीत्, तस्यास्ते सपत्न्या जिनधर्मानुरागत्वाज्जिनप्रतिमापूजनानंतरं भोजनकरणे नियमोऽभूत्. त्वयैकदा समत्सरया द्वादश प्रहरावधि तां प्रतिमां रजःपुंजे निक्षिप्य तस्याः पूजनभोजनांतरायः कृतः, पश्चात्तां रुदंतीं दृष्ट्वा त्वया सा प्रतिमा ततो निष्कास्य तस्यै समर्पिता. तत्कर्मणा तवापि द्वादशवर्षावधि पतिविरहो बभूव. धर्मद्वेषेण सपत्न्याः कलंकदानेन चाद्यापि त्वं दुःखं सहसे.

☒ अथ त्वं धर्मं कुरु? धर्मत एव प्राणिनः सुखीभवंति. तत् श्रुत्वा तया सम्यक्त्वं गृहीतं.

इतोंजनामातुलः सूर्यकेतुनामा विद्याधरो विमानस्थो गगनमार्गे गच्छन् स्खलितविमानोऽधो भूमौ साधुं दृष्ट्वा वंदनायावतीर्णः, तत्रस्थामंजनामुपलक्ष्य तेनात्रागमनकारणं पृष्टं. तयापि सर्वं वृत्तांतं निरुप्य विलापः कृतः, तदा मातुलस्तामाश्वास्य सतनयधात्रीं विमानाधिरूढां विधायाग्रे चलितः, मार्गे मातुरुत्संगस्थितेन तेन बालेन घंटारवः श्रुतस्तदा घंटामुद्दिश्य यावत्स निजहस्तमग्रे करोति तावत्स विमानात्पतितस्तदांजना विविधविलापान् कर्त्तुं लग्ना.

अथ तं पतितं ज्ञात्वा सूर्यकेतुर्यावदधः पश्यति तावत्स बालो यत्पर्वतशिलोपरि पतितोऽस्ति सा पर्वतशिला चूर्णीभूतास्ति. ततस्तेन विमानं तत्र समुत्तारितं दृष्टश्च तत्रासौ बाल उपद्रवरहितो रममाणः, ततस्तं गृहीत्वा तन्मातुः समर्प्य तस्य शिलाचूर्ण इत्यभिधानं दत्तं.

अथ विमानस्थाः सर्वेऽपि निजनगरे प्राप्तास्तत्र मातुलेन महताडंबरेण तस्य जन्ममहोत्सवः कृतः, अंजनापि तत्र स्वकीयमखंडं शीलं पालयंती भर्त्तुर्नामाक्षरमालां जपंती धर्मध्यानपरा सपुत्रा तिष्ठति.

अथ स पवनंजयो वरुणं विजित्य रावणाज्ञया स्वगृहे समायातः, तत्र तेन निजपत्नीवृत्तांतं विज्ञाय विह्वलीभूतेन सर्वमपि तृणवत्परित्यज्य विलपितुमारब्धं. ततस्तेन वह्नौ प्रवेशेच्छा कृता. तदा रुषभदत्तेनोक्तं हे मित्र त्वं दिनत्रयं प्रतीक्षस्व? इतोऽहं तव प्रियां समानयिष्यामीत्युक्त्वा रुषभदत्तो विमानाधिरूढो गगनमार्गेणानेकराजनगराणि पश्यन् पृच्छंश्च सूर्यकेतुगृहे समागतः, पुत्रसहितां चांजनसुन्दरीं तत्र दृष्ट्वा हृष्टस्तयापि स

निजपतिकुशलोदंतं पृष्टस्तदातेनोक्तं मम सुहृत्त्वद्विरहेणाग्निप्रवेशं कर्त्तुं समुद्यतोऽस्त्यतस्त्वं शीघ्रं तत्रागच्छ? ततस्तां विमाने संस्थाप्य स प्रह्लादपुरे समागतस्तां दृष्ट्वा पवनंजयोऽपि प्रमोदं प्राप्तस्ततस्तेन महोत्सवपूर्वकं पुत्रस्य हनुमानिति नाम दत्तं. ततः प्रांते हनुमंतं राज्ये संस्थाप्य पवनंजयोंजनया सह दीक्षामादाय सद्गतिं गतः, हनुमानपि बहुकालं राज्यं प्रपाल्य रामलक्ष्मणयोः सेवां कृत्वा प्रांते बहुपरिवारेण सह दीक्षां गृहीत्वा श्रीशत्रुंजये संस्तारकं विधाय मोक्षं गतः.

इति श्रीशीलकुलके अंजनासुन्दरी कथा.

## मृगावती कथा—

☒ वत्सदेशे कौशांब्यां नगर्यां सहस्रानीकसूनुः शतानीकाभिधो नृपो राज्यं करोति. तस्य चेटकराजपुत्री सतीशिरोमणितुल्या मृगावत्यभिधाना राज्ञी वर्त्तते. क्रमेण गर्भवत्यास्तस्या रुधिरभृत्कुंडिकायां स्नानकरणदोहदोऽभूत्. परं तत्कार्यं हिंसामयं विज्ञाय तया राज्ञे तद्वृत्तांतो नो कथितः, परं दोहदाऽपूर्णत्वेन कृष्णपक्षीयचंद्रलेखेव सा दिनानुदिनं कार्श्यभावमापन्ना. एवं तां दुर्बलीभूतां विलोक्य राज्ञा तत्कारणं पृष्टं तदा तयोक्तं स्वामिन् दोहदापूर्णत्वेनाहं दुर्बलीभूतास्मि, परं स दोहदो हिंसामयोऽस्ति ततस्तं कथयितुं मे मनो नाभिलपति. महाग्रहेण पृष्टया तया निजदोहदो ज्ञापितस्तदा राज्ञोक्तं हे प्रिये त्वं चिंतां मा कुरु? यथा तव दोहदः सुखेन

पूरयिष्यते तथाहं करिष्यामि.

☒ अथ राज्ञा मंत्रिणमाहूय तद्दोहदपूरणोपायः पृष्टस्तदा मंत्रिणोक्तं स्वामिन् कुसुंभरसैः कुंडिकामापूर्य तस्यां राज्ञी सुखेन स्नानं करोतु.

☒ अथोक्तप्रकारेण राज्ञी निजदोहदं पूर्णीकृत्य यावत्कुंडिकातो बहिर्निर्गता तावद्गगनगामिना भारंडपक्षिणैकेन सा दृष्टा, ततस्तां मांसपेशीं मन्यमानोऽसौ पक्षिराट् निजचरणद्वयमध्ये समुत्पाट्याकाशे समुत्पतितः, राज्ञी बह्वाक्रंदं करोति सुभटा अपि हाहारवं कुर्वाणा इतस्ततो भ्रमंति, परं क्रमेण स पक्षी तु दृष्टिपथातीतो बभूव. राज्ञा ग्रामनगरदेशपर्वतवनकूपतडागादिषु तस्याः कृते बहुः शुद्धिः कारिता, परं सा न मिलिता. एवं च चतुर्दशवर्षाणि व्यतिक्रांतानि, राजा तु तद्वियोगानलदग्धांतःकरणः कुत्रापि स्वकीयात्मनि सुखं न लभते.

☒ अथैकदा तस्यामेव नगर्यां कस्यचित्स्वर्णकारस्य समीपे कोऽपि व्याधः कंकणैकं समादाय विक्रयार्थं समागतः, स्वर्णकारेण तत्कंकणं मृगावतीराज्ञीनामांकितमालोक्य कंकणयुतोऽसौ व्याधो नृपसमीपे समानीतः, राजा तत्कंकणं समुपलक्ष्य साक्षान्मिलितमृगावतीमिव निजहृदयेनास्पृशत्, चिंतितं च तेन नूनं मृगावती व्याघ्रादिवनवासिक्रूरप्राणिभिर्भक्षितैव दृश्यते. ततो राज्ञा भयकंपमानदेहो व्याधः प्रोक्तो भो भद्र त्वं भयं मा कुरु ! यदहं त्वांप्रति पृच्छामि तस्य त्वया सत्यमुत्तरं देयं. त्वं कोऽसि कुतश्च त्वयैतल्लब्धं ? भयकंपितहृदयो व्याधः

स्खलद्वचनो बभाण हे राजन् अहं ज्ञातितो मृगयुरस्मि, वनमध्ये पाशं मुक्त्वानेकजलचरस्थलचरखेचरजीवान् मारयामि, यतोऽस्माकं कुलक्रमागतमेतदेव कर्मास्ति.

⊠ अथैकदाहं वनवासिपशुमारणार्थं मलयाचले गतः, तत्रानेकचंदनतरुभिरलंकृतं सुरभिवातोन्माथितपथश्रमं नंदनवनोपमं मयैकं काननं दृष्ट्वा तत्र प्रविष्टं, तूर्णमेव मयैको महासर्पो निजेच्छयेतस्ततो भ्रमंश्च दृष्टः, तस्य फणोपरि च घनतरुनिकरविस्तृतगहनगहनांधकारापहारिणं मनोहरं मणिमेकं दृष्ट्वा मनःप्रादुर्भूततद्ग्रहणाभिलाषेण करालकरवालो मया निःकोपीकृतः, यावच्चाहं तस्य मारणाय धावितस्तावत्पृष्टे निकटस्थघनवृक्षालिनिकुंजान्मा मेति शब्दो मे श्रवणगोचरीबभूव. वलितकंधरेण मया पृष्टे विलोकितं, तदैवैको निजमनोहररूपनिर्लज्जीकृतमकरध्वजश्चंद्रबिंबानुकारिवदनमंडलः कोमलकमलानुकारिकरुणारसार्द्रीभूतविलोचनो द्वात्रिंशल्लक्षणलक्षितदेहो मया तापसकुमारो दृष्टः, तं दृष्ट्वा मया पृष्टं भो तापसकुमार मणिप्राप्त्यर्थं सर्पमारणाय समुद्यतं मां त्वं कथं निवारयसि? एवंविधममूल्यमणिरत्नं पुनर्मया क लभ्यते? तत् श्रुत्वा करुणारसैकनिमितांतःकरणेन तापसकुमारेणोक्तं यदि तव मणिरत्नग्रहणेच्छास्ति तर्हि क्षणं त्वं प्रतीक्षस्व? अहं तुभ्यमेतादृग्भूरिमणिरत्नगणैर्युतमाभूषणं मम मातुः पार्श्वादानीय दास्यामि. तस्यैतानि मनोहरवचनानि श्रुत्वा मयापि करवालः कोपे निक्षिप्तः, तापसकुमारेणापि द्रुतं निजाश्रमे गत्वा निजमातुः पार्श्वादेतत्कंकणमानीय मह्यं दत्तं. अहमप्येतत्कंकणं गृहीत्वा क्रमेण गृहे समायातः, पंचवर्षावधि मयैतद्गृहमध्ये एव रक्षितं. अद्य पुनर्निर्धनत्वेन भार्यया प्रेर्यमाणेन विक्रयार्थं मयैतद्गृहादानीय स्वर्णकाराय दर्शितं,

परं ममाभाग्यवशात्सोऽयं हतपरः स्वर्णकारः कंकणयुतं मामत्र भवत्समीपे समानीतवान्, न जानेऽथमेऽत्र कावस्था भविष्यतीति कथयित्वा स तूष्णिं स्थितः

⊠ अथ व्याधोक्तवृत्तांतं निशम्य राज्ञा चिंतितं नूनं मृगावती सपुत्राद्यापि जीवति. ततो राज्ञा तं व्याधं भयव्याकुलं विज्ञाय वस्त्राभूषणादिभिः संतोषयामास. कथितं च तेन त्वं मया सह समागत्य तत्स्थानं मे दर्शय? अतः परमपि त्वामहं बहुप्रकारपूर्वकं द्रव्यादिभिः संतोषयिष्यामि. तत् श्रुत्वा व्याधोऽपि निर्भयो हृष्टः सन् परिवारयुतराज्ञा सह चचाल. कियद्दिवसानंतरं राजा मलयाचले तद्वनं प्राप, तदा व्याधेनोक्तं स्वा-मिन्ममात्र स्थाने तापसकुमारेण कंकणं दत्तं, किं चेतो निकटे तापसानामाश्रमोऽस्ति, तत्र च मादृशाः पाप-भारभारितदेहा व्याधास्तापसश्रापभयेन गंतुं न शक्नुवंति अतोऽहमस्मात्स्थानादेव पश्चाद्वलिष्ये. तदा राज्ञा बहु-धनदानपूर्वकं स पश्चाद्वालितः.

⊠ अथ राजापि निजपरिवारं तापसाऽक्षोभकृते तत्रैव संस्थाप्य स्वयमेकाकी तापसाश्रमंप्रति चलितः, अग्रे गच्छता तेन परित्यक्तपरस्परवैरान् व्याघ्रमृगादिश्वापदानप्येकत्रस्थाने संभूय मिलितान् दृष्ट्वा निजमनसि चमत्कृतेन राज्ञा चिंतितं नूनमिदं किंचिच्छांतमेव प्रभाविकं स्थानमनुमीयते. इतस्तेनैकतापसयुतोऽतिमनोहरस्ताप-सकुमारो दृष्टः, राज्ञा तत्समीपे गत्वा प्रणामं च कृत्वा पृष्टं भो महात्मन् कस्यायं कुमारोस्ति? तत् श्रुत्वा तापसेनोक्तं शृणु तद्वृत्तांतं. अयं ब्रह्मभूतितापसस्याश्रमोऽस्ति, तस्य शिष्यो विश्वभूतिनामास्ति, स

चैकदा चंदनवने समागतस्तत्र च तेन कौसुंभरागाभिषिक्तदेहा महिलैका मूर्छिता दृष्टा, दयया वारिणा सिंचयित्वा च सज्जीकृता. तदा सचैतन्यया तया प्रोक्तं 'हे कौशांबीपते शरणं भव' ततो विश्वभूतिना सा भगिनीति कृत्वालापिता स्वकीयं मृगावतीति नाम कथयित्वा सकलमपि निजवृत्तांतं निवेदयामास. ततस्तेन सा ब्रह्मभूतितापससमीपे समानीता, तेनापि च सा पुत्रीति कृत्वा मानिता. कियद्दिवसानंतरं गर्भवत्या तया शुभसमये पुत्रैकः प्रसूतस्तस्य जन्मोत्सवानंतरं ब्रह्मभूतिना चिंतितं बालस्यास्य किं नाम दीयते? इतो 'बालस्यास्य उदयन इति नाम देयं' एवंविधा गगनवाणी जाता. तदा हृष्टेन कुलपतिना तस्य 'उदयन' इति नाम दत्तं. क्रमेण बालोऽसौ सकलकलासंपूर्णां वृद्धिं प्राप्तः सन् महाबलवान् योद्धो जातो हस्तिना सहापि युद्धं करोति. कस्यापि तिरस्कारं न सहते, सोऽयं दुर्धर उदयनकुमारोऽस्ति अहं च सैष विश्वभूतितापसोऽस्मि. अस्य बालस्य माता मृगावत्यप्यधुनात्र समायास्यति, अथैवममृतरसधारातुल्यानि तस्य वचनानि श्रुत्वा शतानीको राजात्यंतं प्रमुदितो हस्तावग्रे कृत्वा तं तापसकुमारंप्रति कथयामास हे पुत्र त्वमत्र ममोत्सगे समागच्छ? तत् श्रुत्वाऽपरिचितेनोदयनेन कथितं विना शतानीकं मां पुत्र इतिकथनपरस्य पार्श्वेऽप्यहं न समागच्छामि. इतस्तत्र तापसीवृंदपरिवृता तारकगणवेष्टितशशिलेखेव परिहितवल्कलवस्त्रा मृगावती ब्रह्मभूतिकुलपतिप्रणामाय समागता. तां विलोक्य समुपलक्ष्य च गतधैर्येण राज्ञा प्रोक्तं हे प्रिये विरहानलदग्धं मां निजनेत्रवीक्षणपीयूषधाराभिः सिंचय? मृगावत्यपि तमुपलक्ष्य नयनांबुदनिर्गतहर्षाश्रुजलधाराभिस्तस्य विरहाग्निमुपशामयंती चरणक्षालनं कुर्वंती मौनमालब्य

स्थिता. इत उदयनेन मातुः समीपमागत्योक्तं हे मातः कोऽयं परमस्नेहवान् जनो यो मां पुत्र इत्युक्त्वाह्वयति. मात्रोक्तं हे पुत्र तव सुभाग्याकृष्टोऽयं तव जनकः शतानीको राजा तव मिलनायात्र समागतोऽस्ति, तत् श्रुत्वातिप्रमोदं प्राप्त उदयनोऽपि तात तातेति जल्पन् पितुश्चरणे पतितः, शतानीकोऽपि तमुत्थाप्य स्वोत्संगे स्थापयित्वा चंद्रमसं संप्राप्योदधिरिवोल्लासभावं प्राप्तः, इतस्तापसा एनं वृत्तांतं ब्रह्मभूतिकुलपतये निवेदयामासुः, तदा ब्रह्मभूतिरपि तत्रागत्य निजैकं दक्षिणकरमूर्ध्वीकृत्य कथयामास भो राजन् त्वं दिष्ट्या वर्द्धसे ? साष्टांगप्रणामं विधाय राज्ञोक्तं भो महात्मन् भवत्प्रसादादपारसंसारसागरे पतितं प्रियारत्नं मयाद्य संप्राप्तं. ततः कुलपतिनोक्तं भो इयं मृगावती महासती गंगोरुजलनिर्मलशीला त्वया ज्ञातव्या. इतो राजा तत्र कियत्कालावधि स्थित्वा प्रियापुत्रसहितो निजनगरे समागतः, हृष्टैर्नगरलोकैस्तस्य प्रवेशमहोत्सवः कृतः, शतानीको राजा निजप्रासादे समागत्य मृगावत्या सह केलिकौतुकैश्चिरविरहजं दुःखं दूरीकारयामास.

☒ अथैकदा पुत्रयुतसभास्थितस्य नृपस्य पार्श्वे कोऽपि वीणावादकः समायातः, कथितं च तेन नास्ति स कोऽपि जनो जगति यो मया सह वीणावादं कुर्यात्. तत् श्रुत्वोदयनकुमारेण निजवीणा तथा वादिता यथा सभाजनयुतः स वीणावादकोऽपि महदाश्चर्यं प्राप्तः, हारितश्च कुमारपादयोः पतितस्ततो राज्ञा पृष्टं भो वत्स त्वयेयं कला क्वाभ्यस्ता ? कुमारेणोक्तं हे तात ? मयैकदा तत्र चंदनवनमध्ये व्याधव्यापाद्यमानः सर्पैको दृष्टः, कृपाप्रादुर्भावार्द्रांतःकरणेन च मया व्याधंप्रति मम मातुः कंकणं समर्प्य तस्मै सर्पायाभयदानं दत्तं. इतोऽसौ

सर्परितरोभूय देवीभूतो ममाग्रे समागत्योवाच हे उदयन अहं तव पूर्वभवमित्रमस्मि, ते दयार्द्रभावतश्च तुष्टो-ऽस्मीत्युक्त्वा स मामेतां वीणां वादनवरदानपूर्वकं दत्त्वा तिरोऽभूत्.

⊠ अथैकदा हृष्टेन राज्ञोदयनाय युवराजपदवी दत्ता. इतः कौशांबीनगरीवास्तव्यः सुरप्रियनामा कश्चि-च्चित्रकारः साकेतपुरे गतः.

⊠ अथ तत्र नगर्यामेका यक्षमूर्तिरस्ति, तां मूर्तिं राजाज्ञया प्रतिवर्षमेकैकश्चित्रकारश्चित्रयति, स च चित्र-कारस्तस्मिन्नेव दिने मृत्युमासादयति, यदा च न चित्रयति तदा सर्वलोकानां मरणसंकटमायाति. तद् दृष्ट्वा राज्ञा सर्वचित्रकाराणां क्रमो बद्धः.

⊠ अथ यस्य चित्रकारस्य गृहे पूर्वोक्तः कौशांबीवास्तव्यश्चित्रकारः प्राघूर्णकः समागतस्तस्यैव चित्र-कारस्य यक्षमूर्तिचित्रकृते तदा वारकः समागतस्ततोऽसौ विलापं कर्तुं लग्नः, प्राघूर्णकेन तत्कारणं पृष्टोऽसौ सकलवृत्तांतं कथयामास. तदा प्राघूर्णकेनोक्तं त्वं मा भयं कुरु? अद्य तव स्थानेऽहं यक्षाकारं करिष्यामीत्युक्त्वा तेन चिंतितं नूनमविधिकृतचित्रात्तोऽयं यक्षश्चित्रकारं मारयतीति विचार्य स स्नानपूर्वकं पवित्रवस्त्राणि परिधाय मुखेऽष्टपुटवस्त्रं च बद्ध्वा चित्ररंगद्रव्याणि च पवित्रभाजने स्थापयित्वा लेखिनीं चापि पवित्रीकृत्य भक्तिपूर्वकं यक्षमूर्तिं चित्रयामास. ततो निजकरद्वयं योजयित्वा स्तुतिं च कृत्वा तेन विज्ञप्तं भो यक्षराज मदपराधं क्षमस्व?

☒ अथ तस्य भक्त्या संतुष्टो यक्षः प्रत्यक्षीभूय तं वरार्थं प्रार्थयामास. चित्रकारेणोक्तं त्वं जीवहिंसां त्यज मह्यं च तां कलां देहि ? यथाहं कस्यापि प्राणिनोंगांशमात्रविलोकनेनापि तस्य संपूर्णरूपालेखनशक्तियुक्तो भवामि. यक्षेण तदुक्तं सर्वं कृतं.

☒ अथ स चित्रकारः क्रमेण कौशांब्यां समागत्य राजादेशतो नृपप्रासादं चित्रयितुमारब्धवान्. दैवयोगात्तत्रापवर्गांतःस्थाया मृगावत्या दक्षिणकरांगुष्टस्तेन दृष्टस्तदा तेन कुतूहलतो मृगावत्याः संपूर्णरूपं भित्तावालेखितं, अकस्माच्च तस्मिंश्चित्रे राज्ञ्या गुह्यस्थाने मषीबिंदुः पतितस्तदा तेन स बिंदुर्द्विवारं दूरीकृतस्तथापि तृतीयवारमपि तत्रैव मषीबिंदुः पतितस्तदा तेन ज्ञातं यत्तत्र स्थाने नूनं तिलांकमस्ति. ततस्तेन स बिंदुस्तत्रैव रक्षितः.

☒ अथैकदा राजा निजप्रासादचित्राणि विलोकयितुं समागतस्तदा राज्ञ्याश्चित्रं गुह्यस्थानगततिलांकितं विलोक्य चित्रकारं प्रति कुपितः, ततो राजा चित्रकारमाहूय तत्स्वरुपमपृच्छत्. तदान्यैरपि सर्वचित्रकारैरुक्तं स्वामिन्नस्य देवेन तत्संबंधिवरो दत्तोऽस्ति. तदा राज्ञा तत्परीक्षार्थमेकायाः कुब्जदास्या अंगुष्टस्तस्मै दर्शितस्तदा तेन चित्रकारेण तथाभूतं तस्या स्वरूपमालेखितं, तथापि क्रुद्धेन राज्ञा तस्य चित्रकारस्य चत्वारो दक्षिणांगुल्यश्छिन्नाः, ततोऽसौ दूनः साकेतपुरे समागत्य यक्षस्य स्तुतिपरो बभूव, तदा यक्षेण तस्यवामकरे चित्रकरणवरो दत्तः, पश्चात्तेन मृगावत्याः सविशेषं स्वरूपमालेख्य चंडप्रद्योताय दर्शितं. तद् दृष्ट्वा व्यामोहितेन राज्ञा शतानी-

कंप्रति स्वप्रधानं मुक्त्वा मृगावती मार्गिता, परं शतानीकेन स निर्भर्त्स्य निष्कासितः. तदा चंडप्रद्योतो निजसैन्यमादाय कौशांबींप्रति चलितः, इतोऽत्र शतानीकोऽतिसाररोगेण मृतस्तदा मृगावत्या निजशीलरक्षणकृते निजबुद्धेरुपयोगः कृतः, तया चंडप्रद्योताय संदेशः प्रेषितो यन्मम भर्त्ता तु मृतः, उदयनश्च लघुरस्ति, अतोऽधुना त्वमेव ममाधारोऽसि. परं प्रथमं त्वयोदयननगररक्षणकृते शत्रुभिरप्यजेयो धनधान्यपूर्णो वैशालीवप्रः कार्यः, मोहमूढेन चंडप्रद्योतेन तथैव कृतं.

☒ अथ तस्मिन् वप्रे स्थितया मृगावत्या चंडप्रद्योतंप्रति संदेशः प्रेषितो रे मूर्ख मया त्वेषो वप्रो मम शीलनगररक्षणकृते त्वत्पार्श्वे कारापितोऽस्ति. तत् श्रुत्वा क्रुद्धश्चंडप्रद्योतस्तत्रागत्य वैशालीग्रहणकृतबहुप्रयत्नोऽपि निष्फलत्वं प्राप. इतो मृगावत्या चिंतितं यदि श्रीवीरप्रभुरत्र समागच्छेत्तदाहं दीक्षिता भवामि. इत श्रीवीरप्रभुरपि लाभं विज्ञाय तत्र समवसृतस्तस्यातिशयप्रभावतश्च चंडप्रद्योतस्य मनसि वैरमुपशमितं, ततो मृगावत्या श्रीवीरप्रभुपार्श्वे दीक्षा ग्रहीता, ततः प्रभुदेशनां श्रुत्वा प्रतिबुद्धश्चंडप्रद्योतो वैशाल्यामुदयनस्य राज्याभिषेकं कृत्वा स्वस्थाने गतः. मृगावत्या महासत्या चंदनबालासमीपे एकादशांगानि पठितानि.

☒ अथैकदा कौशांब्यां श्रीवीरप्रभुवदनार्थं सूर्यचन्द्रौ निजमूलविमानयुतौ समागतौ, संध्याकाले सर्वसाध्व्यः स्वस्थाने गताः, परं मृगावती प्रमादवशेन सूर्यविमानतेजसा रात्रावपि दिवसं मन्यमाना तत्रैव समवसरणे स्थिता, इतः सूर्यचन्द्रौ स्वस्थाने गतौ, तदा रात्रिं ज्ञात्वा शंकितभीता मृगावती नगरमध्ये चंदनबालासमीपे

उपाश्रये प्राप्ता. तदा चंदनबालयोक्तं भो महानुभावे एष साध्व्या आचारो नास्ति. तत् श्रुत्वा निजप्रमाददोषं विज्ञाय मृगावती मुहुर्मुहुर्निजापराधं चामयामास, शुभध्यानतश्च तस्याः केवलज्ञानं समुत्पन्नं, ज्ञानेन तया तमस्यपि सर्प आगच्छन् दृष्टस्तदा तया चंदनबालायै कथितं सर्पः समायाति, चंदनयाक्तं कथं त्वयैतद् ज्ञातं ? तयोक्तं भवत्प्रसादान्मम केवलं समुत्पन्नमस्ति. तदा केवल्याशातनाभयाच्चन्दनबालाया अपि चामयंत्याः केवलोत्पत्तिर्जाता, क्रमेण च ते मोक्षं गते. ॥ इति ॥

मूलम्—अच्चंकारिअचरिअं । दट्ठुण को न धुणाइ किर सीसं ॥
जा अखंडिअसीला । भिल्लवइकयत्थिआवि ॥ १६ ॥

व्याख्या—अच्चंकारिभट्टायाश्चरित्रं दृष्ट्वा को निजशीर्षं न धुनोति ? अपितु सर्वेऽपि धुन्वंति चमत्कारं च प्राप्नुवंति या अच्चंकारीभट्टा अखंडशीले स्थिता पल्लीपतिकरगता बहुकदर्थनां प्राप्ता, परं तया स्वशीलं रक्षितं. ॥ १६ ॥

## अत्राच्चंकारीकथा—

☒ उज्जयिन्यां नगर्यामेको द्विजस्तिलसंग्रहं करोति तेनासौ लोके तिलभट्ट इत्युच्यते. तस्य धनश्री-

नाम भार्या कुशीला परपुरुषरक्तास्ति, तया चापवरकसंगृहीताः सर्वतिला भक्षिताः ।

☒ अथैकदा स द्विजो निजक्षेत्रे रात्रौ स्थितोऽभूत्, तदा तया कुशीलया पिशाचिनीरूपं विधाय तत्र गत्वा स भाषितः कथितं च तिलान् भक्षयामि वा तिलभर्तृं भक्षयामि ? तेन भीतेन द्विजेनोक्तं तिलान् भक्षय ? ततोऽत्यंतं भयाकुलः स द्विजो द्रुतं गृहे समागत्य मृतः, संबंधिनस्तं वनमध्येऽग्निना ज्वालयामासुः, परं तस्य चितामनुपशाम्यैव ते सर्वे गृहं समागताः, इतस्तच्चितोत्पतिताग्निकणतो वनमध्ये दावानलः प्रकटीभूतस्तदा तत्र कायोत्सर्गस्थ एको जैनमुनिर्दग्धः, स च नगरमध्ये समागतस्तदा तस्य चिकित्साकृते नगरस्थितैर्मुनिभिर्लक्षपाकतैलशुद्धिकरणायाच्चंकारीभट्टागृहे समागत्य धर्मलाभो दत्तः, प्रोक्तं च तया भगवन् किमर्थं यूयं समागताः ? साधुभिः प्रोक्तं भो श्राविके लक्षपाकतैलार्थं समागताः स्मः, तत् श्रुत्वा सा हर्षिता. इतः सौधर्मेन्द्रेण निजसभायामच्चंकारीभट्टायाः क्षमा प्रशंसिता, तदा कश्चिद्देवस्तत्परीक्षार्थं तत्र समागतः, अथाच्चंकार्या दास्यै प्रोक्तं गृहमध्याल्लक्षपाकतैलकुंपिकामानय ?.

☒ अथ दासी यावत्तां कुंपिकां समानयति तावददृश्यदेवेन सा कुंपिका पातिता, नष्टं च सर्वंतैलं, अथ द्वितीया तृतीयापि तथैव पातिते, ततश्चतुर्थीमध्यात्तेन साधवे तैलं प्रतिलाभितं. तदा साधुभिरुक्तं हे भद्रे त्वया दास्यै कोपो न कार्यः, तत् श्रुत्वाच्चंकार्योक्तं हे भगवन् मया क्रोधफलानि बहूनि दृष्टानि, तदादितो मम कोपकरणे नियमोऽस्ति. साधुभिरुक्तं त्वया क्रोधफलानि कथं दृष्टानि ? तदा सा बभाण. अस्मिन्नेव

नगरे धनश्रेष्टिनः कमलश्रीभार्यातः समुद्भूतानां सप्तपुत्राणामुपर्यहमचंकारीभट्टाभिधाना पुत्री जाता. मातापित्रोरतीववल्लभत्वान्मम कथनकरणतत्परेण सुबुद्धिमंत्रिणा सहाहं परिणायिता.

☒ अथैकदा मया मंत्रिणे कथितं भवद्भिर्निशायां त्वरितमागंतव्यं, तेनापि तत्प्रतिपन्नं.

☒ अथ ज्ञातैतद्वृत्तांतेन राज्ञैकदा स मंत्री रात्रौ बहुवारं रक्षितः, द्विप्रहरानंतरं स गृहे समागतः परं मया द्वारं नोद्घाटितं, तदा तेनोक्तं हा दैव मयेयं कुरंडा क्व परिणीता ? तत् श्रुत्वा क्रुद्धाहं द्वारमुद्घाट्य गृहान्निर्गता मंत्री च गृहे प्रविष्टः, आभूषणयुता च पथि गच्छंत्यहं चौरैर्धृता, चौरपतिश्च मां निजभार्यां कर्तुमुत्सुकोऽभूत्परं मयैतन्न मानितं. तदा मम शीलं दृष्ट्वा शापभीतेन तेनाहं सार्थवाहाय विक्रीता. सार्थवाहेनापि भार्याकृते मम गाढप्रार्थना कृता. परं मां दृढचित्तां विज्ञाय क्रुद्धेन तेनाहं बब्बरकुले विक्रीता. तत्रानार्यलोकैर्मम रुधिरं निष्कास्य वस्त्राणि रंजितानि, एवं च प्रतिदिनं करणतोऽहं तत्र दुर्बला जाता.

☒ अथैकदा व्यापारार्थमागतेन मम भ्रात्रा बहुद्रव्यव्ययेनाहं तेभ्यो व्याधेभ्यो मृगीव मोचिता ततस्तेनात्रागत्याहं पुनर्भर्त्रे समर्पिता. अतः कारणात् हे भगवन् मम क्रोधकरणे नियमोऽस्ति. तत् श्रुत्वातिहृष्टः साधवस्तैलमादायोपाश्रये प्राप्ताः.

☒ अथ तस्य क्षमागुणेन तुष्टेन देवेन प्रत्यक्षीभूयोक्तं हे सुशीले मया तव क्षमापरीक्षार्थं त्वयो घटा भग्ना अतो मां क्षमस्व ? इत्युक्त्वा तस्यां घटांस्तैलपूर्णान् सज्जीकृत्य स स्वस्थाने गतः, अचंकारीभट्टापि प्रांते

क्षमायुक्तशुद्धशीलाराधनपूर्वकं कालं कृत्वा सद्गतौ गता.

॥ इति श्री शीलकुलके अच्चंकारीभट्टाकथा ॥

मूलम्–निश्रमित्तो नियभाया । नियजणऊ नियपिअमहो वावि ॥
नियपुत्तोवि कुसीलो । न वल्लहो होइ लोआणं ॥ १७ ॥

व्याख्याः—कुशीलः शीलरहितो निजसुहृद् निजभ्राता निजजनको निजपितामहो वा निजपुत्रोऽपि लोकानां वल्लभो न भवति. ॥ १७ ॥

मूलम्—सव्वेसिंपि वयाणं । भग्गाणं अत्थि कोइ पडिआरो ॥
पक्कघडस्सव कन्ना । नाहोइ सीलं पुणो भग्गं ॥ १८ ॥

व्याख्याः—प्राणातिपातादिसर्वेषामपि व्रतानां कदाचिदज्ञानतया भग्नानां कोऽपि प्रतिकारोऽस्ति, अर्थात्तेषां प्रायश्चित्तेनापि शुद्धिर्भवति, परं पक्वघटकर्णवद्भग्नं शीलं कदाचिदपि नो सज्जीभवति. तस्मात् शीलं निरतिचारतया पालनीयं ॥ १८ ॥

मूलम्—वेआलभूअरक्खस । केसरिचित्तकगइंदसप्पाणं ॥
लीलाइ दलइ दप्पं । पालंतो निम्मलं सीलं ॥ १९ ॥

व्याख्याः—वेतालभूतराक्षसकेसरिचित्रकगजेन्द्रसर्पाणां दर्पं निर्मलं शीलं पालयन्मनुष्यो लीलया हेलया दलति ॥ १९ ॥

मूलम्—जे केइ कम्ममुक्का । सिद्धा सिज्झंति सिज्झिहिंति तहा ॥
सव्वेसिं तेसिं बलं । विसालसीलस्स उल्ललिअं ॥ २० ॥

व्याख्या—ये केऽपि कर्मभिर्मुक्ताः सिद्धाः सिद्धयन्ति भविष्यत्काले च सिद्धिं प्रयास्यंति तेषां सर्वेषां विस्तीर्णशीलस्य दुर्ललितं विलसितं बलं ज्ञातव्यं ॥ २० ॥

॥ इति श्रीशीलकुलकं समाप्तं ॥

॥ अथ श्रीतपःकुलकं प्रारभ्यते ॥

मूलम्—सो जयउ जुगाइजिणो । जस्संसे सोहए जडामउडो ॥
तव फाणग्गिप्पजलिअकम्मिंधणधूमलहरिव्व ॥१॥

व्याख्या—स श्रीयुगादिजिनो जयतु, यस्य स्कंधे जटामुकुटस्तपोध्यानरूपाग्निना ज्वलितानि यानि कर्मरूपेंधनानि तेषां लहरीव श्रेणिरिव शोभते इति गाथार्थः ॥ १ ॥

☒ यदा श्रीऋषभदेवप्रभुणा दीक्षावसरे लोचः कृतस्तदेंद्रस्य कथनतः पंचमीमुष्टिपरिमिताः केशा अलुंचिता एव रक्षितास्ते च सुवर्णकलशोपरि नीलकमलानिवाशोभंत.

मूलम्—संवच्छरिअतवेणं । काउस्सग्गंमि जो ठिउं भयवं ॥
पूरिआनिअपइन्नो । हरउ दुरिआइं बाहुबली ॥२॥

व्याख्या—वार्षिकं तपः कृत्वा यो भगवान् कायोत्सर्गे स्थितः स पूरितनिजप्रतिज्ञो बाहुबलिनामा मुनिर्दुरि-
तानि पापानि हरतु विनाशयतु ॥ २ ॥

☒ बाहुबलिकथा पूर्वं श्री ऋषभदेवचरित्रे कथिता.

मूलम्—अथिरपि थिरं वंकं-पि उज्जुयं दुलहंपि होइ सुलहं ॥
दुसज्झंपि सुसज्झं । तवेण संपज्जए कज्जं ॥३॥

व्याख्या—तपःप्रभावेनास्थिरमपि कार्यं सुस्थिरं संपद्यते, वक्रमपि च ऋजु सरलं भवति, दुर्लभमपि कार्यं
सुलभं भवति यथाऽभयकुमारेणाष्टमतपसा धारिण्या राज्या अकालेपि मेघवृष्टिदोहदः पूर्णितः पुनर्दु-
दुःसाध्यमपि कार्यं सुसाध्यं भवति, यथा चक्रिणामष्टमतपसा मागधवरदामप्रभासकृतमालप्रमुखा देवा
वशीभवंति, अर्थात्तपसा चिंतितं सर्वमपि कार्यं संपद्यते ॥ ३ ॥

मूलम्—छठ्ठं छठ्ठेण तव । कुणमाणो पढमगणहरो भयवं ॥
अक्खीणमहाणसीउ । सिरिगोयमसामिउ जयउ ॥४॥

व्याख्या—षष्टं षष्टेन तपसा पारणं कुर्वन् प्रथमगणधरः श्रीगौतमस्वामी भगवान् अक्षीणमहानसीलब्धियुतो जयतु. लब्धिवान्मुनिर्यद्वस्तुमध्ये यावन्निजदक्षिणांगुष्टं धारयति तावत्तद्वस्त्वक्षीणमेव भवति, स्वयं भुक्ते सति च तत्क्षीयते, सा महानसीलब्धिरुच्यते ॥ ४ ॥

अथ श्रीगौतमस्वामिवृत्तांतस्त्विवत्थं

☒ मगधदेशे गोर्वरग्रामे वसुमतिनामैको धनाढ्यो द्विजो वसति, तस्य च पृथ्व्यभिधाना भार्या वर्त्तते. तत्कुक्षिसंभवा इंद्रभूतिरग्निभूतिर्वायुभूतिश्चेति त्रयः गौतमगोत्रिया पुत्रा आसन् इतोऽपापायां नगर्यां सोमिलद्विजकारितयज्ञे ते इंद्रभूत्याद्या एकादश याज्ञिका द्विजा निजनिजशिष्ययुता मिलित्वा यज्ञं कुर्वंति. तदा तत्र महसेनवनखंडे श्रीवीरप्रभुः समवसृतो देवैश्च समवसरणं रचितं. तं महिमानं दृष्ट्वेंद्रभूतिः प्रभुं सर्वज्ञमश्रद्दधन् निजपंचशतशिष्यपरिवारयुतः प्रभुसमीपमागतस्ततः स्वामिना तन्मनोगतो जीवसंबंधिसंशयो दूरीकृतस्ततस्तेन वैराग्यमासाद्य निजपरिवारैः सह प्रभोः समीपे दीक्षा गृहीता, एवं च तैः सर्वैरप्येकादशयाज्ञिकद्विजैः प्रभोः समीपे निजसंदेहान् दूरीकृत्य निजनिजपरिवारयुतैर्दीक्षा गृहीता. इंद्रभूतये च प्रभुणा गणधरपदवी दत्ता, तेन द्वादशांगी रचिता क्रमेण च स श्रीगौतमस्वामी चतुर्ज्ञानधरो महालब्धिवान्महातपस्वी षष्टं षष्टेन पारणं करोति,

☒ एकदा श्रीगौतमस्वामिना चंपायामागत्य शालमहाशालादीनां प्रतिबोध्य दीक्षा दत्ता, तैः सह च स

यावन्महावीरप्रभुपार्श्वे समायाति तावत्तेषां नवदीक्षितानां केवलज्ञानं पथि समुद्भूतं, ते च तत्रागत्य केवलिपर्षदि समुपविष्टास्तदाश्चर्यं प्राप्तेन गौतमस्वामिना प्रभुः पृष्टः हे भगवन्नेते केवलिपर्षदि कथं समुपविष्टाः ? प्रभुणोक्तं तेषां केवलज्ञानं समुत्पन्नमस्ति. तदा गौतमेन तान् क्षामयित्वा स्वामिनंप्रत्युक्तं हे भगवन् मम केवलज्ञानं कदा समुत्पत्स्यते ? प्रभुणोक्तं तत्रापि समुत्पत्स्यते. गौतमेनोक्तं तस्य चिन्हं कथयत ? प्रभुणोक्तं यः कोऽपि निजतपोलब्धिबलेनाष्टापदयात्रां करोति रात्रौ च तत्रैव वसति स मोक्षं गच्छेत्. तत् श्रुत्वा कोडिन्नदिन्नसेवालाख्यास्त्रयस्तापसाः प्रत्येकं पंचशतशिष्यपरिवृत्ता अष्टापदाग्रे समायाताः, तत्रैकोपवासकारिणः प्रथममेखलायां, षष्टतपःकारिणो द्वितीयमेखलायामष्टमतपःकारिणश्च तृतीयमेखलायां स्थिताः, परं ततोऽग्रे गंतुं शक्ता न बभूवुः, इतः श्रीगौतमस्वामिनं दृढपुष्टशरीरयुतं तत्रागच्छंतं विलोक्य ते चिंतयामासुरेषः श्रीगौतमः शरीरभाराक्रांतः कथमूर्ध्वं गमिष्यतीति चिंतयतां तेषां पश्यतामेव निजतपोलब्ध्या श्रीगौतमः क्षणैकमध्येऽष्टापदोपरि संप्राप्तस्तत्र 'जगचिंतामणीति' चैत्यवंदनं विधाय स जिनालयाद्बहिर्निशायां तत्रैव स्थितः, प्रभाते तत्र मिलितानां विद्याधरदेवानां पर्षदि तेन देशना दत्ता. तदा तत्रायातश्रीवज्रस्वामिजीवतिर्यग्जृंभकदेवः पुष्टशरीरं श्रीगौतमस्वामिनं निरीक्ष्य हसितो यन्मुनयोऽपि किमीदृशाः पुष्टदेहाः संभवंति ? तदा श्रीगौतमेन तस्याभिप्रायं विज्ञाय कंडरिकपुंडरीकसंबंधमाख्याय तत्संदेहो दूरीकृतः. पश्चात्तेन देवेन क्षामितं. तत. पश्चाद्वलमानेन श्रीगौतमेन पंचशततापसानां दीक्षां दत्ता. तथाऽक्षीणमहानसीलब्ध्या पात्रमेकं क्षीरेण भृत्वाष्टमतपःकारिणां तेषां साधूनां

पारणं कारितं. तत्र च तेषां केवलज्ञानं समुत्पन्नं, द्वितीयपंचशतानां च पथि केवलं समुत्पन्नं, तृतीयपंचशतानां च प्रभुमसमवसरणे दृष्टे सति केवलमुत्पन्नं.

☒ अथ श्रीगौतमेन त्रिंशद्वर्षाणि यावत्प्रभुसेवां विधाय चतुर्ज्ञानयुतेनापि प्रभोः प्रश्नपूर्वकमनेके संशया निवारिताः, अथांत्यचतुर्मासेऽपापायां स्थितेन प्रभुणा निजनिर्वाणसमयं विज्ञाय देवशर्मद्विजप्रतिबोधायासन्नग्रामे श्रीगौतमः प्रेषितः, तं प्रतिबोध्य प्रभाते समागच्छन् श्रीगौतमो देवोक्तश्रीवीरनिर्वाणवार्त्तामाकर्ण्य क्षणं शून्यचित्तीभूय बालवदनेकान् विलापानकरोत्. ततस्तेन चिंतितमहो वीतरागास्तु निस्नेहा एव भवंति, अहं तु मृषैव मोहं करोमीत्याद्यनित्यभावनां भावयता केवलज्ञानमासादितं, इंद्रादिभिश्च तस्य महोत्सवः कृतः, सहस्रपत्रकमलं चासनीकृत्य तेन देशना दत्ता, एवं द्वादशवर्षपर्यंतं केवलिपर्यायं पालयित्वा वैभारगिरौ संस्तारकं विधाय स मोक्षं गतः

॥ इति श्रीतपःकुलके श्री गौतमगणधरकथा ॥

मूलम्—सोहइ सणंकुमारो । तवबलखेलाइलद्धिसंपन्नो ॥
निट्ठूअक्खवलयंगुलिं । सुवण्णसोहं पयासंतो ॥ ५ ॥

व्याख्याः—स श्रीसनत्कुमारश्चक्री शोभते, यस्तपोबलेन खेलादिलब्धिसंपन्नः श्लेष्मादिलब्ध्युपेतः सन् केवलं मुखवारिणा स्वांगुलीं विलिप्य देवानां पुरः सुवर्णशोभामप्रकाशयत्. ॥ ५ ॥

सनत्कुमार वृत्तांतस्त्वित्थं—

☒ कुरूदेशे हस्तिनागपुरे नगरेऽश्वसेनाभिधो राजा, सहदेवी च राज्ञी, तयैकदा चतुर्दशमहास्वप्नसूचितः सनत्कुमाराह्वयस्तनयो जनितः, क्रमेण यौवनाभिमुखस्य तस्य प्रधानपुत्रमहेंद्रसिंहेन सह प्रीतिर्जाता.

☒ अथ कदाचिदसौ सनत्कुमारो विपरीतशिक्षिताश्वारूढो महाटव्यां प्राप्तः, पित्रा तस्य शुद्धिकृते बहूपायाः कृताः परं स क्वापि न लब्धस्ततो महेंद्रसिंहस्तच्छुद्धिकरणार्थं प्रस्थितः.

☒ अथ वर्षैकानंतरं भूरिभामिनीपरिवारपरिवृत्तं हंसीसंचयसेवितं राजहंसमिवैकस्मिन् सरसि क्रीडंतं सनत्कुमारं दृष्ट्वा स मिलितः, सनत्कुमारोऽपि तं दृष्ट्वातिहृष्टः सन् मातृप्रभृतीनां कुशलोदंतं पृष्टवान्. ततः स्नानभोजनानंतरं महेंद्रसिंहेन पृष्टं भो मित्र त्वयैतावती समृद्धिः कुतो लब्धा ? ततः सनत्कुमारेण विज्ञप्तिविद्यां स्मृत्वा कथितं हे मित्र तथाश्वापहृतोऽहं निरंतरजंबूजंबीरनारंगाम्रादिघनतरुश्रेणिभिर्दिनकरकरनिकरैरप्यगम्यायां सिंहव्याघ्रसूकरादिहिंस्रश्वापदकुलैर्व्याकुलायां सहस्रकिरणात्रस्तघोरतिमिरततिकृतनिवासायां क्वचित्श्रूयमाणगिरिकंदरलीनघोरघूकघूत्कारशब्दायां क्वचित्क्वचिद्दूरतः श्रवणगोचरीभवत्पक्वद्रुमालिललितफलावलिरक्षणवृक्षोपरिबद्धमंचकस्थितकृपी-

वलमुग्धकुमारिकोद्गीयमानगीतमधुरालापायां तुंगगिरिवरझरन्निर्मलजलनिर्झरझंकारारवरमणीयायां महाटव्यां संप्राप्तः.

☒ अथामितश्रमोन्मथितमानसो यावदहं मुक्तवल्गोऽश्वादुत्तरितस्तावदेवाश्वो मृत्वा भूमौ पतितः, तदा विषण्णीभूतोऽहं यावत्पादप्रचारैरग्रे गच्छामि तावत्तृणाक्रांतो मूर्च्छितो वटवृक्षाधो भूमावपतं. इतो मम पुण्यगुणाकृष्टेन वटवृक्षवास्तव्ययक्षेण मह्यं मानससरःपानीयमानीय पायितं. सचेतनीभूतेन मया पृष्टं त्वं कोऽसि कुतश्चैतत्तिरस्कृतामृतमाधुर्यं त्वया पानीयमानीतं. तेनोक्तमहमेतद्वटवृक्षाधिष्टायकयक्षोऽस्मि, दयया चैतन्मानससरःपानीयमानीय मया तव पायितं. ततो मया कथितं हे यक्षराज मम मानसं मानससरःसलिले स्नानकरणाभिलाषि वर्त्ततेऽतो ममोपरि कृपां विधाय मां तत्र नय? दयालुना यक्षेणाप्यहं तत्र मुक्तः, मयापि तत्र स्फटिकनिर्मलजले स्नानं कृत्वामंदानंदः संप्राप्तः, इतः पूर्वभववैरिणाऽसितनाम्ना यक्षेण सह तत्र युद्धं कृत्वाऽहं तं व्यापाद्य विजयवानभवं. ततोऽग्रे प्रस्थितेन मया भित्तिखचितमणिकरनिकरैरस्तांधकारा अनेके दिव्यावासा दृष्टाः, इतस्तत्र सहसा भानुवेगाभिधेनैकेन विद्याधरेणागत्य स्वागतपूर्वकं मम भोजनादि दत्तं, कथितं च हे कुरुवंशशिरोमणे अश्वसेनतनय ममाष्टौ कन्यास्त्वं परिणय? मयोक्तं त्वं कथं मामुपलक्षसे? तेनोक्तं वयं वैताढ्यवासिविद्याधराः स्मः.

☒ एकदा मया पृष्टेन ज्ञानिनोक्तं यो हि असितयक्षं जेष्यति स त्वदीयकन्यानां भर्त्ता भविष्यति, चक्रवर्त्तित्वं च लप्स्यते, अतोऽद्यासितयक्षजयात्त्वामहं तमेव जानामि. ततोऽहं तत्र ताः कन्याः परिणीय वैता-

ढये समागतस्तत्र च मया चंद्रवेगराज्ञो बकुलमतीप्रमुखकन्याशतं परिणीतं. तावदत्र त्वं मम मिलितः.

☒ अथ महेंद्रसिंहेन पृष्टं तेनासितयचेण सह तव पूर्ववैरं कथमस्ति ? तदा तेनावलोकिनीं विद्यां प्रयुंज्य कथितं तेन सह मम पंचभववैरमस्ति. कंचनपुरनगरे विक्रमयशोराज्ञो रूपवत्यः पंचशतराज्य आसंस्तथापि भोगेभ्यः सोऽतृप्त एवासीत्.

☒ अथ तत्रैव नगरे नागदत्तव्यवहारिणो विष्णुश्रीनामभार्यासीत्. एकदा गवाक्षस्थां तां विलोक्य राजा व्यामोहितः सन् तां स्वांतःपुरे नीतवान्. कृता च तेन सा पट्टराज्ञी, मंत्रिणानेकप्रकारैः प्रतिबोधितोऽपि स तां न मुमोच. स्त्रीविरहपीडितो नागदत्तो ग्रथिलीभूय विलापान् कुर्वन्नगरमध्ये भ्रमति.

☒ अथ तस्यामासक्तेन राज्ञा ताः पंचशतराज्योऽपि विस्मृतास्तदा ताभिः कार्मणं कृत्वा विष्णुश्रीर्व्यापादिता, ततो राजापि नागदत्तवद्ग्रथिलो जातः संस्तया सहाग्निप्रवेशं कर्तुमिच्छति. तदा मंत्रिणः कथमपि नृपप्रतिबोधाय प्रच्छन्नं तत्कलेवरं नगराद्बहिर्वनमध्ये मुमुचुस्ततो द्वितीयदिने च राजानं तत्र समानीय तत्कलेवरं दर्शयामासुः, तदातिदुर्गंधयुतं शृगालादिभिर्भक्षितं कृमिकुलव्याकुलं च तन्निरीक्ष्य राज्ञा चिंतितं धिग्मां यदर्थं मया धर्मकुललज्जादि त्यक्तं तत्स्वरूपं त्वीदृशं दृश्यते. इति वैराग्यपरेण तेन पुत्राय राज्यं दत्वा सुधर्माचार्यसमीपे दीक्षा गृहीता, निर्मलतपांसि च तप्त्वा तृतीयदेवलोके स देवो जातस्ततश्च्युत्वा रत्नपुरे श्रावककुले समुत्पन्नो

जिनधर्माभिज्ञोऽसौ शुद्धसम्यक्त्वं पालयति.

☒ अथ स नागदत्तजीवः स्त्रीवियोगतो दुर्ध्यानेन मृत्वा तिर्यग्योनिषु च बहु परिभ्रम्य दरिद्री ब्राह्मणो जातस्तत्र च दुःखगर्भितवैराग्येण स सन्यासी जातः, द्विमासतपः कुर्वन् रत्नपुरे समागतः, तदा तापसभक्तेन राज्ञा स पारणार्थं निमंत्रितो यावज्जनसमूहैर्वेष्टितो महोत्सवपूर्वकं नगरे समायाति तदा पथि तेन स जिनधर्मश्रावको विलोकितः, तं दृष्ट्वोल्लसितपूर्वभववैरेण तेन तापसेन राज्ञे प्रोक्तं यदि त्वमस्य श्रावकस्य पृष्टे स्थालीं संस्थाप्य मां भोजयसि तदैवाहं पारणं करिष्याम्यन्यथा नैव करिष्यामि. तत् श्रुत्वा तद्भक्तो राजा बलात्कारेणापि तं श्रावकमाहूय तस्य पृष्टेऽत्युष्णभोजनस्थालीं संस्थाप्य तापसं भोजयामास.

☒ अथ तापसभोजनानंतरं स्थाली यदा दूरीकृता तदा तत्पृष्टत्वक् समुत्तीर्णा, पतितं च तत्र कुहिरं निःसृतं च तस्मान्मांसमपि.

☒ अथ स श्रावकः क्षमायुतो गृहमागत्य कुटुंबिनां सर्वेषां च क्षामयित्वा वृद्धपुत्राय च सर्वं ग्रहभारं समर्प्य स्वयं चारित्रमादाय तुंगिकगिरिशिखरे चतुराहारप्रत्याख्यानपूर्वकं कायोत्सर्गं विधाय षष्टिदिनानि यावत् काकादिजंतुकृतकदर्थनां सहमानः शुभध्यानेन मृत्वा सौधर्मेंद्रो जातः, स तापसश्चाज्ञानतपांसि तप्त्वा मृत्वा च तस्य वाहनमैरावणो जातोऽवधिज्ञानतश्चेंद्रं निजवैरिणं विज्ञाय निजद्विरूपादिरूपं विधाय भापयामास. इंद्रेणाप्यवधिना

तं तापसजीवं विज्ञाय वज्रं दर्शयित्वा तस्य तर्जना कृता तदासौ भीतः सन् शांतो जातः, ततो मृत्वा तिर्यग्योनिषु बहु परिभ्रम्य सोऽयमसितयक्षो जातः, अहं च हस्तिनागपुरे सनत्कुमारो जातः, तत् श्रुत्वा हृष्टेन महेंद्रसिंहेनोक्तं हे मित्र संप्रति चिरविरहदुःखितयोर्मातापित्रोः समीपे त्वं समागच्छ ? ततः सनत्कुमारोऽपि विमानारूढो निजसकलभार्योपेतो मित्रयुतस्तूर्णं हस्तिनागपुरे समायातस्तदा तमेतादृगृद्धियुतमनेकवधूसहितं च समागतमालोक्य मातापितरावत्यंतं प्रमोदं प्राप्तौ.

⊠ अथ कतिचिद्दिवसानंतरमायुधशालायां चक्ररत्नं समुत्पन्नं. ततोऽसौ चक्ररत्नानुगः षट्खंडानि साधयित्वा निजनगरे समागत्य चक्रवर्तिपदवीं पालयामास. इतो द्विलक्षवर्षगमनानंतरमीशानदेवलोकात्कोऽपि महारूपवान् देवः सौधर्मेंद्रसभायामागतस्तस्यातीवमनोहरं रूपं दृष्ट्वा सभास्थितैर्देवैरिंद्रः पृष्टः. स्वामिन् अस्य देवस्य रूपं केन कारणेनातीवसुंदरमस्ति ? इंद्रेणोक्तमनेन देवेन पूर्वभवे आचाम्लवर्द्धमानाभिधं तपः कृतं, तेनासावतीवरूपवानस्ति. पुनर्देवैः पृष्टं स्वामिन्नस्य सदृशमस्त्यन्यस्यापि कस्यचिद्रूपं ? इंद्रेणोक्तं भरतक्षेत्रे चतुर्थचक्रिसनत्कुमारस्य रूपमस्मादप्यधिकमस्ति. तत् श्रुत्वा विजयवैजयंताख्यौ देवौ तदश्रद्दधानौ द्विजरूपीभूय तत्र सनत्कुमारनगरे समागतौ. राजद्वारे च समागत्य द्वारपालंप्रति कथयामासतुर्हे द्वारपाल त्वं राजानं कथय यद्भवद्रूपदर्शनोत्कंठया द्वौ द्विजौ परदेशात्समागतौ स्तः, यद्याज्ञा चेत्तर्हि आगच्छेतां. द्वारपालेनापि तथैव विज्ञप्तो राजा तावाह्वयामास.

⊠ अथ तदवसरे राजा स्नानकरणतत्परोऽभूत्. तस्य रूपं च दृष्ट्वा द्विजीभूतौ तौ देवौ हर्षं संप्रा-

र्येंद्रोक्तं तथ्यमेव मन्यमानौ तस्य प्रशंसामकुर्वतां. तदा चक्रिणोक्तं भो द्विजौ शृंगाराद्याडंबरयुतोऽहं यदि सभायामागच्छामि तदैव युवाभ्यां मम रूपं विलोकनीयं. ततस्तौ द्विजरूपौ देवावन्यत्र गतौ.

☒ अथ चक्री सविशेषं शृंगारादियुतः सभायां सिंहासने समुपविश्य तौ द्विजौ चाहूय कथयामास भो द्विजौ अधुना ममाद्भुतं रूपं युवां विलोकयतं ? तदा ताभ्यां चक्रिशरीरं रोगाकुलं विलोक्य शिरो धूनितं, राज्ञा प्रोक्तं युवाभ्यां शिरः कथं धूनितं ? ताभ्यामुक्तं हे राजन् तव शरीरे सप्त महारोगाः समुत्पन्नाः संति, तेन तव रूपं च नष्टमस्ति. चक्रिणोक्तं युवाभ्यां तत्कथं ज्ञातं ? तदा ताभ्यां निजदेवरूपं प्रकटीकृत्येंद्रकृतप्रशंसादिवृत्तांतो निरूपितः, तत् श्रुत्वा चक्री वैराग्यमासाद्य पुत्राय च राज्यं दत्वा विनयंधरसूरिपार्श्वे चारित्रं जग्राह. षष्टपारणके च शीतलान्नप्राप्तितोऽस्य शरीरे ज्वरादिषड्रोगाः प्रादुर्भूतास्तथापि देहममत्वरहितोऽयं सनत्कुमारराजर्षिर्मनसाप्यदूनो विविधतपांसि कुर्वन् शुद्धं चारित्रं पालयामास. क्रमेण तपोबलेन तस्य खेलौषध्यादिमहालब्धयः समुत्पन्नास्तथापि गतदेहममत्वोऽसौ महर्षिर्निजरोगचिकित्साकरणेच्छुर्न बभूव. इतः सौधर्मेंद्रेण पुनः सभामध्ये शरीरनिःस्पृहताविषये सनत्कुमारराजर्षेः प्रशंसा कृता, तदा पूर्वोक्तावेव देवौ वैद्यरूपमाधाय तस्य पार्श्वे समागत्य तच्छरीरगतरोगचिकित्सार्थं प्रार्थयामासतुः, तदा मुनिनोक्तं यदि युवां भावरोगध्वंसने समर्थौ तदैव मे चिकित्सां कुरुत, तत् श्रुत्वा ताभ्यामुक्तं तद्विषये आवां नैव समर्थौ. तदा मुनिना तयोर्विस्मयकरणार्थं निजकुष्टविनष्टांगुलीं निजमुखनिष्टीवनेन स्पृष्ट्वा सुवर्णवर्णा कृता. तद् दृष्ट्वा ताभ्यां

निजरूपं प्रकटीकृत्येंद्रकृतप्रशंसादिवृत्तांतः कथितस्ततो मुनिं नत्वा तौ निजस्थाने गतौ. सप्तशतवर्षानंतरं ते सर्वेऽपि रोगाः स्वयमेव मुनिशरीरतो दूरीभूताः, एवं वर्षलक्षं यावन्निर्मलं चारित्रं प्रपाल्य तृतीयदेवलोके स सनत्कुमारेंद्रो जातः, एकावतारे च मोक्षं गमिष्यति.

॥ इति श्रीतपःकुलके सनत्कुमारचक्रिकथा ॥

मूलम्—गोबंभगब्भगब्भिणी—बंभिणीघायाइगुरुअपावाइं ॥

काऊणवि कणयंविव । तवेण सुद्धो दढप्पहारी ॥६॥

व्याख्या—गौर्द्विजो गर्भो गर्भिणी ब्राह्मणी, एतेषां चतुर्णां घातादिरूपगुरुपापानि कृत्वापि यो दढप्रहारिनामा चौरः कनकमिव तपसा शुद्धो जातः ॥६॥

दढप्रहारिकथा चेत्थं—

☒ कस्मिंश्चिद्ग्रामे एको ब्राह्मणोऽवसत् तस्य पुत्रो नीतिरहितो लोकैः सह युद्धयते, तदा लोकपूत्कारतो दुर्गपालेन स नगराद्बहिर्निष्कासितः, ततो निःसृत्यासौ चौरपल्ल्यां गतः, पल्लिपतिना च स पुत्र इति कृत्वा रक्षितः, धाट्यादिषु च लोकानां दढप्रहारदानात्स दढप्रहारीति लोके विख्यातो बभूव. पल्लीपतिम-

ग्णानंतरं स पल्लीपतिर्जातः.

☒ अथैकदा कुशस्थलपुरे तेन घाटी पातिता, तदा जन्मदरिद्रिदेवशर्माभिधब्राह्मणस्य गृहं तेन लुंटितं, द्विजो यष्टिमादाय तं प्रति धावितस्तदा दृढप्रहारिणा करवालेन स द्विधा कृतः, अन्तरागता गौरपि तेन खड्गेन व्यापादिता, इतस्तस्य द्विजस्य गर्भिणी भार्या कटुकवचनैस्तं तर्जयामास, तदा सापि तेन खड्गेन मारिता, तस्या उदराद्गर्भोऽपि पतितः अथैतादृशं भयंकरं कार्यं दृष्ट्वा प्रांते तस्य पश्चात्ताप पूर्वं वैराग्यं समुत्पन्नं, ततो वने गत्वालोचनापूर्वकं साधोरग्रे तेन दीक्षा गृहीता, गृहीतश्च तेनाभिग्रहो यद्यावदिदं पापमहं स्मरामि तावदाहारं न करिष्यामीत्यभिग्रहमादाय स कुशस्थलपुरे गत्वा कायोत्सर्गेण स्थितः, लोकास्तं यष्टिदपदादिभिस्ताडगंति परं स क्षमया सर्वमपि सहते, प्रांते तपोबलेन केवलज्ञानमासाद्य स मोक्षं गतः

॥ इति श्रीतपःकुलके दृढप्रहारिकथा ॥

मूलम्—पुव्वभवे तिव्वतवो । तविओ जं नंदिसेणमहरिसिणा॥
वसुदेवो तेण पिओ । जाओ खयरीसहस्साणं ॥ ७ ॥

व्याख्या:—यद्यस्मात्कारणान्नंदिषेणमहर्षिणा पूर्वभवे तीव्रं तपस्तप्तं तेनासौ खेचरीसहस्राणां प्रियः स्नेहगुतो वसुदेवो जातः ॥ ७ ॥

तस्य कदा चेत्थं—

☒ नंदिग्रामे कश्चिदेको विप्रोऽवसत्, तस्य पुत्रो जन्मदरिद्री नंदिषेणाभिधो बभूव. बाल्ये एव तस्य मातापितरौ मृतौ, ततोऽसौ महादुर्भागी कुरूपश्च मातुलगृहे गत्वा स्थितः, मातुलेनोक्तं मम सप्त पुत्र्यः संति तन्मध्यादेकां तव परिणाययिष्यामि, पुत्रीभिस्तां वार्त्तां निशम्य कथितं वयमग्नौ प्रविशामः परं, नंदिषेणं नांगीकरिष्यामस्तत् श्रुत्वा नंदिषेणो वने गत्वात्मघातोत्सुको बभूव, इतस्तत्रस्थेनैकेन साधुना स आत्मघातान्निवार्य प्रतिबोधितस्तदासौ दीक्षामादाय षष्टषष्टपारणके आचाम्लतपः कुर्वन् साधुवैयावृत्त्यपरो बभूव.

☒ अथैकदेंद्रेण निजसभायां तस्य साधुवैयावृत्त्यप्रशंसा कृता. तदा द्वौ सुरौ तत्परीक्षणाय तत्रागतौ तयो-रेको ग्लानसाधुरूपं विधाय नगराद्बहिः स्थितो द्वितीयश्च साधुरूपभृदुपाश्रये तत्समीपे समागतः.

☒ अथ नंदिषेणो यावत् षष्टपारणकपरो बभूव तावत्तेनागत्य कथितं भो नंदिषेण नगराद्बहिरेकोऽति-साररोगपीड़ितो मुनिः पतितोऽस्ति, तत् श्रुत्वा नंदिषेणो निजाहारपात्रमाच्छाद्य तेन सह द्रुतं तद्ग्लानसाधुसमीपे गतस्तदा तेन तस्य बहुकठिनवचनानि जल्पितानि, परं क्षमापरेण नंदिषेणेन तानि सर्वाणि सोढानि. ततो नंदिषेणेन तं प्रत्युक्तं हे महात्मन् यूयमुपाश्रये समागच्छत ? साधुनोक्तमहं गंतुमशक्तोऽस्मि, तदा नंदिषेणस्तं स्कंधे समारोप्योपाश्रयं प्रति चलितस्तदा पथि तेन मायिनोक्तं अरे पापिन् त्वं शनैः शनैर्व्रज ? तव शीघ्रगमनेन

मम दुःखं भवति. ततः क्षमानिधिर्नंदिषेणः शनैश्चचाल. पुनस्तेनोक्तं अरे दुष्ट तव शनैर्गमनेन मे शरीरं तापव्याकुलं भवति. तदा नंदिषेणेन चिंतितं नायमस्य ग्लानसाधोर्दोषः किं तु ममैवायं दोष इति विचिंत्य स तं क्षमयामास. अग्रे गच्छता तेन मायिसाधुना तस्य शरीरोपरि विष्टा कृता, तथापि नंदिषेणस्तां चंदनलेपमिव मन्यते, क्रमेण स चोपाश्रये समागत्य तद्देहशुद्ध्यर्थं जलमादातुं श्रावकगृहे गतः, परं सर्वत्र तेन देवेनानेषणा कृता, तथापि तमक्षुब्धं क्षमापरं च ज्ञात्वा तौ देवौ प्रकटीभूय तच्चरणयोः पतितौ, निजापराधं च क्षमयित्वेंद्रकृतप्रशंसादिवृत्तांतं तस्मै निवेदितवंतौ. ततस्तौ सम्यक्त्वमादाय निजस्थाने जग्मतुः.

☒ एवं नंदिषेणमुनिर्द्वादशवर्षाणि यावच्चारित्रं प्रपाल्य प्रांतेऽनशनं विधाय स्त्रीवल्लभत्वनिदानं कृत्वा मृत्वा सप्तमदेवलोके देवो जातः, ततश्च्युत्वा शौरीपुरेंधकवृष्णिनृपस्य स वसुदेवाख्यपुत्रत्वेनोत्पन्नः, पूर्वकृतनिदानतस्तस्य रूपमत्यद्भुतं स्त्रीजनवल्लभं जातं. मनोहररूपलावण्याद्युपेतं तं निरीक्ष्य निखिलनगरनार्यस्तस्योपरि मोहं प्राप्य गृहकार्याण्यपि च परित्यज्य पतिवचनमप्यनादृत्य तस्य पृष्टे एव भ्रमणं चक्रुः. तदा नगरलोकैस्तस्य वृद्धभ्रातुः समुद्रविजयनृपस्य पार्श्वे समागत्य तद्वृत्तांतं च कथयित्वा विज्ञप्तं हे स्वामिन् वसुदेवो गृहमध्ये एव संरक्षणीयः, नृपेण नगरलोकाः सन्मानाश्वासनपूर्वकं विसर्जितास्ततो यदा वसुदेवः प्रणामाय समुद्रविजयपार्श्वे समागतस्तदा नृपस्तमुत्संगे संस्थाप्य मिष्टवचनैः कथयामास हे वत्स ! त्वं कथं दुर्बलोऽसि ? बहिरातपादिषु मा भ्रम ? गृहांतरेव विनोदान् कुरु ? वसुदेवोऽपि तदंगीकृत्य गृहे एव तिष्टति.

☒ अथैकदा ग्रीष्मर्तौ शिवादेव्या चंदनभृत्स्वर्णभाजनं दासीहस्तेन विलेपनकृते राज्ञे प्रेषितं. बालचापल्यतोंतराले वसुदेवेन दासीहस्तात्तद्गृहीत्वा तन्मध्यस्थं चंदनं निजशरीरे विलिप्तं. दास्योक्तं यदि त्वमीदृशश्चपलोऽसि तर्ह्येव गृहकारागारे क्षिप्तोऽस्तीत्युक्त्वा तया तस्मै सर्वलोकवार्ता कथिता. तत् श्रुत्वा हृदि दूनो वसुदेवो भ्रातृकृतापमानतो निशायामेकं मृतकलेवरं चितायां प्रज्ज्वाल्य " वसुदेवोऽग्नौ प्रविश्य मृतः " इति च तत्र लेखं लिखित्वा नगरान्निर्गतः, प्रभाते राजा तद्वृत्तांतं विज्ञायातीवदूनस्तस्य प्रेतकार्यं कृतवान्.

☒ अथ वसुदेवो देशांतरे भ्रमन् बहुनृपविद्याधरद्विजव्यापारिणां द्वासप्ततिसहस्रकन्याः परिणीतवान्. प्रांते रोहिणीस्वयंवरे स समुद्रविजयादीनां मिलित इत्यादिसंबंधः पूर्वं श्रीनेमिनाथचरित्रे प्रोक्त एव. इति वसुदेवभोगप्राप्तिकरणे पूर्वभवकृततपोमाहात्म्यमेव ज्ञेयं.

॥ इति तपःकुलके वसुदेवकथा ॥

मूलम्—देवावि किंकरत्तं । कुणंति कुलजाइविरहिआणंपि ॥
तवमंतपभावेणं । हरिकेसीबलस्सव रिसिस्स ॥ ८ ॥

व्याख्या—हरिकेशीबलाभिधमुनिवरस्येव तपोमंत्रप्रभावेण कुलजातिविरहितानामपि जनानां देवा अपि किंकरत्वं कुर्वंति ॥ ८ ॥

तपः २०१ कुल- कम्

हरिकेशीबलमुनिकथा चेत्थं—

☒ हस्तिनागपुरे सोमदेवनामा पुरोहितो वैराग्यं प्राप्य साधुसमीपे दीक्षां जग्राह. स निर्मलं चारित्रं तु पालयति परं वयं द्विजोत्तमा इत्यादि कथयन् जातिमदं बहु करोति. आयुपि संपूर्णे मति स देवलोके गतस्ततश्च च्युत्वा नीचकर्मोदयानिलप्रेरितश्चांडालकुले समवातरत्. तदा तस्य माता बहुजनसेव्यमानं फलितमाम्रतरुं स्वप्ने ददर्श. जन्मानंतरं पित्रा बल इति तस्याभिधानं चक्रे. हरिकेश्यभिधानं च तस्य गोत्रमभूत्. यौवनं प्राप्यैकदा पितृकृतापमानेन दूनोऽयं विदेशे गतः. तत्र साधूपदेशं निशम्य वैराग्यं च प्राप्य स दीक्षां जग्राह. पष्टाष्टममासक्षपणादिविविधतपः कुर्वन् विहरन् सन्नेकदा स वाणारस्यामागत्य तिंदुकनामयक्षालये स्थितस्तदा तस्य तपोवैराग्यादिगुणगणैरतीवप्रमुदितस्तिंदुकयक्षः सर्वदा तस्य सेवाकरणतत्परो जातः.

☒ अथैकदा तस्य केनचिन्मित्रयक्षेण तिंदुकपार्श्वे समागत्योक्तं भो मित्र संप्रति त्वं मम गृहे कथं न समागच्छसि? तेनोक्तमधुना मम प्रासादे कश्चिदेको निष्प्रमादी तपस्वी समागतोऽस्ति तस्याहं सेवां करोमि. तेनोक्तमेतादृक्चारित्रिणस्तु ममालयेऽपि बहवः संति. तत् श्रुत्वा तेन तत्रागत्य ते चारित्रिणो विलोकिताः, परं तान् प्रमादिनो विज्ञाय स पश्चादागत्य तमेव हरिकेशीबलमुनिं सेवितुं लग्न.

☒ अथैकदा बहुपरिवारपरिवृता राजकुमारी भद्रा तं तिंदुकयक्षं पूजयितुं समागता, तत्र तया मलिन-

वस्त्रधारिणं कुरूपं तं मुनिं दृष्ट्वा जुगुप्सया थूत्कृतं, तदा कुपितेन यक्षेण सा ग्रथिलीकृता, राज्ञानेके उपायाः कृताः परं तस्या ग्रथिलत्वं नो गतं, इतो यक्षेण तस्याः शरीरे समुत्तीर्य तन्मुखेन कथितं यत्साधुमालोक्यानया थूत्कृतमस्ति ततोऽहं तां नैव मोक्ष्यामि. राज्ञा विनयादिभिर्यदा बहुर्विज्ञप्तिः कृता तदा तेनोक्तं सा यदि तेनर्षिणा सह परिणयेत्तदैवाहं तां पाटवोपेतां करिष्यामि. राजा तत्स्वीकृत्य संध्यासमये तां कन्यां च पुरस्कृत्य मुनिसमीपे समागत्य कथयामास भो मुने ममैनां पुत्रीं परिणय ? साधुनोक्तं हे राजन् अहं त्यक्तपरिग्रहः कथमेनां ते पुत्रीं स्वीकरोमि ? तत् श्रुत्वा राजा विषण्णस्तदा यक्षस्तत्साधुरूपं विधाय तां च परिणीय विडंबनापूर्वकं प्रभाते त्यक्तवान्.

☒ अथ चिंतातुरो राजा प्रधानादिभ्योऽपृच्छत् यदियं ऋषिपरिणीता कन्या कस्मै प्रदेया ? प्रधानादिभिरुक्तं स्वामिन्नेवंविधा कन्या द्विजायैव प्रदीयते. तत् श्रुत्वा राज्ञा सा रुद्रदेवाख्यपुरोहिताय समर्पिता, तया सह रुद्रदेवो विषयसुखानि भुनक्ति.

☒ अथैकदा तेन यज्ञः समारब्धस्तदा हरिकेशीबलमुनिस्तत्राहारार्थं मासक्षपणपारणे समागतस्तं मलिनांबरधरं मुनिं दृष्ट्वा पिशाचमिव मन्यमाना द्विजकुमारा मारणाय समुत्थितास्तान् सर्वान् यक्षो रुधिरवमतो विधायाधः पातयामास, तत्कोलाहलमाकर्ण्य भद्रा बहिरागता, तमेव च मुनिं दृष्ट्वा प्रणम्य द्विजेभ्यः कथयामास भो द्विजा यूयं मूर्खाः स्थ, अयं तु महाप्रभाविकस्तिंदुकयक्षपूजितो महातपस्वी मुनिरस्ति, तत एनं प्रणम्य क्षमां याचध्वं. ततो भीताः सर्वेऽपि द्विजास्तं प्रणम्य क्षमां याचयितुं लग्नाः, मुनिनोक्तं भो द्विजा मम तु रागद्वेषौ न

स्तः, यूयं मम सेवापरं यक्षं क्षामयत ? ततः सर्वेऽपि द्विजाः प्रणतिपूर्वकं विनयेन यक्षं क्षामयामासुः, तुष्टेन यक्षेणापि सर्वे द्विजकुमाराः सज्जीकृतास्ततो हृष्टैर्द्विजैर्मुनयेऽन्नपानादि दत्तं, देवकृता सुवर्णवृष्टिश्च तत्र जाता, ततो हरिकेशीबलमुनिस्तान् द्विजान् प्रतिबोध्य तपोबलेनान्यानपि कतिचिद्भव्यान् प्रतिबोध्य निर्मलं चारित्रं प्रपाल्य मोक्षे गतः

॥ इति श्रीतपःकुलके हरिकेशीबलमुनिकथा ॥

मूलम्—घडसयमेगघडेणं । एगेण घडेण घडसहस्साइं ॥
जं किर कुणंति मुणिणो । तवकप्पतरुस्स तं खु फलं ॥९॥

व्याख्या—मुनयो यदेकेनैव घटेन घटशतं, तथैव एकेनापि घटेन घटसहस्रं किल निश्चयेन कुर्वंति तत् खलु तपोरूपकल्पवृक्षस्य फलं ज्ञातव्यमिति शेषः ॥ ९ ॥

मूलम्—अनिआणस्स विहिए । तवस्स तविअस्स किं पसंसामो ॥
किज्जइ जेण विणासो । निकाईयाणंपि कम्माणं ॥१०॥

व्याख्या—अनिदानस्य निदानरहितस्य विधिना श्रीवीतरागोक्तविधिपूर्वकं तप्तस्य तपसो वयं किं प्रशंसां कुर्मः ? येन तपसा निकाचितानामपि कर्मणां विनाशो भवति. ॥ १० ॥

**मूलम्—अइदुक्करतवकारी। जगगुरुणा कन्हपुच्छिएण तदा ॥**
**वाहरिओ स महप्पा। समरिज्जओ ढंढणकुमारो ॥११॥**

व्याख्या—हे भगवन् अत्रातिदुष्करतपःकारकः कोऽस्तीति कृष्णेन पृष्टो जगद्गुरुर्भगवान् श्रीनेमिनाथो यस्याभिधानं जगौ, स महात्मा श्रीढंढणकुमारमुनिर्नूनं स्मर्त्तव्यः स्मरणकरणयोग्योऽस्तीति. ॥ ११ ॥

श्रीढंढणकुमार मुनि कथा चेत्थं—

☒ द्वारिकायां नगर्यां श्रीकृष्णवासुदेवो राज्यं पालयति, तस्यैकया ढंढणाभिधराज्ञ्या ढंढणकुमाराभिधपुत्रः प्रसूतः, स यदा यौवनं प्राप्तस्तदा पित्राऽनेकराजपुत्र्यस्तस्य परिणायिताः, इत एकदा तेन श्रीनेमिनाथवचांसि श्रुत्वा वैराग्येण बहुमहोत्सवपूर्वकं दीक्षा गृहीता.

☒ अथ श्रीनेमिप्रभुर्निजचरणन्यासैर्महीं पावयन् देशनामृतप्रवाहैरनेकभव्यजनानां संसारदुःखोद्भूतदावानलमुपशामयन् चरणकरणपरिणतैकाग्रहृदयमुनिगणश्रेणिभ्यो मोक्षमार्गं दर्शयन्नेकदा द्वारिकायां समवसृतस्तदाऽनेके

मुनयः प्रभुमापृच्छयाहारार्थं नगर्यां गताः, ढंढणर्षिरपि तथैवाहारार्थं नगरे गतः, अन्येषां सर्वेषामपि मुनीनामाहारो मिलितः, परं लाभांतरायकर्मोदयतो ढंढणमुनिना बहुभ्रमताप्याहारो न प्राप्तस्तेन स यथा गतस्तथैव पश्चादागतः, तदा सर्वमुनिभिर्नेमये पृष्टं हे भगवन् महर्द्धिश्रावकव्याप्तायामपि द्वारिकायां ढंढणमुनिनाहारः कथं न लब्धः? प्रभुणोक्तमयं पूर्वभवे मगधदेशस्थधन्याभिधग्रामाधिकारी बभूव, एकदा तेन भोजनवेलायामपि सर्वहालिकानां क्षेत्रेष्वेकैकपंक्तिनिष्कासनादेशो दत्तस्तदा बद्धमंतरायकर्माद्य तस्योदयमागतं. तत् श्रुत्वा ढंढणर्षिणाभिग्रहो गृहीतो यद्यावदहं स्वलब्ध्याहारं न प्राप्नुयां तावन्मया न भोक्तव्यमित्यभिग्रहयुतोऽसौ वेलायां नगरे भ्रमति तथापि कुत्राप्याहारं न प्राप्नोति.

☒ अथैकदा प्रभुवंदनार्थमागतेन कृष्णेन पृष्टं हे स्वामिन् एतेषां साधूनां मध्ये को दुष्करकार्यस्ति? प्रभुणोक्तं तव पुत्रो ढंढणर्षिरलाभपरीषहं सहन् महादुष्करं तपः करोति. तत् श्रुत्वा हृष्टः कृष्णो यावन्नगर्यां समायाति तावत्पथि भिक्षार्थं भ्रमन् ढंढणमुनिस्तेन दृष्टस्तदा कृष्णेन गजादुत्तीर्य विधिपूर्वकं स वंदितस्तदा गवाक्षस्थेन भद्रकश्रेष्ठिना दृष्ट्वा चिंतितं नूनमयं कोऽपि महर्षिरस्ति.

☒ अथ ढंढणोऽपि दैवयोगेन तस्यैव श्रेष्ठिनो गृहे भिक्षार्थं समागतः श्रेष्ठिनापि स मोदकवरैः प्रतिलाभितस्तान् गृहीत्वा स मुनिरपि प्रभुसमीपे समागत्य पृष्टवान् हे स्वामिन् मयाद्याहारो लब्धस्तेन किं मम कर्म क्षीणं? भगवतोक्तं हे महानुभाव अद्यापि ते तत्कर्म क्षीणं नास्ति, इमे मोदकाश्च त्वया कृष्णलब्ध्या प्राप्ताः

संति. तन्निशम्य स मोदकपरिष्ठापनिकायै कुंभकारशालायां गतस्तत्र परिष्ठापनिकावसरे स्वकर्माणि निंदतः शुभाध्यवसायाधिरूढस्य तस्य केवलज्ञानमुत्पन्नं, तदा देवदुंदुभिं निशम्य कृष्णेनागत्य तस्य महोत्सवो विहितः, कियत्कालं केवलपर्यायं परिपाल्य स मोक्षे गतः

॥ इति श्रीतपःकुलके ढंढणर्षिकथा ॥

**मूलम्—पइदिवसं सत्तजणे । हणिऊण गहिअवीराजिणदिक्खो ॥
दुग्गभिग्गहनिरओ । अज्जुणओ मालिओ सिद्धो ॥१२॥**

व्याख्या— प्रतिदिवसं सप्तजनहिंसाकारक एवंविधोऽप्यर्जुनमाल्यपि वीरप्रभुपार्श्वे दीक्षां गृहीत्वा दुर्गाभिग्रहे निरतो लीनः सन् सिद्धिगतिं प्राप्तः. ॥ १२ ॥

अर्जुनमालिकथा चेत्थं—

☒ राजगृहनगरे श्रेणिकाभिधो राजा, तत्रार्जुनाख्यो माली वसति, तस्य बंधुमतीनामभार्या.

☒ अथ तस्य वाटिकापार्श्वे मुद्गरपाणिनामयक्षस्यालयमस्ति, तस्मिन् तस्य यक्षस्य पाणिधृतसहस्रपलमितभारमुद्गरा मूर्त्तिर्वर्त्तते. अर्जुनमाली सर्वदा तं यक्षं पुष्पादिभिः पूजयित्वा नगरमध्ये पुष्पविक्रयार्थं चतुष्पथे

समागच्छति.

☒ अथ तस्मिन् यक्षालये षट् विट् पुरुषा नित्यं समागत्यानेकभोगक्रीडादि कुर्वंति.

☒ एकदा तैर्विट्पुरुषैर्बंधुमतीयुतमर्जुनमालिनं तत्रागच्छंतं विलोक्य परस्परं निश्चयो कृतो यदद्यास्माभिः सर्वैः कपाटपृष्ठे स्थातव्यं, यावच्चायमर्जुनमाल्यत्रागच्छेत्तावत्तं परिगृह्य गाढबंधनैर्बद्ध्वा तस्य भार्यया सह भोगविलासः कर्त्तव्य इति विचिंत्य ते प्रच्छन्नतया कपाटपृष्ठे स्थिताः, इत आगतमर्जुनमालिनं तथैव बद्ध्वा तैस्तस्य स्त्रिया सह भोगविलासं कर्त्तुं प्रारब्धं. तद् दृष्ट्वार्जुनमाल्यत्यंतं कुपितः सन् चिंतयामास नूनमयं यक्षोऽशक्त एव, यस्य दृष्टौ विधीयमानमप्येतत्पापं स एड इवोपेक्षते, एतावद्भिर्दिवसैर्मया वृथैव तस्य पूजा विहिता. इतः सावधानीभूतेन यक्षेण तस्यार्जुनमालिनः शरीरमधिष्ठितं. तद्बंधनानि च स्वयमेव त्रुटितानि, सहस्रपलमितलोहमुद्गरोऽपि स्वयमेव तस्य हस्ते समायातः, तत्कालमेव तेनोत्थाय मुद्गरतस्ते षड़पि पुरुषाः सप्तमी च भार्या व्यापादिता. तदादितः स प्रतिदिनं वनसमेतजनमध्यात् षट्पुरुषान् सप्तमीं च स्त्रियं मारयति. एवं तेन बहवो जना मारिताः, क्रमेण सा वार्त्ता राजगृहे विस्तृता. इतः श्रीवीरप्रभुस्तत्र वने समवसृतः, परं यक्षाधिष्ठिततदर्जुनमालिभीत्या कोऽपि वनमध्ये प्रभुवंदनार्थं न समायाति. परं सुदर्शनश्रेष्ठी मातृपितृनिवारितोऽपि वीरप्रभुवंदनार्थं तत्र चलितः, यावच्च तस्य यक्षस्यायतनाग्रे समागतस्तावदर्जुनमाली मारणाय समुत्थितस्तदा सुदर्शनश्रेष्ठिना सागारिकमनशनं कृत्वा श्रीवीरप्रभुशरणं चांगीकृत्य नमस्कारस्मरणमारब्धं.

☒ अथ सोऽर्जुनमाली तस्याग्रे समागंतुमशक्तोऽभूत्, यक्षोऽपि निजमुद्गरमादाय तच्छरीरं विहायादृश्यीभूतः.

☒ अथ मालिनं सुस्थितं विज्ञाय सुदर्शनेन भणितं, भो अर्जुन! त्वं मनुष्यसंहारं कथं करोषि?
हिंसातः प्राणी दुर्गतौ पतति, किंचाहं श्रीवीरप्रभुवंदनार्थं गच्छामि, तत् श्रुत्वा तेनोक्तमहमपि तत्र समाग-
मिष्यामि. ततस्ताभ्यां द्वाभ्यामपि श्रीवीरो वंदितः, वीरप्रभुदेशनां श्रुत्वा प्रतिबुद्धेनार्जुनमालिना दीक्षा गृहीता,
ततस्तेन यावज्जीवं षष्ठंषष्ठेन तपसा पारणकरणाभिग्रहो गृहीतः, पारणकदिने यदाऽहारार्थं स नगरे प्रयाति तदा
पूर्ववैरतो लोकास्तस्यानेकविधानुपद्रवान् करोति. परं क्षमायुतोऽर्जुनमालिमुनिः केवल निजदोषमेव पश्यति, न च कस्मै
अपि कुप्यति कदाचिदन्ने मिलिते सति पानीयं न मिलति. एवंविधानतिघोरपरीषहान् सहमानोऽसौ मुनिः
प्रांतेऽनशनेन केवलज्ञानमासाद्य मोक्षे गतः

॥ इति श्रीतपःकुलके अर्जुनमालिकथा ॥

मूलम्—नंदीसररुयगेसुवि । सुरगिरिसिहरेवि एगकालाए ॥
जंघाचारणमुणिणो । गच्छंति तवप्पभावेणं ॥१३॥

व्याख्या—नंदीश्वरे रुचकद्वीपे मेरुशिखरेऽपि चैकेन कालेन जंघाचारणविद्याचारणमुनी निजतपःप्रभावेण गच्छतः ॥१३॥

☒ अथ ते चारणमुनयो द्विविधा भवंति, विद्याचारणा जंघाचारणाश्च. विद्याचारणस्य नित्यं षष्टपारणे सति लब्धिः समुत्पद्यते, स च करतलैकसंयोगे त्रिवेलं जंबूद्वीपं परिभ्रम्य समायाति. तिर्यग्गत्या च समुत्पतिते सति स्फालेनैकेन मानुषोत्तरे याति, द्वितीयस्फालेन च तस्मादुत्पत्य नंदीश्वरे याति, तत्र च चैत्यानि वंदित्वोत्पत्य चैकेन स्फालेनैवात्र समायाति. अथोर्ध्वगत्यैकेन स्फालेन मेरौ नंदनवने याति, भूमिमकाशान्नंदनवनं पंचशतयोजनोच्चमस्ति, तस्मादुत्पत्य मेरोरग्रभागशिखरे पंडकवने याति, तत्र च चैत्यानि प्रणम्यैकेनैव स्फालेनात्र समायाति.

☒ अथ जंघाचारणतपोलब्धिर्निरंतरमष्टमतपःपारणे कृते सति समुत्पद्यते. तल्लब्धिवान्मुनिः करतलैकसंयोगे कृते सप्तवेलं जंबूद्वीपे परिभ्रम्य समायातीति तस्य शीघ्रगतिर्ज्ञेया. तिर्यग्गत्यैकेन स्फालेन स रुचकद्वीपे याति. चैत्यानि च नमस्कृत्य द्वितीयस्फालेन स नंदीश्वरे समायाति, तत्र च चैत्यानि वंदित्वा समुत्पत्य चात्र समायातीति तस्य तिर्यग्गतिर्ज्ञेया. अथोर्ध्वगत्यैकेन स्फालेन मेरोरग्रभागे पंडकवने याति, तत्र चैत्यानि वंदित्वा पश्चाद्वलमानो नंदने विश्राम्यति, तत्र च चैत्यानि वंदित्वा तत उत्पत्यैकस्फालेनात्र समायातीति तस्योर्ध्वगतिर्ज्ञेया. विद्याचारणस्य गमने मंदगतिरागमने च शीघ्रगतिर्भवति. जंघाचारणस्य गमने शीघ्रगतिरागमने च मंदगतिर्भवति. तस्य किं कारणमिति चेद्विद्याचारणो विद्याबलेन याति, सा च विद्या स्मरमाणा स्मरमाणा जागरमाणा भवति. जंघाचारणः पुनः शरीरबलेन याति, स गमने सोत्साहो याति, आगमने पुनः खिन्नः सन्

विश्राम्य समायातीति भावार्थः.

॥ इति श्रीतपःकुलके जंघाचारणविद्याचारणवृत्तांतः ॥

मूलम्—सेणीअपुरओ जेसिं । पसंसियं सामिणा तवोरूअं ॥
ते धन्ना धन्नमुणी । दुन्हवि पच्चुत्तरे पत्ता ॥१४॥

व्याख्या—श्रेणिकराजाग्रे श्रीमहावीरेण ययोस्तपःस्वरूपं स्वमुखेन प्रशंसितं, तौ धन्नौ धन्यौ ज्ञेयौ, तौ द्वावपि पंचमानुत्तरविमाने प्राप्तौ. ॥ १४ ॥

अथ प्रथमस्य काकंदीवास्तव्यधन्नस्य कथा कथ्यते—

☒ काकंदीनगर्यां जितशत्रुनामराजास्ति. तत्र भद्राभिधाना महाधनवती सार्थवाही वसति, तस्य पुत्रो धन्न इत्यभिधानो यौवनं प्राप्त एकेनैव दिनेन द्वात्रिंशत्कन्याः परिणीतवान्. ताभिः सहानेकविधानि सुखानि स भुनक्ति.

☒ अथैकदा श्रीवीरस्तत्र समवसृतस्तदा सर्वनगरलोकान् वीरवंदनार्थं गच्छतो विलोक्य धन्नोऽपि रथस्थस्तत्र गत्वा श्रीवीरप्रभुं ननाम. वीरदेशनां च श्रुत्वा प्रतिबुद्धेन धन्नेनोक्तं स्वामिन्नहं मातरमापृच्छ्य

भवत्समीपे चारित्रं गृहिष्यामि. भगवतोक्तं यथासुखं देवानुप्रियेति.

☒ अथ धन्नो गृहमागत्य मातरंप्रत्युक्तवान् हे मातर्मयाद्य श्रीवीरो वंदितः श्रुता च तस्य धर्मदेशना. मात्रा प्रोक्तं त्वं धन्योऽसि, तवाभिधानमप्यद्य सफलीभूतं. पुनर्धन्नेनोक्तं हे मातर्यदि तवाज्ञा भवेत्तर्हि अहं श्रीवीरप्रभोः पार्श्वे दीक्षामधिगच्छामि. तत् श्रुत्वा व्याकुलया मात्रोक्तं हे पुत्र सर्वमेतद्धनं कस्य भोग्यतां प्रयास्यति ? धन्नेनोक्तं हे मातर्धनमेतदसारमस्ति, यतो धनस्य चौरराजाग्निसमुद्भवभयोऽस्ति, पुनर्मात्रोक्तं हे पुत्र एतास्ते द्वात्रिंशत्प्रिया अपि क्व गमिष्यंति ? धन्नेनोक्तं हे मातरेताः सर्वा हरिद्रारागवन्निःस्नेहा ज्ञेयाः, संसारः सकलोऽप्ययमिंद्रजालसमोऽस्ति. एवं मातरं निजद्वात्रिंशद्भार्याश्च प्रतिबोध्य तेन श्रीवीरप्रभुपार्श्वे चारित्रं गृहीतं.

☒ अथ तस्मिन्नेव दिने तेन श्रीवीराय प्रोक्तं हे स्वामिन्नहं यावज्जीवं षष्टंषष्टेनाचाम्लपारणकं विधास्ये. स्वामिनापि तस्याज्ञा दत्ता.

☒ अथैकदा पारणकदिने काकंदीनगर्यामागत्य स प्रथमप्रहरे स्वाध्यायं द्वितीयप्रहरे च ध्यानं विधाय श्रीवीरप्रभुमापृच्छ्य स्वयमाहारार्थं गतः, नीरसमाहारमादाय प्रभुपार्श्वे समागत्याऽलंपटत्वेन चाचाम्लं कृतवान्. एव तपोयुतं नवमासं यावच्चारित्रं पालयतस्तस्य शरीरमतीव दुर्बलं जातं.

☒ अथैकदा श्रीवीरो राजगृहे समवसृतस्तदा श्रेणिकनृपेण प्रभुं वंदित्वा पृष्टं हे स्वामिन् गौतमा

द्विचतुर्दशसहस्रयतीनां मध्ये को दुष्करकारकोऽस्ति? प्रभुणोक्तं हे राजन्नेवंविधो धन्नो नामाणगारोऽस्ति. तत् श्रुत्वा हृष्टः श्रेणिकः प्रभुं वंदित्वा धन्नाणगारसमीपे समागतस्तत्र तं ध्यानारूढमालोक्य प्रदक्षिणापूर्वकं नत्वा तेन कथितं हे मुने त्वं धन्योऽसि तव जीवितं चापि सफलमेवास्ति. यतः श्रीवीरप्रभुणा स्वमुखेन तव प्रशंसा कृतास्तीति तं स्तुत्वा श्रेणिको निजगृहे समायातः.

☒ अथैकदा धन्नोऽणगारो रात्रौ चिंतयति यदधुना मम विहारकरणे शक्तिर्नास्ति. प्रभातेऽतः प्रभुमापृच्छ्याहमनशनं विधास्ये.

☒ अथ प्रभाते प्रभुमापृच्छ्य धन्नोऽणगारः सर्वमुनीन् क्षामयित्वा विपुलगिरिवरे गत्वा पादपोपगमनानशनं विधाय मासिक्या संलेखनया कालं कृत्वा सर्वार्थसिद्धिविमाने गतः, ततश्च्युत्वा च महाविदेहक्षेत्रे स मोक्षं गमिष्यति.

॥ इति श्रीतपःकुलके प्रथमधन्नाणगारकथा. ॥

अथ द्वितीयशालिभद्रभगिनीपतिधन्नाणगारस्य कथा कथ्यते—

☒ प्रतिष्ठितपुरपत्तने काचिदेका वृद्धा सपुत्रा वसति, सा नित्यं वत्सान् गृहीत्वा वने चारयति, एकदा तस्य पुत्रेण मातुः पार्श्वे क्षैरेयी याचिता, परं निर्धना सा तद्दानाऽसमर्था रोदितुं लग्ना, तदा दयापराभि

प्रातिवेशिमकचतुःस्त्रीभिस्तस्यै दुग्धतंदुलघृतखंडादि सामग्री दत्ता, ततस्तयापि क्षैरेयी निष्पादिता परिवेषिता च पुत्राय. इतः कश्चिन्मासोपवासी साधुस्तत्राहारार्थं समागतस्तं दृष्ट्वा हृष्टेन तेन पुत्रेण स्थालीगता सर्वापि क्षैरेयी साधवे प्रतिलाभिता. साधुगमनानंतरं मात्रा पुत्रस्थालीं रिक्तां दृष्ट्वा तस्यान्यक्षैरेयी परिवेषिता, चिंतितं च मम पुत्रो बहुक्षुधातुरोऽस्ति.

☒ अथ मातृस्नेहदृष्टिपतनात्स बालोऽजीर्णत्वेन रात्रौ मृत्वा तस्यैव नगरे धनाढयैकस्य श्रेष्टिनो गृहे धन्नाभिधः पुत्रः समभवत्. यौवनं प्राप्य तेन द्वासप्ततिकला अभ्यस्ताः, पितरौ तस्य बहुमानं रक्षतस्ततस्तस्य त्रयो भ्रातरो मत्सरं धारयंति, श्रेष्टिना तं वृत्तांतं विज्ञाय तेभ्यः पुत्रेभ्यः प्रोक्तं यूयं कथं खेदं धारयथ? तैः प्रोक्तं वयं वृद्धास्तथाप्यस्मान् विहाय युवां धन्नायैव कथमत्यादरपरौ स्थः? पित्रोक्तं कुमारोऽयं भाग्यवानस्ति, तस्य जन्मतोऽस्मद्गृहे धनधान्यादिवृद्धिर्जातास्ति. तत् श्रुत्वा तैरुक्तं तर्हि यूयमस्माकमपि परीक्षां कुरुत? तदा श्रेष्टिना तत्प्रतिपद्य तेभ्यः पृथक्पृथक् विंशतिविंशतिरूप्यका दत्ताः, प्रोक्तं चैभ्यो रूपकेभ्यो व्यापारं कृत्वा लाभमधिगच्छत? तैर्व्यापारं कुर्वद्भिर्मूलमपि निर्गमितं, निर्द्रव्याश्च संतो गृहे समागताः.

☒ अथ धन्नोऽपि तान् रूप्यकान् गृहीत्वा चतुष्पथे गतस्तत्रैको वैदेशिको निजैकमेषविक्रयार्थमागतस्तेन दृष्टः, धन्नेन तं द्रव्यं दत्वा स मेषो गृहीतः, इतो राजपुत्रो निजैकमेषयुतस्तत्र मार्गे क्रीडार्थं समायातः.

☒ अथ तौ द्वावपि मेषौ जातिस्वभावतः परस्परं योद्धुं लग्नौ. तदा राजकुमारधन्नाभ्यां विनोदेन

परस्परं पणः कृतो यद्यस्य मेषो हारयेत्स सहस्रदीनारं दद्यात्. लोकवृन्दमपि तत्र परितः समूहीभूतं. इतो दैवयोगाद्राजकुमारस्य मेषो हारयित्वा प्रणष्टस्तदा राजकुमारेण निजपणस्थिरीभूतेन धन्नाय दीनारसहस्रं समर्पितं. धन्नोऽपि हृष्टः सन् गृहमागत्य पितुरग्रे तद्दीनारसहस्रं मुक्तवान्. तद श्रेष्टिना तांस्त्रीनपि पुत्रानाहूय प्रोक्तं धन्नस्य भाग्योदयं पश्यत? तैरुक्तमेकवारेण किं? पुनरपि परीचां कुरु? तत् श्रुत्वा पित्रा तेभ्यश्चतुर्भ्योऽपि पृथक् पृथक् षष्टिषष्टिस्वर्णका: समर्पिताः.

☒ अथ ते त्रयोऽपि भ्रातरः पूर्ववन्मूलरहिता एव गृहे समागताः, धन्नस्तु तद्धनं गृहीत्वा चतुष्पथे समायातः ॥

☒ इतस्तस्मिन्नगरे कोऽपि महाधनाढ्यः कृपणः श्रेष्टी वसति, सोऽतिकृपणत्वात्कपर्दिकामात्रमपि कस्मै न ददाति. तद्गाढबंधनव्याकुलीभूतेव कुपिता लक्ष्मीः सर्वदा तस्य भोजनायापि शुद्धमन्नं न प्रयच्छति. एवं तेन बहूनि रत्नानि संचयीकृत्य मंचकचतुःपादमध्ये प्रच्छन्नतया रचितान्यभवन्, तस्य मंचकोपरि च नित्यं स्वयं स्वपिति. मरणावसरे तेन पुत्रेभ्यः कथितं युष्माभिरहमनेन मंचकेन सह श्मशाने समानेयः.

☒ अथ मृतं तं पुत्रा मंचकयुतं श्मशाने समानयामासुः, तं च प्रज्ज्वाल्य मंचकश्च नियमानुसारेण तैः श्मशानरक्षकचांडालाय समर्पितः, चांडालोऽपि द्रव्यार्थं मंचकयुतश्चतुष्पथे समायातः, भाग्याकृष्टेन धन्नेन स मंचको द्रव्यं दत्वा तस्माद्गृहीतः समानीतश्च गृहद्वाराग्रे.

☒ अथ मंचकं विशालत्वाद् द्वारप्रवेशायाऽयोग्यं ज्ञात्वा तेन तस्य पादा मुत्कलीकृता निःसृतानि च तस्माद्रत्नानि, ढौकितानि च तेन पितुः पादाग्रे. तद् दृष्ट्वा ते त्रयोऽपि भ्रातरः श्याममुखीभूय चांडाला इव धन्नमारणेच्छामकुर्वन्.

☒ अथ कुतोऽपि तद्वृत्तांतं विज्ञाय धन्नो पुण्यैकसखो देशांतरंप्रति चलितः, बहुभूमिलंघनानंतरं केनचित्कृषीवलेन तमाहूय भोजनं दत्तं. इतस्तत्र तस्य क्षेत्रे हलोत्खातभूमितो निधानं निःसृतं, परं कृषीवलेन तन्न दृष्टं, धन्नेन तस्मै तद्दर्शितं सोऽतीवहृष्टः, इतो धन्नोऽग्रे चलन् राजगृहे समागत्यैकस्मिन् शुष्कवने स्थितः, परं तस्य पुण्योदयतस्तद्वनं प्रफुल्लितं. तदा हृष्टो वनपालो धन्नं निजगृहे समानीय तस्य बहुभक्तिं चकार. इतस्तस्य माहात्म्यं विज्ञाय श्रेणिकराज्ञा निजपुत्रीसोमश्रीस्तेन सह परिणायिता, गोभद्रश्रेष्टिना च वनपालेनापि निजनिजपुत्र्यो तस्य परिणायिते, राज्ञा तस्मै बहुग्रामधनावासादि दत्तं, धन्नोऽपि देववत्तत्र सुखानि भुंजानस्तिष्टति. इतश्चैकदा गवाक्षस्थेन धन्नेन पथि सकलमपि निजकुटुम्बं रंककुटुम्बमिवेतस्ततो भ्रमद् दृष्टं, धन्नस्तानुपलक्ष्य स्वसमीपे समानयत्, ततस्तेन पित्रे पृष्टं हे पितः कथमेतादृशी विपत्समागता? तेनोक्तं हे वत्स यदा त्वं गृहान्निर्गतस्तदा तव विरहमसहमानेव सकलापि लक्ष्मीर्निर्गता? जाताश्च वयं सर्वेऽपि दुःखिनः, परं क्रमेण त्वामत्र नृपजामातरं विज्ञायागताः स्मः, तत् श्रुत्वा धन्नेन मातापित्रोर्बहुभक्तिः कृता. भ्रातृणामपि बहुमानं समर्पितं, कथितं च यूयमप्यत्र सुखेन मम गृहे तिष्टत? कियद्दिवसानंतरं पुनस्ते दुष्टभ्रातरो धन्नो-

परि मत्सरं धृत्वा योद्धुं लग्नाः. पित्रा बहु प्रतिबोधिता अपि ते नामन्यंत, तदा धन्नः खिन्नः पुनरपि देशांतरंप्रति चलितः, क्रमेण च कौशांबीनगर्यां समागतः.

☒ अथ तस्यां नगर्यां शतानीकाभिधानो राजास्ति, तस्य सौभाग्यमंजर्यभिधाना पुत्री वर्त्तते. किंच राज्ञः पार्श्वे बहुमूल्यमेकं रत्नमस्ति किंतु तस्य परीक्षां कोऽपि न जानाति, राज्ञा पटहोद्घोषणा कृता यद्यः कोऽपि रत्नपरीक्षां करिष्यति तस्मै राजा पंचशतग्रामयुतां निजपुत्रीं प्रदास्यति. तदा धन्नेन नृपाग्रे समागत्य रत्नपरीक्षां विधाय कथितं यस्याग्रे रत्नमिदं संतिष्ठते तस्य राज्यं वृद्धिं प्रयाति, शत्रुरपि तं न पराभवति, किंच भोजनभृतस्थाल्यां यदीदं रत्नं मुच्यते तर्हि कोऽपि पक्षी तत्समीपे नायाति. राज्ञा तत्प्रतीतिं विधाय धन्नाय पंचशतग्रामयुता निजपुत्री परिणायिता.

☒ अथ धन्नस्तत्र तया सह सुखं भुनक्ति. एकदा तेन तत्रैकसरःखननकार्यमारब्धं. तत्र च बहवो निराधारा जनास्तेन धनार्पणपूर्वकं योजिताः.

☒ अथ यद्दिवसाद्राजगृहाद्धन्नो निर्गतस्तद्दिवसात्सर्वमपि धनं तत्पितृगृहान्नष्टं. तदा श्रेष्ठी धन्नस्य द्वे भार्ये तत्पित्रोर्गृहे मुक्त्वा शालिभद्रभगिनीभद्रायुतः सर्वकुटुम्बं गृहीत्वा परदेशे प्रस्थितः, क्रमेण दैवयोगेन कौशांब्यामागतस्तत्र च सरःखननकार्यं दृष्ट्वा हृष्टः सन् कुटुम्बयुतस्तस्मिन् कार्ये लग्नो निजाजीविकां स चकार. पुरुषाः सर्वे खननकार्यं कुर्वंति स्त्रियश्च मृत्तिकादि वाहयंति.

⊠ अथैकदा धन्नश्रेष्ठी नृपयुतस्तत्सरःखननकार्यं विलोकयितुं समागतस्तत्र च कर्मकरजनवृंदमध्ये निजपितृप्रभृतिसकलकुटुम्बं निरीक्ष्य स विस्मितः, कुटुम्बजनास्तु निजनिजकार्यतत्परास्तं नोपलक्षयंति.

⊠ अथ धन्नेन श्रेष्ठिनमाहूय पृष्टं यूयं सर्वे क्व नगरे वसथ? लज्जितेन श्रेष्ठिना धन्नमनुपलक्ष्य सर्वं वितथं कथितं. ततो धन्नेन तस्याभिप्रायं विज्ञाय प्रोक्तं तक्रादिकृते निजवध्वो मम गृहे मोचनीयाः, हृष्टः श्रेष्ठी प्रतिदिनमनुक्रमेणैकैकां वधूं तत्र तक्रादिकृते प्रेषयति, सापि दधितक्रादि गृहीत्वा पुनः श्वशुरसमीपे समागाति.

⊠ अथ यदा भद्रा तक्रग्रहणार्थं समायाति तदा तस्यै कंचुकीप्रमुखवस्त्राण्यपि धन्नोऽर्पयति, भद्रा च तत्सर्वं श्वशुरपार्श्वे मुंचति. तदा स श्रेष्ठी नूनमियं वधूः सौभाग्यवतीति तस्याः प्रशंसां करोति. तत् श्रुत्वा वृद्धपुत्रवधूभिः प्रोक्तं पूर्वं प्रशंसितो देवृधन्नोऽस्मान् विहाय गतोऽधुना कदाचित्प्रशंसिता वधूरपीयं तथैव करिष्यति.

⊠ अथैकदा तक्रमादातुमागता भद्रात्याग्रहेण धन्नेन पृष्टाऽधोमुखीभूय निजसकलमपि वृत्तांतं निवेदयामास. पुनः कथितं चाहमपि भवन्नामतुल्येनैकेन श्रेष्ठिपुत्रेण सह परिणीता परं स मे भर्ता गृहक्लेशान्निर्गतस्तस्याद्यापि क्वापि शुद्धिर्न लब्धा. ततोऽनेकविधां तस्याः सतीत्वस्य परीक्षां विधाय विज्ञाय च तां निश्चलां धन्नेनोक्तं हे सुभगे स एवाहं धन्नोऽस्मीति कथयित्वा तेन सर्वे गुप्तसंकेता उक्ताः, तत् श्रुत्वा तं च सम्-

कुल-
कम्

तपः २२२

पलक्ष्य भद्रा निजनयननिर्गताश्रुजलधाराभिर्भर्तुः पादक्षालनं कुर्वतीव तस्थौ. धन्नोऽपि हर्षाश्रुदंभतस्तस्यै निजस्नेहं प्रकटीकुर्वन् बहुमूल्यवस्त्रालंकारादिभिस्तां शृंगारयुतां निर्माय निजांतःपुरे स्थापयामास. इतो वधूं पश्चादनागतां विज्ञायानेकसंकल्पविकल्पकल्लोलोल्ललितचिंतापारपारावारमध्ये पतितो वधूशुद्धिकरणाभिलापदवरकाकृष्टो द्रुतं तत्राश्रयणीयधन्नगृहतटे समायातस्तदा धन्नोऽपि सद्यः समुत्थाय विनयभारावनतशिराश्चिरकालविरहोद्भूतहृदयदुःखसंचयं हर्षाश्रुमिषेण बहिर्निष्कासयन्निव जनकचरणयोर्नतिं कृतवान्, क्रमेण तत्र सर्वमपि कुटुम्बं मिलितं. पुनरत्र धन्नेन निजभ्रातृभ्यो विभागीकृत्य ग्रामा दत्ताः, परं तेषां मनोभ्यो दौर्जन्यं न दूरीभूतं.

☒ अथ कियत्कालानंतरं धन्नं तत्रस्थं ज्ञात्वा श्रेणिकस्तदाह्वानकृते तत्र निजदूतं प्रेषितवान्. धन्नोऽपि शतानीकमापृच्छ्य बहुगजरथादिपरिवृत्तो भार्याद्वयसमेतो राजगृहे श्रेणिकसमीपे समागतस्तत्र भार्याचतुष्टयं मिलितं. पुनस्तत्र तेन व्यवहारिणां चतुःकन्या अन्याः परिणीताः, एवं तस्याष्टौ भार्याः संजाताः.

☒ अथ धन्नार्पितेषु येषु ग्रामेषु ते त्रयोऽपि भाग्यरहिता भ्रातरोऽवसन् तत्र वृष्टेरभावात्सर्वेऽपि लोका देशांतरे पलायिताः, पितरौ च परलोकं गतौ, भाग्यहीनास्ते त्रयोऽपि भ्रातरो भाटकेन शकटानि वाहयंतो देशांतरे रंकवद्भ्रमंति, एकदा ते शकटेषु भाटकेन धान्यं भृत्वा राजगृहे समागताः, धन्नस्तानुपलक्ष्य स्वसमीपे समाहूयत्, कथयामास च हे भ्रातरः केयं भवतामवस्था? लज्जितास्ते निजापराधं क्षमयित्वा तस्थुः. धन्नस्तान् सन्मान्य पूर्ववन्निजगृहे सुखेन रक्षितवान्. तेऽपि निजमनसः क्लेशभावं दूरीकृत्य निर्मलचित्ताः संतस्तत्र सुखे-

कुल, कम

न भोगान् भुंजाना निजकालं गमयांचक्रुः, इतस्तत्र धर्मघोषाभिधसूरयः समागतास्तदा कुटुंबयुतो धन्नस्तत्रागत्य देशनां शुश्राव. देशनांते धन्नेन पृष्टं हे भगवन् ममैतैर्भ्रातृभिर्लाभांतरायकर्म कथमुपार्जितं? सूरिणोक्तं पूर्वभवे त्रयोऽप्येते कस्मिंश्चिद्ग्रामे भ्रातरोऽभूवन्.

☒ एकदा च ते वने काष्टग्रहणार्थं गतास्तत्र च तैः पार्श्वस्थमन्नं साधवे प्रतिलाभ्य पश्चात्तापं कर्तुं प्रारब्धं, ततस्तैरिदं भोगांतरायकर्म बद्धं. तत् श्रुत्वा धन्नो वैराग्यमासाद्य संसाराद्विरक्तीभूय निजद्रव्यस्य धर्ममार्गे व्ययं विधातुं समारंभं कृतवान्. इतस्तेन शालिभद्रेण सह दीक्षा गृहीतेत्यादिसंबंधः पूर्वमेवोक्तः.

॥ इति श्रीतपःकुलके धन्नर्षिद्वयकथा ॥

मूलम्—सुणिऊण तव सुंदरी—कुमरीए अंबिलाण अणवरयं ॥
सट्ठिं वाससहस्सा । भण कस्स न कंपए हिअयं ॥१५॥

व्याख्या— श्रुत्वा तपः सुन्दर्याः कुमार्या आचाम्लं निरंतरं षष्टिसहस्रवर्षं यावत् त्वं भण कथय कस्य हृदयं न कंपते? अपि तु सर्वेषामपि हृदयं कंपते. अर्थात् षष्टिसहस्रवर्षं यावत्सुन्दरीकृतमाचाम्लतपोवार्त्तां श्रुत्वा को न चमत्कारं प्राप्नोति? ॥ १५ ॥

सुन्दरीकथा चेत्थं—

☒ यदा श्रीऋषभदेवप्रभोः केवलज्ञानं समुत्पन्नं तदा प्रभोर्देशनां निशम्य प्रतिबुद्धा सुन्दरी दीक्षाग्रहणतत्परा जाता, परमियं स्त्रीरत्नं भविष्यतीति विचार्य भरतेन स निवारिता.

☒ अथ भरतोऽपि षष्टिवर्षसहस्राणि यावत् षट्खंडसाधनायाभ्रमत्. भरतगमनानंतरं सुन्दर्या चिंतितं यद्यहं स्त्रीरत्नं भविष्यामि तर्हि मम षष्ठनरके गमनं भविष्यतीति विचार्य तयाचाम्लतपः समारब्धं, षष्टिसहस्रवर्षाणि यावत्तया तत्तपः कृत्वा निजशरीरं शोषितं.

☒ इतो भरतोऽपि सुभद्राभिधाननमिराजपुत्रीस्त्रीरत्नयुतः षट्खंडानि साधयित्वा गृहे समागतः, तत्रातीवदुर्बलां सुन्दरीमालोक्य तेन कोपेन सूपकाराः पृष्टाः किमस्मद्गृहे धान्यं नास्ति ? सूपकारैर्भयविह्वलैः प्रोक्तं स्वामिन् श्रीमंतो यदा देशसाधनाय प्रस्थितास्तदादित इयमाचाम्लतपांसि करोति, तत् श्रुत्वा भरतेन सुन्दरी पृष्टा कथं ते शरीरं दुर्बलं ? तयोक्तं मम चारित्रग्रहणेच्छा वर्त्तते तस्मादादेशं देहि ? ततो भरताज्ञया महोत्सवपूर्वकं तया श्रीऋषभदेवप्रभुसमीपे दीक्षा गृहीता, निर्मलं चारित्रं प्रपाल्य चतुरशीतिलक्षपूर्वायुर्भुक्त्वा केवलज्ञानं च प्राप्य सा मोक्षे गता.

॥ इति श्रीतपकुलके ऋषभजिनपुत्रीसुन्दरीकथा ॥

मूलम्—जं विहिअमंबिलतवं । बारसवरिसाइ सिवकुमारेणं ॥
तं दट्ठूण जंबूरूपं । विम्हइओ सेणिओ राया ॥१६॥

व्याख्या—यद् द्वादशवर्षं यावदाचाम्लतपो येन शिवकुमारेण कृतं, तस्य श्रीजंबूस्वामिनः स्वरूपं दृष्ट्वा श्रेणिको राजा विस्मितः ॥ १६ ॥

— तस्य कथा चेत्थं —

☒ एकदा राजगृहनगरे श्रीमहावीरः समवसृतस्तदा श्रेणिकेन महोत्सवपूर्वकं तत्रागत्य प्रभुं वंदित्वा देशनां च श्रुत्वा पृष्टं स्वामिन्नस्यां चतुर्विंशतौ चरमकेवली को भविष्यति ? स्वामिनोक्तमयं समीपस्थो विद्युन्मालिदेव इतः सप्तमे दिने च्युत्वात्र तव नगरे जंबूनामा चरमकेवली भविष्यति. तदा राज्ञा पुनः पृष्टं स्वामिन्निकटच्यवनकालोऽप्ययं देवो महातेजस्विरूपवान् कथं दृश्यते ? प्रभुणोक्तं मगधदेशे सुग्रामाभिधग्रामे भवदत्तभवदेवाख्यौ द्वौ भ्रातरावभूतां, तयोर्वृद्धभ्रात्रा भवदत्तेन वैराग्येण दीक्षा गृहीता

☒ अथैकदा स निजसंबंधिमिलनाय तस्मिन्नेव ग्रामे समागतः.

☒ अथ तस्मिन्नवसरे भवदेवो नागिलाभिधां स्त्रियं परिणीय तस्या मंडनकार्ये तत्पर आसीत.

भवदत्तं समागतं विज्ञाय संबंधिनो घृतादिभिर्भक्त्या तं प्रतिलाभयामासुः, इतो भवदेवोऽपि निजभ्रातरमागतं
श्रुत्वाऽर्धमंडितामेव निजभार्यां त्यक्त्वा वंदनोत्सुकस्तस्य समीपे गतो वंदित्वा च पार्श्वे स्थितः, तदा मुनिना
झोलिकायां निजपात्राणि सम्यक्कुर्वता हस्तस्थं घृतपात्रं भूमौ मुक्तं, विनयान्वितेन भवदेवेन भूमितरतन्निजहस्ते
धृतं, तावता भवदत्तस्ततः प्रस्थितो भवदेवोऽपि तद्घृतपात्रमादाय तस्य पृष्टे गतः.

☒ अथ पृष्टागता अन्ये सर्वेऽपि संबंधिनो नगरप्रतोलीतो व्याघुट्यवलिताः, भवदेवेन चिंतितं भ्रातुः
पार्श्वे झोलिकायामतिभारोऽस्ति, ततस्तस्मै पात्रमिदं दत्वा पश्चाद्वलनं ममायुक्तमेव.

☒ अथानेकविधां वार्त्तां पथि कुर्वंतौ तौ द्वावपि वने गुरुसमीपे प्राप्तौ. भवदेवं दृष्ट्वा गुरुणोक्तं
कोऽयं तरुणः ? भवदत्तमुनिनोक्तं भगवन्नयं मम भ्रातास्ति. पुनर्गुरुणोक्तं घृतपात्रोत्पाटनेन कथमयं दीक्षाभि-
प्रायेण समागतोऽस्ति ? भवदत्तेनोक्तं भगवान् यथादेशं दास्यति तथाहं करिष्यामि. तत् श्रुत्वा गुरुणा भवदेवं
प्रत्युक्तं भो भवदेव किं ते चारित्रग्रहणभावोऽस्ति ? तदा तेन विनयिना विचारितं भ्रातृवचनमलीकं न कार्य-
मिति विचिंत्य तेनोक्तं मम भावोऽस्ति. तदा गुरुणापि ज्ञानतो लाभं विज्ञाय तत्क्षणं तत्रैव तस्य दीक्षा दत्ता.

☒ अथ भवदेवस्तु निजनवपरिणीतां स्त्रियं स्मरमाणो लज्जयैव केवलं चारित्रं पालयति.

☒ अथ कालांतरे वृद्धभ्राता भवदत्तोऽनशनं कृत्वा मृत्वा च सौधर्मदेवलोके देवो जातस्ततो भव-

देवेन चिंतितं मया केवलं भ्रातुः प्रीतये एव चारित्रं गृहीतमस्ति.

☒ अथ भ्राता तु स्वर्गभागभवत्, किंच मद्विरहदुःखिनी नवपरिणीतनागिला चंद्रं विना चकोरीव ताम्यंती भविष्यति. इत्यादि चिंतयन्नसौ गुरुमनापृच्छयैव स्वीयग्रामं समागत्य निजगृहे समायातो गृहांगणोपविष्टां नागिलां च दृष्ट्वापि तां स नोपलक्षयामास, तया च चतुरया स उपलक्षितः, ततस्तेन पृष्टं मम भार्या नागिला क्वास्ति ? नागिलयोक्तं सैवाहमस्मि, परं हे मुने त्वयाधुना मदर्थं चारित्रं न त्याज्यं. इत्यादि मिष्टवचनैस्तया प्रतिबोधितोऽसौ द्रुतं पश्चाद्गुरुपार्श्वे समागत्यालोचनां जग्राह. नागिलयापि साध्वीसमीपे दीक्षा गृहीता. प्रांते भवदेवः शुद्धं चारित्रं प्रपाल्य सौधर्मदेवलोके सामान्येंद्रो जातस्तत्र च तौ द्वावपि भ्रातरौ परस्परं महाप्रीतिवंतौ जातौ.

☒ अथ भवदत्तजीवस्तु क्रमेण ततश्च्युत्वा पुष्कलावतीविजये पुन्डरीकिण्यां नगर्यां चक्रवर्तिपुत्रो जातस्तत्र च यौवनं प्राप्य दीक्षामादायावधिज्ञानं च स प्राप्तवान्. भवदेवजीवोऽपि तत्रैव विजये वीतशोकायां नगर्यां पद्मरथनृपस्य शिवकुमाराभिधः पुत्रो जातः, परिणीताश्च तेन पंचशतस्त्रियः.

☒ एकदा निजपूर्वभवभ्रातरं चक्रिपुत्रं वीक्ष्य प्रतिबोधं प्राप्य स दीक्षाग्रहेच्छुर्जातः, परं मातापितृभ्यां निवारितोंतःपुरमध्ये भावयतित्वं पालयन् स्थितः, सर्वा अपि नार्यो हावभावादिविलासांस्तस्य पुरः कुर्वंति परं स मनागपि नो चलितः, तत्रस्थोऽयं नित्यं षष्ठंषष्ठेनाचाम्लतपः करोति, एवं स द्वादशवर्षावधि तपस्तप्त्वा

पंचमदेवलोकवास्ययं विद्युन्माली देवोऽभूत्. आचाम्लतपःप्रभावेणायमखंडिततेजोयुक्तो वर्त्तते.

⊠ अथानंतरं स देवः सप्तमे दिवसे ततश्च्युत्वा राजगृहनगरे ऋषभदत्तव्यवहारिणो धारिणीनामभार्यायाः कुक्षौ जंबूवृक्षस्वप्नसूचितपुत्रत्वेनोत्पन्नः, स्वप्नानुसारेण तस्य जंबूकुमार इति नाम दत्तं. क्रमेण यौवनं प्राप्तोऽसौ समुद्रश्रीप्रभृत्यष्टौ कन्याः केवलं पित्रोराग्रहेण परिणीतवान्. परं स्वयं वैराग्ययुक्तो ब्रह्मचर्यैकलीनस्ताः प्रतिबोधयामास. इतो जयपुरनगरे विंध्याभिधराज्ञः प्रभुप्रभवाभिधौ पुत्रावास्तां. राज्ञा स्नेहतो लघुपुत्राय प्रभवे राज्यं दत्तं, ततो ज्येष्टपुत्रप्रभवः कुपित श्चौरपल्ल्यां समागत्य चौरवृत्तिं कृतवान्.

⊠ अथैकदा स पंचशतचौरयुतो राजगृहे जंबूकुमारगृहे चौर्यार्थं समागत्य सर्वेभ्योऽवस्वापिनीं निद्रां दत्वा धनं गृहीतुं लग्नः

⊠ अथ जंबूकुमारस्य ब्रह्मचर्यमाहात्म्येन सा निद्रा नागता, ततोऽसौ तांश्चौरान् दृष्ट्वा नमस्कारमहामंत्रस्य निजमनसि ध्यानमकरोत्. तत्प्रभावतस्ते सर्वेऽपि चौराः स्तंभितास्तदा प्रभवो जंबूकुमारं नत्वा विज्ञपयामास हे जंबो त्वं मम स्तंभिनीं विद्यां देहि ? मम पार्श्वाचानस्वापिनीं तालोद्घाटिनीं च द्वे विद्ये गृहाण ? जंबूकुमारेणोक्तं प्रातरहं पितरौ प्रतिबोध्य दीक्षामादास्ये, मम विद्यायाः प्रयोजन नास्ति. किंच मम पार्श्वे कापि विद्या नास्ति. केवलं यूयं शासनदेव्यैवस्तंभिताः स्थ. इति श्रुत्वा प्रभवेन सर्वेषामप्यवस्वापिनी निद्रा पश्चात्संहृता कथितं च हे मित्र यौवनेऽपि त्वं विषयसुखपराङ्मुखः कथं वर्त्तसे ? जंबूकुमारेणोक्तं हे प्रभव सांसा-

रिकविषयोऽयं मधुबिंदुसदृशोऽस्ति. यथा कश्चित्पुरुषः सार्थाद्भ्रष्टो वने मदोन्मत्तगजेन दृष्टस्ततो भीतोऽसौ कूपोपरि लंबमानैकवटवृक्षशाखायां विलग्नो गजेन शुंडातस्तमादातुं बहुः प्रयत्नः कृतः परमशक्तो बभूव, द्वौ मूषकौ तां शाखां कर्त्तयतः, गजश्च तां वृक्षशाखां धूनयितुं लग्नः, इतोऽधः कूपमध्ये विकासितनिजभयंकरमुखौ द्वावजगरौ तेन दृष्टौ, चतुःपार्श्वेषु चतुःकृष्णसर्पाः फूत्कारं कुर्वंतस्तेन दृष्टाः.

☒ अथ वटवृक्षोपर्येकं मधुच्छत्रमस्ति, ततो मधुमक्षिका उड्डीय तच्छरीरे दंशान् ददाति, परं मधुच्छत्रतो झरन्मधुबिंदुस्तस्य मुखे पतति. तदास्वादनलोलुपोऽयं सर्वमपि पूर्वोक्तं दुःखं विस्मरति. इतः कश्चिद्विमानस्थेन विद्याधरेण तत्रागत्य कथितं भो पुरुष त्वामहमस्माद्दुःखान्निष्कासयामि ततस्त्वं मम विमाने समागच्छ ? तेनोक्तं स्तोकान्मधुबिंदूनास्वाद्यागमिष्यामि. तत् श्रुत्वासौ विद्याधरो गतः.

☒ अथ हे प्रभव त्वमस्य दृष्टांतस्योपनयं शृणु ? पुरुषसदृशोऽयं संसारिजीवः, संसाररूपेयमटवी, कूपो हि मनुष्यजन्म, मृत्युरूपो गजः, नरकतिर्यग्गतिरूपावजगरौ, चतुःकषायरूपाः सर्पाः, शाखारूपमायुः, मूषकौ हि कृष्णशुक्लपक्षौ, मक्षिकारूपशोकवियोगादिदुःखानि, मधुबिंदुरूपं च विषयसुखं, विद्याधररूपश्च सद्गुरुर्ज्ञेयः, अतो हे प्रभव प्रभातेऽहं श्रीसुधर्मस्वामिपार्श्वे दीक्षां गृहिष्यामि, प्रभवेनोक्तं हे मित्र ? मातृपितृभार्यादिसंबंधिस्नेहः कथं तव मानसं नार्द्रीकरोति ? जंबूकुमारेणोक्तं हे प्रभव ? एवंविधाः संबंधाः संसारेऽनेके जायंते, तत्त्वतोऽयं जीव एकाक्येवास्ति. कुबेरदत्तवद्यो बहुस्नेहं करोति स कर्मणा बद्ध्यते.

तथाहि—मथुरानगर्यां कुबेरसेनाभिधगणिका बहुनटविटैः सह भोगादि भुनक्ति. सैकदा गर्भिणी जाता, तया गर्भपातनायानेके उपायाः कृताः परं गर्भो नो पतितः, अनुक्रमेण च तया युगलं प्रसूतं. तयोः करांगुल्योः कुबेरदत्तकुबेरदत्तेत्यभिधानांकितमुद्रिके समारोप्य काष्टपेटायां च तौ संस्थाप्य सा पेटी यमुनामध्ये प्रवाहिता. प्रभाते द्वाभ्यां व्यवहारिभ्यां स्नानार्थं नदीतटगताभ्यां दृष्टा, गृहीता च ताभ्यां विभागीकृत्य. गृहमागत्य तौ बालौ ततो निष्कास्य निजसंतानवत्पालयामासतुः, क्रमेण यौवनं प्राप्तौ तौ परस्परं परिणायितौ.

⊠ अथैकदा कुबेरदत्तकरांगुलिस्थां मुद्रिकां दृष्ट्वा शंकितया कुबेरदत्तया कथंचिन्मातापितृभ्यां स्वकीयभ्रातृभगिनीसंबंधं विज्ञाय वैराग्येण दीक्षा गृहीता, तपसा च तस्या अवधिज्ञानं समुत्पन्नं. इतः कुबेरदत्तो व्यापारार्थं मथुरायां गतस्तत्र च दैवयोगेन तस्य निजमात्रा कुबेरसेनया सह संबंधो जातः, प्रसूतश्च तयैकः पुत्रः.

⊠ अथ कुबेरदत्ता साध्वी तदनर्थं निजज्ञानेन विज्ञाय मथुरायां कुबेरसेनागृहे समागता, तयोः प्रतिबोधाय च तं बालमष्टादशविधसंबंधसूचकवचनोपेतगीतैरुल्लापयती विनोदमकारयत. तत् श्रुत्वाश्चर्यं प्राप्तौ तौ द्वावपि मुद्रिकाभिज्ञानदर्शनपूर्वकं सा प्रतिबोधयामास. तदा कुबेरदत्तेन दीक्षा गृहीता, कुबेरसेनया च सम्यक्त्वं गृहीतं.

⊠ अतो हे प्रभव ! संसारमध्येऽनेकविधाः संबंधा भवंति, संबंधिपंजरबद्धा शुका इव विद्वांसोऽपि जना मोक्षसुखं न प्राप्नुवंति. प्रभवेणोक्तं हे मित्र ! लोके कथ्यते यद्विना पुत्रेण प्राणी दुर्गतिं प्राप्नोति

तन. २३१

तत्कथं ? जंबूकुमारेणोक्तं शृणु ? ताम्रलिप्त्यां नगर्यामेको महेश्वरदत्ताख्य· सार्थवाहो वसति, तस्य गांगिलाभिधा भार्या, सा दुःशीला परपुरुषासक्ता बभूव.

☒ अथैकदा महेश्वरदत्तमातापितरौ मृत्वा तस्मिन्नेव नगरे क्रमेण शुनीमहिषौ जातौ.

☒ एकदा महेश्वरदत्तेन निजभार्या गांगिला परपुरुषेण सह विलासं कुर्वंती दृष्टा, ततः क्रुद्धेन तेन स पुरुषो व्यापादितः, स च गांगिलैकध्यानतो मृत्वा तस्या एव गर्भे स्ववीर्येण समुत्पन्नः, क्रमेण तया स बालः प्रसूतः, पुत्रप्रसवतो गांगिलापि भर्तुः मादरा जाता, महेश्वरदत्तश्च तं बालं निजपुत्रं जानन् निजोत्संगे संस्थाप्यामंदानंदमनुभवति.

☒ अथ निजपितुः श्राद्धदिने महेश्वरदत्तस्तमेव निजपितृजीवमहिषं द्रव्यदानपूर्वकं गृहीत्वा तं च व्यापाद्य तन्मांसेन निजसंबंधिनः प्रोणयामास. गृहमध्ये प्रविशंतीं तां निजजननीजीवरूपशुनीं च यष्ट्यादिभिः कुट्टयित्वा स बहिर्निष्कासितवान्. सापि बहिःक्षिप्तान्यस्थिखंडानि भक्षयति. तदैवाहारार्थं तत्रागतेनैकेन ज्ञानिमुनिना तं वृत्तांतं स्वज्ञानेन ज्ञात्वा पश्चाद्वलितं. तदा महेश्वरदत्तेन मुनिपार्श्वे समागत्योक्तं हे मुने अद्य मत्पितु सांवत्सरिकश्राद्धमस्ति ततस्त्वं भिक्षां गृहाण ? मुनिनोक्तं मांसभोजिगृहस्थगृहाद्वयं भिक्षां नाधिगच्छामस्तत्रापि त्वं तु पितृमांसभोज्यसि. तत् श्रुत्वा विस्मितेन महेश्वरदत्तेन पृष्टो मुनिः सर्वमप्युदंतं कथितवान्. तत् श्रुत्वा पार्श्वस्थशुन्या जातिस्मरणं समुत्पन्नं. ततस्तेन पुनः पृष्टं हे मुने कृपां विधाय तदभिज्ञानं दर्शय ? मुनिनोक्तं

फल कम्

गृहमध्ये मुक्तेयं प्राप्तजातिस्मरणा शुनी गृहस्थं निधानं ते दर्शयिष्यति महश्वरदत्तेन गृहमध्ये मुक्ता शुनी तथैव निजपादखननेन तस्मै निधानं दर्शयामास. तद् दृष्ट्वोत्पन्नविश्वासेन महेश्वरदत्तेन वैराग्योद्भवनतः संसारं त्यक्त्वा दीक्षा गृहीता. गतश्च सद्गतौ. अतो हे प्रभव त्वं विचारय संसारसागरनिमज्जतो जंतोः पुत्राः कथमुद्धारकारका भवंतीति. तत् श्रुत्वा प्रतिबुद्धेन प्रभवेणोक्तं हे स्वामिन्नहमपि त्वया सार्द्धं चारित्रमादास्ये.

☒ अथ समुद्रश्रीरुवाच स्वामिन् दीक्षाग्रहेणेच्छुस्त्वं कदाचित्कृषीवल इव पश्चात्तापं प्रयास्यसि.

तथाहि—सुसीमाभिधग्रामे कश्चिदेको बकाभिधः कृषीवलोऽवसत्, तेन निजक्षेत्रे कंगुकोद्रवादिधान्यमुप्तं.

☒ एकदा च निजसंबंधिमिलनाय स निकटवर्त्तिग्रामे गतस्तत्र संबंधिनां गृहे तेन गुडमिश्रितपोलिकानां भोजनं प्राप्तं. हृष्टेन बकेन तेभ्यः पृष्टं गुडगोधूमादि कथं निष्पाद्यते ? तदा तैस्तस्मै गोधूमेक्षुनिष्पत्तिविधिः कथिता, द्रुतं गृहे समागतोऽसौ गोधूमेक्ष्वभिलाषी बकः पुत्रादिभिर्निवारितोऽप्यर्धनिष्पन्नकंगुकोद्रवाद्युत्पाटितवान्, ततस्तेन तत्र गोधूमवपनेच्छातः कूपः खनितः परं वंध्यास्तनाद्दुग्धमिव तस्मात्पानीयं न निःसृतं ततो द्वाभ्यां भ्रष्टोऽसौ पश्चात्तापपरो ज्ञातः, एवं हे स्वामिंस्त्वमप्येतानि संप्राप्तसुखानि परित्यज्य मोक्षसुखाभिलाषतः कदाचित्पश्चात्तापं प्रयास्यसि. जंबूकुमारेणोक्तं हे कामिनि काकतुल्योऽहं नास्मि.

☒ अथ विंध्याचलाटव्यां नर्मदाभिधतटिनीतटे वृद्धैकहस्ती मृतस्तदा कोऽप्यतिमांसलौलुपः काकस्त-

स्यापानद्वारतस्तत्कलेवरमध्ये प्रविश्य तन्निजकुलीयमिव मन्यमानो मांसं स्वादयन् रात्रिंदिवा तत्रैव निवासं कृतवान्, इतो भीष्मग्रीष्मतापपरितप्तं तदपानद्वारं शुष्कीभूय संकुचितं, मरुदागमनमार्गनिरुंधनेन व्याकुलीभूतोऽयं काको बहिर्निस्सरितुमनेकानुपायानकरोत्. इतो गंभीरगर्जनप्रयाणभेरीभांकारबधिरीकृतदिग्भागः सौदामिनीशाणोत्तीर्णनिशितासिकुंतततिमंडितो भीष्मग्रीष्मारिमपि निर्बलीकुर्वन्नाकृष्टधनुर्निर्गतमुशलपरिमितजलधाराशरघोरणीभी रणाभिमुख इव मेघमहीपतिः समायातः, तदा नर्मदापि मदाकुलकुलटांगनेव दीर्णशेवालनीलोत्तरीया, विविधजलविभ्रमान् दर्शयंती, निजस्वच्छंदचारेण कुलद्वयमपि पातयंती, निजांगजानपि बालवृद्धपादपान्मूलादुन्मूल्येतस्ततो निःक्षेपयंती, उल्लसल्लोलकल्लोलकरोच्छालनं कुर्वंती, निजजनकाद्रिराजहृदयमपि स्फोटयंति, निजतुल्यचापल्योद्धतमन्यलघुनदीसखीगणमपि सार्द्धं नयंती, पथि निजनिवारणोद्यतानेकपदार्थानप्यवगणयंती निशोद्भूतघोरतमस्यपि निर्भयैव चचाल.

☒ अथ नर्मदायास्तस्मिन् जलपूरे तद्गजकलेवरं कल्लोलैरुल्लाल्यमानं काकदौर्भाग्याकृष्टमिवाग्रे चचाल. क्रमेण नदीप्रवाहैः प्रेर्यमाणस्तन्मध्यस्थः परलोकप्रयाणार्थी वायसोऽपि परद्वीपगमनार्थी यानारूढः पोतवणिगिव महासागरे समायातः.

☒ अथ तद्गजकलेवरस्य जलार्द्रीभूतमपानद्वारमपि पुनर्विवरितं विलोक्य गिरिकंदरातो घूक इव काकस्तस्माद्बहिर्निस्सरितः, कारागारनिस्सरित इव द्रुतमुड्डितोऽप्यभव्यः संसारपारमिव स जलनिधेस्तटं न प्राप्तः, उड्डीयोड्डीय श्रांतः पुनरपि तत्रैव कलेवरोपरि स्थितः.

☒ अथ तत्कलेवरमपि नक्रचक्रमकरादिजलजंतुभिर्विदार्यमाणं जलभाराक्रांतं जलधौ निमग्नं सार्द्धं काकोऽपि जलशरणीभूय पंचत्वं प्राप्तः, एवं हे कामिनि काक इवाहं भवच्छरीरकलेवरार्थी सन् घोरसंसारसागरे पतितुं नेच्छामि.

☒ अथ द्वितीया पद्मश्रीरुवाच हे स्वामिन् त्वं वानरवत्पश्चात्तापं करिष्यसि.

तथाहि—कस्यामप्यटव्यामेकं वानरवानरीयुगलं परस्परमतीवस्नेहपरमवसत्.

☒ एकदा गंगातटिनीतटेऽटनं कुर्वन् वानरो द्रहमध्ये पतितो जातश्च तीर्थप्रभावेण मनोहररूपोपेतो मनुष्यः, तं तथाभूतं दृष्ट्वा वानर्यापि तथैव कृतं. जाता च सापि मनोहररूपा मानुषी. ततस्तौ दंपती मानुष्यभवसुखानि भुनक्ति. पुनरेकदा तेनैको द्रहो दृष्टस्तदा निजभार्यां प्रत्युक्तमस्मिन् पतनादहं देवत्वं लप्स्ये, भार्ययोक्तं स्वामिन्नतीव लोभो न कर्त्तव्यस्तथापि स मूर्खस्तामवगणय्य तस्मिन् द्रहे पतितो जातश्च पुनर्वानरः, इतस्तत्र केचिन्नृपसेवकाः समागताः, ते च तां भव्यरूपामेकाकिनीं स्त्रियं दृष्ट्वा गृहीत्वा राज्ञेऽर्पयामासुः राज्ञा च सा पट्टराज्ञी कृता, इतोऽसौ वानरः केनचिद्योगिना गृहीत्वा नृत्यादिकलाकुशलो विहितः, कियद्दिवसानंतरं स योगीवानरयुतस्तस्य नृपस्य पार्श्वे द्रव्यार्थं नर्त्तयन् समायातः. तत्र नृपार्धासनस्थां निजभार्यां दृष्ट्वा वानरो रुदितुं लग्नस्तदा राज्ञ्योक्तं हे वानर अतिलोभतोऽविचारितं कार्यं कृत्वा प्राणी पश्चातापं प्राप्नोत्येव. तथैव हे

स्वामिन् त्वमपि पश्चात्ताप प्रयास्यसि. जंबूकुमारेणोक्तमहमंगारकारक इव नास्मि, यथा कश्चिदंगारकारको ग्रीष्मकालेंगारकरणार्थमटवीमध्ये प्राप्तो जातश्च तृषातुरः, ततो जलार्थं बहुभ्रमणं कुर्वता तेन स्तोकजलबहुलकर्दमयुतं पल्वलं दृष्टं, तत्कर्दमयुतं पानीयं जिह्वालेहनपूर्वकं पीत्वापि स तृप्तो न जातस्ततोऽग्रे गच्छन्मूर्छया पतितः, स्वप्ने च तेनानेकतडागकूपसमुद्रा अपि जलपानतो निर्जलीकृताः, जागृतोऽसौ तृषातुरमेवात्मानमपश्यत्.

☒ एवं हे कामिनि कर्दमयुक्तजलतुल्यभवद्भोगैर्नाहं तृप्तीभवितुमिच्छामि. तदा पद्मसेनयोक्तं हे स्वामिन् त्वं नूपुरपडिताशृगालकथां शृणु ? यथा राजगृहनगरे देवदत्ताभिधः स्वर्णकारोऽवसत्. तस्य पुत्रो देवदिन्नाभिधस्तस्य भार्या च दुर्गिलाभिधा. सा सुंदररूपलावण्ययौवनाद्युपेता निजकटाक्षशरश्रेणिभिरनेकतरुणपुरुषचित्तपक्षिणः पातयंती नगरे स्वच्छंदतया भ्रमति.

☒ अथैकदा सा ग्रीष्मर्तौ स्नानार्थं तटिनीतटप्राप्ता सकलांगपरिहितस्वर्णरत्नाभूषणाजलदेवीवाशोभत. मदनगंधगजेंद्रकुंभस्थलाविव मुक्तमालालंकृतौ जगत्त्रयसमुद्यतमकरध्वजमहीधरगिरिदुर्गाविव पयःप्रवाहोत्पत्तिस्थानौ निजस्तनमंडलौ दर्शयती सा शनैःशनैः स्वकीयकंचुकमुत्तारयामास. ततो नदीजलमध्ये समागत्य स्वकीयोच्चपीनस्तनौ तुंबयंती जलकल्लोलानवगाहमाना सखीभिः सह विविधनर्मकेलिकुतूहलोपेतवचनविलासैर्वशिनामपि पुंसां कामोन्मादं जनयंती चापल्योपेततरंगिणीसखीकृततरंगहस्तालिंगनं स्वीकारयति, परिहितैकमात्रांतरीया विस्रस्तकेशपाशा धौताधरपल्लवरागा तत्कालं रतोच्छिन्नप्रमदेव सा दुर्गिला नदीमध्ये जलक्रीडां चकार. इतस्तां तथाविधां निरीक्ष्य कामा-

निलप्रेरितौ युवैकस्तस्याः समीपमागत्योवाच हे सुभगे तेऽहं सुस्नातकुशलं पृच्छामि, मदनातुरया तयाप्युक्तं मम सुस्नानपृच्छकस्याहं समीहितं पूरयिष्यामि.

☒ अथ क्रमेणोपायतस्तस्य स्वर्णकारस्य गृहपृष्टे वाटिकायां रात्रौ तयोः संबंधो जातस्तत्रैव च तयोर्निद्रा समागता. लघुचिंतार्थमुत्थितेन श्वशुरेण तत्र परस्परालिंगनपूर्वकं निद्रावशं प्राप्तौ तौ दृष्ट्वा विस्मितेन गृहांतरागतेन पुत्रस्तु निजस्थाने एकाक्येव निद्रितो दृष्टः, तदा तेन चिंतितमस्या दुःशीलाया इमं वृत्तांतं प्रभाते चेत्पुत्रस्य कथयिष्यामि तर्हि स नैव मानयिष्यतीति विचिंत्य तेन शनैस्तस्याः पादतो नूपुरमभिज्ञानार्थमुत्तार्य गृहीतं, तावता विनिद्रया तया चतुरया कुलटया श्वशुरः समुपलक्षितः.

☒ अथ श्वशुरगमनानंतरं तया जाराय कथितमावयोर्वृत्तांतोऽयं मे श्वशुरेण ज्ञातोऽस्ति.

☒ अथ प्रभातेऽहं यदा शोभनयक्षपूजायै गच्छेयं तदा त्वया कृत्रिमग्रथिलीभूय ममालिंगनं सर्वजनमध्ये पथ्येव देयं, इत्युक्त्वा जारं विसर्ज्य सा गृहमध्ये पतिपार्श्वे समागता, भर्त्तारं गतनिद्रं विधाय तयोक्तं हे स्वामिन्नत्रातपातुराया मामद्य निद्रा नायाति, अत आवां वाटिकायां गत्वा निद्रां कुर्वः, सरलेन देवदिन्नेन तत्प्रतिपद्य तथैव कृतं. क्रमेण स च तत्र निद्रां प्राप, घटिकाद्वयानंतरं कुटिलया तया स्वामिनं गतनिद्रं विधाय कथितं हे स्वामिन् तव कुलेऽयमाचारो न शोभते, यत्त्वया सह सुप्ताया मम पादान्नूपुरं गृहीत्वा

तत्र पिता गृहमध्ये गतः, एवंविधश्चायं दुर्बुद्धिर्नूनं प्रभाते मच्छिरसि कलंकं दास्यति. देवदिन्नेनोक्तं हे प्रिये त्वं विषादं मा कुरु ? अहं मम पित्रे सत्यं कथयिष्यामि. अथ प्रभाते देवदिन्नेन निजपितरंप्रत्येतद्विषये उपालंभो दत्तः. पित्रा बहु कथितं तथापि तेन न मानितं.

☒ अथ तौ विवदमानौ दृष्ट्वा स्त्रीचरित्रैकदक्षया दुर्गिलया कथितं नूनमहमद्य शोभनयक्षस्य पादाभ्यां निःसृत्य स्वसतीत्वं प्रकटीकरिष्ये, इत्युक्त्वा सा पूजोपकरणयुता यक्षमंदिरंप्रति चलिता, लोका अपि तत्कुतूहलेक्षणकृते तत्र बहवो मिलिताः, इत. स जारो ग्रथिलीभूय पथ्येव लोकेषु पश्यत्सु तामालिलिंग, तया च निर्भर्त्स्य स दूरीकृतः, अथ तया यक्षाग्रे समागत्योक्तं हे यक्ष मया मे भर्तारं तथैवाधुना स्पृष्टमेतं ग्रथिलं विनान्यस्य कस्यापि पुरुषस्य चेत्स्पर्शः कृतो भवेत्तर्हि मम शिक्षां कुरु ? इत्युक्तवती द्रुतमेव सा यक्षपादाभ्यां निर्गता, यक्षस्तु तस्याः स्त्रीचरित्रकपटपाटवं चिंतयन्नेव तस्थिवान्, लोकैरपि सतीति कथ्यमाना सा गृहं समायाता.

☒ अथ तदादितो स्त्रीचरित्रविषण्णीभूतो देवदत्तो रात्रावपि गतनिद्रो बभूव, तं गतनिद्रं श्रुत्वा राजा निजप्रासादे प्राहरिकं कृतवान्.

☒ अथ राज्ञः पट्टराज्ञी मेंठेनैकेन सह लुब्धासीत्, सा तस्य पार्श्वे गमनोत्सुका पुनः पुनः शयनादुत्थाय द्वाराग्रे समायाति परं तं स्वर्णकारमनिद्रं ज्ञात्वा पश्चाद्वलति.

☒ अथ तत्कारणजिज्ञासुः स्वर्णकारः कपटनिद्रया सुप्तस्तदा राज्ञी तं गाढनिद्रितं विज्ञाय गवाक्षे समागता. तत्र बद्धहस्तिना च शुंडादंडेन साऽधः समुत्तारिता, तत्र मेंठेन सह भोगविलासं विधाय तथैव हस्तिशुंडाप्रयोगेण गवाक्षे समागत्य सा निजालये शयनीये सुप्ता. तद् दृष्ट्वा स्वर्णकारेण चिंतितं यदि राजगृहेऽप्येतादृगकार्यं भवति तर्हि मम गृहस्य तु का वार्त्ता ? इति चिंतयतः शांतीभूतचित्तस्य तस्य सुखनिद्रा समागता. प्रभातेऽपि तमजागृतं ज्ञात्वा राज्ञा निजसेवकेभ्यः कथितं यदि स गतनिद्रो भवेत्तदा मम पार्श्वे समानीयः.

☒ अथ प्रहरानंतरं गतनिद्रोऽसौ सेवकै राज्ञोऽग्रे नीतः, राज्ञा च तस्य गाढाग्रहेण निद्राकारणं पृष्टं, तदा तेनाभयदानमार्गणपूर्वकं सर्वोऽपि निशावृत्तांतो राज्ञोऽग्रे निवेदितः, तत् श्रुत्वा कुपितेन राज्ञादिष्टं गजमेंठसहितेयं राज्ञी वैभारगिरितः पातयित्वा व्यापादनीया.

☒ अथ मेंठेन स गजो वैभारशिखरोपरि समानीतः स्थापितश्च त्रीपदैः, तदा लोकै राज्ञे विज्ञप्तिः कृता स्वामिन् शिक्षितोऽसौ गजो रक्षणीयः, किं तु राज्ञा तन्न स्वीकृतं, तदा मेंठेन स द्वाभ्यां पदाभ्यां स्थिरीकृतस्तथापि राज्ञः कोपो न शशाम. प्रांते चैकपदस्थितं गजं विलोक्य लोकानामप्यत्याग्रतं विज्ञाय गजरक्षणपूर्वकं राज्ञा राज्ञीमेंठयोर्वधः समादिष्टः.

☒ अथ तं गजं गिरिशिखरादुत्तारयितुं कोऽपि समर्थो नाभूत्, तदा तेन मेंठेनोक्तं हे स्वामिन् चेदावयोरभयदानं मिलेत्तदाहं तं गजं कुशलेनाथ उत्तारयामि. राज्ञा तत्स्वीकृतं, तदासौ शनैःशनैः कुशलेन तं गजं गिरितः समुत्तारयामास. ततो राज्ञा तावभयदानपूर्वकं देशान्निष्कासितौ.

☒ अथ तौ ततो निःसृत्य रात्रौ नगरस्यैकस्य समीपे समागत्य बहिरेव कस्मिंश्चिद्देवकुले स्थितौ. श्रांतस्य मेंठस्य निद्रा समागता, इतश्चैकश्चौरो नगरात्प्रणश्य तत्र देवकुले लीनो वेष्टितं च देवकुलमारक्षकैः, अथ तमसि राज्ञी चौरशरीरं सुस्पर्शं विज्ञाय तंप्रति कथयामास भो सुभग चेत्त्वं मां स्वीकरिष्यसि तदाहं त्वां जीवंतं रक्षयिष्यामि, चौरेण तत्प्रतिपन्नं, कामवशीकृतहृदयया राज्ञ्यापि निजः सर्वो वृत्तांतस्तस्मै गदितः.

☒ अथ प्रभाते आरक्षका मध्ये प्रविश्य तत्र चैकां स्त्रियं पुरुषद्वयं च दृष्ट्वा स्त्रियंप्रत्यपृच्छन् एतयोर्द्वयोर्मध्ये कश्चौरोऽस्ति ? राज्ञ्या मेंठो दर्शितः, ततस्तैर्नृपादेशतो मेंठोऽसौ शूलिकाग्रे निक्षिप्तो जिनदासश्रावककथनेन च नमस्कारं स्मरन् मृत्वा देवीभूतः, अथैतश्चौरयुता राज्ञी प्रस्थिता, पथि चैका जलपूर्णा नदी समागता, तदा चौरेणोक्तं तव वस्त्राभूषणादि मम समर्पय ? यथाहं तत्सर्वं परतीरे मुक्त्वा पश्चादागत्य गताधिकभारां त्वामुत्पाट्य परतटे गच्छामि. तदा राज्ञ्यापि नग्नीभूय तत्सर्वं तस्मै समर्पितं. चौरोऽपि तद्ग्रंथिं शिरस्यादाय महाकष्टेन परपारं प्राप्तो विचारयति, यन्नदीमूलप्रदेशे नूनं मेघवृष्टितो नद्यां जलमधिकाधिकं स-

मायाति, तेनाथ नदीमध्यप्रवेशो ध्रुवं ममाकालमरणायैव भविष्यति. किंच नृपमेंठयोः प्रत्यपि प्रीतिपरा न जाता, सा मयि प्रीतिभाजनं कथं भविष्यतीत्यादि विचिंत्य ग्रंथिमादाय स चलितस्तदा राज्ञ्या पूत्कारं कृत्वा रुदितुं प्रारब्धं, तदा पथि गच्छता चौरेणोक्तं हे भामिनि! साक्षात्पिशाचिनीमिव त्वां नग्निकां दृष्ट्वाहं बिभेमीत्युक्त्वा स ततः पलायनं चकार.

☒ अथ तटिनीतटस्था सा नग्ना शीतकंपितदेहाऽनेकविधान् विलापांश्चकार. इतो देवीभूतो मेंठस्तस्याः प्रतिबोधाय मुखन्यस्तमांसखंडं शृगालरूपं विधाय तत्र समायातो नदीनीरगतं मीनं च दृष्ट्वा मांसखंडं तटे मुक्त्वा मीनं गृहीतुं नद्यां प्रविष्टः, इतो मीनं जले कर्दमांतर्विलीनीभूयादृश्यीभूतं, तटस्थं मांसखंडमपि काकः समादायोड्डितः, स्वयं च पंके निमग्नो दुःखीबभूव. तद् दृष्ट्वा तटस्थराज्ञ्या हसित्वोक्तं रे मूर्ख त्वं द्वाभ्यामपि भ्रष्टो जातस्तदा शृगालेन मनुष्यभाषया प्रोक्तं रे नग्निके अहं तु द्वाभ्यां भ्रष्टः परं त्रिभ्योऽपि भ्रष्टं स्वकीयात्मानं त्वं कथं न शोचसि ? तत् श्रुत्वा विषण्णा यावद्विस्मयं प्राप्नोति तावत्तेन निजरूपं प्रकटीकृत्य सर्ववृत्तं च कथयित्वा बहुतर्जनापूर्वकं तस्यै कथितं, अथ त्वमपि स्वमोक्षकृते जिनधर्ममाराधय ! तयापि तत्प्रतिपन्नं, तदा देवेन सोत्पाट्य साध्वीसमीपे मुक्ता, तत्र दीक्षामादायालोचनापूर्वकं शुद्धतपांसि तप्त्वा सा सद्गतिं प्राप्ता, ततो हे स्वामिन् त्वमपि मिलितसुखानि विहायान्यसुखेभ्यो माभिलाषं कुरु ?

☒ अथ जंबूकुमारः कथयति नाहं विद्युन्मालीव मूर्खः, यथा वैताढ्यश्रेण्यां गगनवल्लभनगरे मेघरथ-

विद्युन्मालिनामानौ द्वौ भ्रातरावभूतां.

☒ एकदा गुरुणा ताभ्यामुच्छिष्टचांडालिनीं विद्यां दत्वा कथितं चांडालपुत्रीं परिणीय वर्षैकं यावद्ब्रह्मचारित्वेनेयं विद्या साधनीया. ततस्तौ गुरुमापृच्छ्य वसंतपुरे चांडालपाटके स्थितौ. क्रमेण च परिचयतश्चैकेन चांडालेन मेघरथाय निजैकाचिणी कन्या परिणायिता, विद्युन्मालिने च दंतुरा कन्या परिणायिता. मेघरथस्तु ब्रह्मचर्यस्थितस्तां निजोत्तरसाधकां विधाय स्वविद्यां साधयामास. विद्युन्माली तु तस्यां दंतुरायामपि चांडाल्यामासक्तः सन् विषयभोगपरो जातः, वर्षानंतरं च सा सगर्भा बभूव. मेघरथेन स्वभ्रात्रे कथितं हे भ्रातः संप्रत्यावां स्वगृहे गच्छावः, विद्युन्मालिनोक्तं हे भ्रातर्मया तु विद्या न साधिता, किं चेयं मे भार्यापि सगर्भास्ति. ततस्तां विहाय मया तत्र नागम्यते.

☒ अथाधुना द्वितीयवर्षेऽहं ध्रुवं विद्यां साधयिष्यामि, ततो त्वयाथ वर्षानंतरं मम ग्रहणायात्र समागंतव्यं. ततो मेघरथः स्वगृहे गतः, कथिता च कुटुम्बिनां विद्युन्मालिकथा.

☒ अथ द्वितीयवर्षानंतरं मेघरथेनागत्य विद्युन्माली गृहागमनकृते बहुधा प्रतिबोधितस्तथापि तस्यामेव विषयासक्तः सन् स न समायातः, एवं तृतीयवर्षेऽपि स न समागतः, कथितं च तेनाहं त्वत्रैव चांडालकुले स्थास्यामि.

☒ अथ मेघरथो राज्यं प्रतिपाल्य प्रांते निजपुत्राय च राज्यं दत्वा स्वयं दीक्षामादाय स्वर्गे गतः, विद्युन्माली तु तत्रानेकविधां चांडालीकृतविडंबनां सहमानः प्रांते दुर्ध्यानतो नरके गतः, ततो हे कामिनि अहं विद्युन्मालिसदृशो नास्मि. ॥

☒ अथ कनकसेनोवाच हे स्वामिन् त्वं शंखवादकवत्पश्चात्तापं प्रयास्यसि, यथा शालिग्रामे कश्चिदेकः कृषीवलः सदैव रात्रौ क्षेत्रे मालकोपरिस्थितः शंखं वादयति, तच्छब्दतश्च हरिणशूकरादिश्वापदा दूरं पलायंते.

☒ अथैकदा कतिचिच्चौरा धेनुसमूहं कुतोऽपि चोरयित्वा रात्रौ तदध्वना व्रजंति, ते च तत्र शंखध्वनिं श्रुत्वा पश्चादारक्षकानागतान् मन्यमाना गोगणं तत्रैव मुक्त्वा पलायिताः, प्रभाते तेन कृषीवलेन निःस्वामिकं गोवृंदं निजक्षेत्रपार्श्वे चरद् दृष्टं. तेन चिंतितं नूनं मे शंखनादं श्रुत्वा भीताश्चौरा गोसमूहमिममत्रैव त्यक्त्वा पलायिताः, ततोऽसौ तं गोसमूहं नगरमध्ये समानीय लोकेभ्यः कथयामास यद्देवेन मह्यमयं गोसमूहो दत्तः.

☒ अथ द्वितीयवर्षेऽपि तथैव तस्करा गोसमूहयुतास्तत्र समागताः, श्रुत्वा च शंखशब्दं शंकितास्तच्छंखशब्दानुसारेण ते तत्रागता दृष्ट्वा च तं कृषीवलं क्रोधेन ते यष्ट्यादिभिस्तं ताडयामासुस्ततस्तस्य क्षेत्रमुन्मूल्य तत्पशूनपि गृहीत्वा ते पलायितास्ततोऽसौ दुःखी जातस्ततो हे स्वामिन् त्वमपि बहुलोभं मा कुरु ?

जंबूकुमारेणोक्तं हे कामिनि नाहं वानरतुल्यो यथा विंध्याचलाटव्यां कश्चिदेको वानरो बहुवानरीयुतः सुखेन निजकालं गमयति, क्रमेण स वृद्धो जातः, इत एकेन तरुणवानरेण तत्रागत्य तं वृद्धं यूथान्निष्कास्य ताभिर्वानरीभिः क्रीडितुमारब्धं.

☒ अथ खिन्नोऽसौ वृद्धवानरस्तृपातुरस्ततः पलाय्य गिरिकंदरायां गतस्तत्र क्षरच्छिलारसैभृतैका गर्त्तामीत्, तेन मूर्खवानरेण जलधिया तस्मिन्निजमुखं क्षिप्तं संलग्नं च शिलारसे, मुखं निष्कासयितुं तेन तत्र निजहस्तपादाः क्षिप्तास्तेऽपि तत्र संलग्नाः, एवं स बुभुक्षितस्तृपितस्तत्रैव मृतः, ततोऽहं स इव मूर्खो नास्मि.

☒ अथ नभःसेनयोक्तं स्वामिन् वृद्धस्त्रीवत्त्वमतिलोभं मा कुरु ? यथैकस्मिन् ग्रामे सिद्धिबुद्धयाख्ये द्वे वृद्धस्त्रियावभूतां; तयोः परस्परं महती स्पर्द्धा बभूव, एकदा बुद्धया तत्रस्थो भद्रकनामा यक्षः समाराधितस्तेन तुष्टेन कथितं त्वयैकैको दीनारः सर्वदा मम पादाग्राद्गृहणीयस्ततोऽतिहृष्टया तया सदैव तथा कर्त्तुमारब्धं. क्रमेण तां धनाढ्यां वीक्ष्य सिद्धया पृष्टं हे भगिनि त्वयैतावती ऋद्धिः कुतः प्राप्ता ? तया सरलतया स वृत्तांतस्तस्यै कथितः, तत् श्रुत्वा तयापि स्पर्द्धया स यक्षः समाराधितस्तदा तुष्टेन यक्षेण तस्यै अपि नित्यमेकैकदीनारं दातुं समारब्धं. ततः पुनः सिद्धया यक्षमाराध्य तस्मात्ततो द्विगुणमधिगतं.

☒ अथ बुद्धया यक्षमाराध्य सिध्युपरिद्वेषं विधाय निजैकाक्षिविनाशो मार्गितः, सिद्धयापि ततो

द्विगुणं यक्षान्मार्गयित्वा स्वनयनद्वयं विनाशितं. अतो हे स्वामिन् त्वं बहुलोभं मा कुरु ? जंबूकुमारेणोक्तं जात्याश्ववदहं तु मार्गे एव गमिष्यामि, उन्मार्गे नैव गमिष्यामि. यथा वसंतपुरपत्तने जितशत्रुराजास्ति, तत्र जिनदासाख्यः श्रावको राजमान्यो वसति.

☒ अथैकदा राजा जात्याश्वमेकं द्रव्यादिवृद्धिकरं विज्ञाय द्रव्येण गृहीतवान्, पोषणार्थं स जिनदासाय समर्पितः.

☒ अथ स श्रेष्ठी सर्वदा तस्याश्वस्य पानीयपानार्थं सरसि गच्छति. पथि च जिनप्रासादं प्रदक्षिणीकृत्य वीतरागं च प्रणम्य गृहे समायाति.

☒ अथ तस्य राज्ञः शत्रुभिस्तदश्वापहरणाकृते विचारः कृतस्तदैकेन प्रधानेन कथितमहमश्वमपहृत्यानयिष्यामीत्युक्त्वा स वसंतपुरे समागत्य कपटश्रावकीभूय जिनालये च समागत्यानेकविधां जिनपूजां चकार. तं दृष्ट्वा श्रेष्ठिना पृष्टं भो श्रावकोत्तम त्वं कुतः समागतोऽसि ? श्रावकेणोक्तमहं संसारविरक्तो भावसाधुस्तीर्थयात्रां कुर्वन्नत्र नगरे जिनालयपूजार्थं समागतोऽस्मि. तत् श्रुत्वा हृष्टः श्रेष्ठी तं निजसाधर्मिणं विज्ञायादरेण निजगृहे समानयत्, भोजनादिभिश्च तस्य सत्कारं कृतवान्, ततः श्रेष्ठीना कथितमद्य त्वया मम गृहे एव रात्रिवासो विधेयस्तदा तेन कपटश्रावकेण महताग्रहेण तत्प्रतिपन्नं. इतः श्रेष्ठी तस्मिन्नेव दिने कस्मैचिदनि-

कार्यप्रयोजनाय निकटस्थग्रामांतरे गतः.

☒ अथ रात्रौ स धूर्तस्तमश्वं गृहीत्वारुह्य च तदुपरि प्रच्छन्नं प्रस्थितः, परमश्वस्तु नित्याभ्यासतः सरमि समागत्य पश्चाद्वलित्वा जिनालयं च प्रदक्षिणीकृत्य पुनर्जिनदासगृहे समायातः, धूर्तेन तस्य कशादिप्रहारैर्बहुताडितस्तथापि सोऽग्रे न चचाल. ततोऽसौ धूर्त्तः खिन्नः सन्प्रभातादर्वागश्वं तत्रैव मुक्त्वा पलायितः, प्रभाते समागतश्रेष्ठी निजाश्वं कशाप्रहारांकितशरीरं विधुरं च विज्ञाय धूर्त्तस्य तस्य दौर्जन्यं हृदि ध्यायंस्तदादितः सावधानो बभूव. ततो हे कामिनि अहमपि सोऽश्व इव सन्मार्गगाम्यस्मि. ॥

☒ अथ कनकश्रीरुवाच हे स्वामिन् भवतः कुलपुत्रवत्कदाग्रहो लग्नोऽस्ति. यथैकस्मिन् ग्रामे कश्चिदेको महामूर्खः कुलपुत्रो वसति, तस्मै तन्मात्रैकदा शिक्षितं हे वत्स त्वं चापल्यं मुंच ? किमपि कार्यं गृहीत्वा नैव त्यक्तव्यं. तेनापि तदंगीकृतं.

☒ अथैकदा स चतुष्पथे गतोऽभूत्, तत्र बहवो नगरलोका निजनिजकार्यकृते गमनागमनं कुर्वंति. इतः कस्यैकस्यापि रजकस्य रासभः प्रणष्टस्तदा दूरादेव रजकेण लोकानुद्दीश्य पूत्कृतं यदेषो मे रासभो गृहितव्यः, तत् श्रुत्वा तेन कुलपुत्रेण धावमानस्य तस्य लांगूलं हस्ताभ्यां गृहीतं, रासभेन बहवः पादप्रहारास्तस्मै दत्ताः, परं मातृवचनं स्मरमाणेन तेन तन्न मुक्तं, लोकैर्बहुधा निवारितोऽपि स तत्कार्यान्न विरराम.

☒ अथ रासभपादप्रहारतस्तस्य तुंडं दशनविहीनं जातं, मस्तकादपि रुधिरं निस्सृतं प्रांते पतितोऽसौ गृहमागतो दुःखी बभूव. ततो हे स्वामिन् त्वमपि कदाग्रहं मा कुरु. ?

☒ अथ जंबूकुमारेणोक्तं हे कामिनि सोल्लकब्राह्मणवदहं स्वार्थे ग्रथिलो नास्मि. यथा वसंतपुरे सोमदत्तविप्रपुत्रः सोल्लकनामा जन्मदरिद्री बभूव. तस्मिन्नेव नगरे कामपताकाभिधैका वेश्या यौवनरूपलावण्या-द्युपेता वसति. तया सहानेकधनिकपुत्राः स्पर्द्धयाधिकाधिकधनदानपूर्वकं विलासान् कुर्वंति.

☒ अथैकदा कामपीडितस्य सोल्लकस्यापि तया सह विलासकरणाभिलाषो जातस्ततोऽसौ भिक्षाधिगत-धान्यमादाय तस्याः पार्श्वे समागत्य तद्धान्यदानपूर्वकं विलासार्थं याचनामकरोत्. तयोक्तं त्वं मम गृहकर्म कुरु ? ततः कदाचिदहं तवाभिलाषं पूरयिष्यामि. तदप्यसौ प्रतिपद्य नित्यं तस्या गृहे पानीयं समानयति, धा-न्यानि दलयति, शय्यां च सम्यक्करोति, उच्छिष्टभाजनानि च मार्जयति. एवं गृहकर्म कुर्वता तेन कतिचि-द्दिवसानंतरं तस्यै भोगप्रार्थना कृता, तदा तया स निजसेवकैः कुट्टयित्वा गृहाद्बहिर्निष्कासितो निजकार्यादपि भ्रष्टीभूय दुःखी बभूव. ततो हे कामिनि स इवाहं मूर्खो नास्मि.

☒ अथ सप्तमी कनकवती जजल्प हे स्वामिन् मासाहसपक्षिवत्त्वं साहसं मा कुरु ? यथा कश्चिदेकः पक्षी वननिकुंजे सुप्तस्य व्याघ्रस्य दशनस्थानि मांसखंडानि भक्षयति, उड्डीयोड्डीय च वृक्षोपर्युपविश्य 'मासाह-

सेति ' पुनः पुनर्जल्पति. तथा हे स्वामिन् त्वमपि केवलं मुखेनैव विषयसुखतिरस्कारं करोषि, मनसि तु तेऽधिकाधिकसुखवांछा ज्ञायते.



☒ अथ जंबूकुमारेणोक्तं हे कामिनि त्वमप्येकां कथां शृणु ? वसंतपुरे जितारिनामराजा, सोमदत्ताभिधश्च पुरोहितः, तस्य पुरोहितस्य पर्वमित्रनमस्कारमित्रनित्यमित्राभिधा यथा नामास्तथागुणास्त्रयः सुहृदोऽभवन्

☒ अथैकदा तस्मै सोमदत्ताय राजा कुपितस्तदा स सहायार्थं नित्यमित्रपार्श्वे समागतः, परं नृपभीतेन तेन तस्य सहायो न दत्तः, पर्वमित्रेणापि तथैव कृतं. अथासौ विषण्णः सन् प्रणाममित्रपार्श्वे गच्छन् पथि चिंतयितुं लग्नो यदस्य प्रणाममित्रस्य मया कदापि किंचिदपि नोपकृतं. ततोऽस्मिन् भयंकरसंकटे स कथं मम सहायं दास्यति ? परं स सज्जनोऽस्ति इति शंकाकुलमानसः स तत्पार्श्वे गतः, कथितश्च तेन स्वकीयो वृत्तांतस्तदा तेन मित्रेण तस्मै अत्यादरपूर्वकं कथितं भो मित्र त्वं भयं मा कुरु ? इत्युक्त्वा स शस्त्रयुतस्तेन सह चलितो मुक्तवांश्च तं तस्येप्सितस्थाने.

☒ अत्रोपनयस्त्वित्थं— नित्यमित्रतुल्यं शरीरं, पर्वमित्रसमाश्च कुटुम्बिनः, प्रणाममित्रसमश्च धर्मः, यमराजतुल्यश्च राजा, ततो यमनृपे कुपिते सति प्राणिनां केवलं धर्म एव सहायो भवति. न तु शरीरत्रांधवादय इति भावार्थः, अथाष्टमी जयश्रीरुवाच हे स्वामिन् त्वमपि नागश्रीवदस्मान् कल्पितकथया मोहयसि, यथा

रमणीयपुरे कथाप्रियो नामा राजा नित्यं लोकेभ्यः कथाः शृणोति, कथाश्रवणाय तेन सर्वपौराणां वारकाः कृताः.

⊠ एकदा नागशर्मणो द्विजस्य वारकः समागतः, परं स मूर्खत्वात्कथां कथयितुं समर्थो नोऽभूत्, तेन स चिंतया विषण्णो बभूव. तं चिंतातुरं दृष्ट्वा तस्य पुत्र्या नागश्रिया तत्कारणं पृष्टं, तेनोक्तमहं राजाग्रे कथाकथनेऽशक्तोऽस्मि. तयोक्तमहं राजाग्रे गत्वा कथां कथयिष्यामीत्युक्त्वा सा नृपाग्रे गता. राज्ञोक्तं हे पुत्रि त्वं कथां कथय ? तयोक्तं स्वामिन्नस्मिन्नगरेऽग्निशर्माभिधो द्विजस्तस्य भार्या सोमश्रीः, पुत्री चाहं नागश्रीः, पित्रा निकटग्रामस्थेनैकेन मातृपितृरहितेन द्विजपुत्रेण सह मम संबंधो मेलितः.

⊠ अथैकदा मे पितरौ मामेकाकिनीं गृहे मुक्त्वा ग्रामांतरं गतौ. इतो मे भर्त्ता समायातो मया तस्मै भोजनं दत्वा रात्रौ शय्या सम्यक्कृत्वा दत्ता. ततोऽसौ तत्र सुप्तः, गृहमध्ये द्वितीयशय्याऽभावत्वेनाहं भूमौ सुप्ता, परं गृहमध्ये सर्पभीतितो भीताहं तेन सार्धं शय्यैकदेशे सुप्ता. इतो भर्त्ता जागृतो मदंगस्पर्शेन च तस्य कामः संदीप्तः, किं तु कुमारित्वेन विषयसेवनमयुक्तं विज्ञायाहं ममांगोपांगानि वस्त्रैराच्छाद्य संगोप्य च स्थिता.

⊠ अथ विषयरोधेन दाहज्वरोत्पत्तितः स तत्र मृतः, तदा मया लोकभीत्या गृहे एव गर्त्तां खनित्वा तस्य च खंडंखंडं कृत्वा तदंतर्निक्षिप्तः, उपरि च मृत्तिकां क्षिप्त्वा भूमिर्विलिप्ता प्रभाते पितरौ गृहे

समागतौ, परं केनापि सा वार्त्ता न ज्ञातेति कथयित्वा नागश्रीर्मौनमुपागता. राज्ञोक्तं हे कुमारि किमेषा वार्त्ता सत्या वा असत्या? तयोक्तं सर्वदा लोककथिता वार्त्ताः सर्वा अपि यदि सत्याः स्युस्तर्हि मयोक्तेयमपि वार्त्ता भवता सत्यैव ज्ञातव्या एवं यथा नागश्रिया राजा विस्मयितस्तथा त्वमपि हे स्वामिन्नस्मान् विप्रतारयसि. जंबूः कथयति हे कामिनि ललितांगवदहं विषयलोलुपो नास्मि. यथा वसंतपुरे शतायुधनामा नृपस्तस्य च ललिताख्या राज्ञी दुःशीला वर्त्तते.

☒ अथैकदा गवाक्षस्थया तया समुद्राभिधव्यवहारिपुत्रो मनोहररूपो ललितांगाभिधः पथि व्रजन् दृष्टस्तं दृष्ट्वा सा मोहिता, ललितांगोऽपि तां दृष्ट्वा कामातुरो बभूव.

☒ अथैकदा कौमुदीमहोत्सवे राजा नगराद्बहिर्वने गतस्तमवसरं प्राप्य राज्या स ललितांगो यक्षमूर्त्यानयनमिषेण निजावासे समानीतः, इतस्तत्र राजानमायांतं श्रुत्वा तया स गृहपश्चाद्भागस्थितायां विष्टाकूपिकायां क्षिप्तः, तत्रस्थोऽसौ नरकादप्यधिकं दुःखमनुभवति; दयया च राज्ञी तत्रान्नं क्षिपति, तद्विष्टोपरिपतितमन्नं क्षुधातुरोऽसौ भक्षयति, दशमासानंतरमतीवमेघवृष्टितो जलप्रवाहेण प्रेर्यमाणः स मूर्च्छितो बहिर्निस्ससार, क्रमेण सचेतनीभूय गृहे समागतः.

☒ अथैकदा पुनरपि पथि गच्छन्नसौ गवाक्षस्थया राज्याहूतस्तत्र गंतुमुत्सुकोऽभवत्. ततो हे स्त्रियः

कथयध्वं यूयं यदसौ ललितांगो मूर्खो वा चतुरः ? तदा तामिरष्टाभिरप्युक्तं हे स्वामिन् स ललितांगो महामूर्खो ज्ञेयः, जंबूकुमारेणोक्तं तर्हि दृष्टांतस्यास्योपनयं शृणुत ? ललितांगतुल्योऽत्र संसारिजीवः, राज्ञ्या सह क्षणिक सुखसदृशं विषयसुखं, नृपनिभं मरणं, विष्टाकूपतुल्यो गर्भावासः, आहारतुल्यो मातृभक्षिताहारस्वादः, दशमासानंतरं बहिर्निस्सरणतुल्यं गर्भागारतो योनिद्वारेण जन्म, पुनश्च राज्ञीसमीपगमनतुल्यं पुनरपि गर्भावासे पतनं. इति श्रुत्वा तासामष्टानामपि वैराग्यं समुत्पन्नं, ततः प्रभाते जंबूकुमारेण सर्वपरिवारयुतेन श्रीसुधर्मस्वामिपार्श्वे दीक्षा गृहीता, प्रभवोऽपि समागत्य चारित्रं गृहीत्वा जंबूस्वामिशिष्योऽभूत्. क्रमेण श्रीसुधर्मास्वामी जंबूस्वामिनं निजपट्टे स्थापयित्वा केवलज्ञानमासाद्य मोक्षे गतः, ततो जंबूस्वाम्यपि निजपट्टे प्रभवस्वामिनं संस्थाप्य मोक्षे गतः, स जंबूस्वामी च चरमकेवली ज्ञेयः

॥ इति श्रीतपःकुलके जंबूस्वामिकथा ॥

मूलम्—जिणकप्पियपरिहारिअ । पडिमापडिवन्नलंदयाइणं ॥
सोऊण तवसरूवं । को अन्नो वहइ तवगव्वं ॥१७॥

व्याख्या—जिनकल्पी साधुः, परिहारविशुद्धिचारित्रवान् साधुः, द्वादशसाधुप्रतिमाप्रतिपन्नः साधुः, लंदनाभिग्रहतपो-

वान् साधुश्च, एतेषां तपःस्वरूपं श्रुत्वा कोऽन्यस्तपोगर्वं करोति ? पूर्वोक्तानां चतुर्णामपि महातपस्विनां तपोविधिः प्रवचनसारोद्धारादिग्रंथतोऽवसेया ॥ १७ ॥

मूलम्—मासद्धमासखवओ । बलभद्दो रूववंपि हु विरत्तो ॥
सो जयउ रणवासी । पडिबोहियसावयसहस्सो ॥१८॥

व्याख्या—मासक्षपणार्द्धमासक्षपणादितपःकारक एवंविधः श्रीबलभद्रर्षी रूपवानपि विरक्तः सन्नरण्यवासीभूतः प्रतिबोधितश्वापदसहस्रो जयतु. बलभद्रर्षिकथा पूर्वं श्रीनेमिनाथाधिकारे कथितास्ति ॥१८॥

मूलम्—थरहरिअधरं झलहलीय—समुयं चलियकुलसेलं ॥
जमकासी जयं विहणु । संघकए तं तवस्स फलं ॥१९॥

व्याख्या—थरहरिता कंपापिता धरा यत्र, तथा झलहलिताः क्षोभिताः समुद्रा यत्र, तथा चालितानि कुलशैलानि यत्र, एवंविधं जगत् विष्णुकुमारेण श्रीसंघकृते यत्कृतं तदपि तपस एव फलं ज्ञेयं ॥१९॥

श्रीविष्णुकुमारकथा चेत्थं—

☒ एकदोज्जयिन्यां नगर्यां श्रीमुनिव्रतस्वामिशिष्याः श्रीसुव्रतसूरय, समागतास्तदा धर्मदत्तनृपप्रमुखाः सर्वेऽपि लोकास्तं वंदितुं तत्रायाताः.

☒ अथ तत्र राज्ञो नमुचिनामा प्रधानो मिथ्यात्वी वर्त्तते. तेन गुरुणा सह धर्मवादःसमारब्ध-स्तदैकेन सूरिशिष्येण धर्मपक्षं स्थापयित्वा सर्वलोकसमक्षं नमुचिर्जितस्ततोऽसौ कोपेन खड्गमादाय रात्रौ गुरूणां मारणाय समागतस्तदा स देवैः स्तंभितः, प्रभाते राज्ञ उपरोधतः स सूरीन् क्षमयित्वा मुक्तो बभूव.

☒ अथ नगरलोकैर्धिक्कृतोऽसौ राज्ञा देशाद्बहिर्निष्कासितस्ततोऽसौ हस्तिनापुरे समागत्य पद्मोत्तर-राज्ञः सेवको जातः, तस्य पद्मोत्तरराज्ञो विष्णुकुमारमहापद्माख्यौ द्वौ पुत्रावास्तां, तयोर्माता परमजैनधर्मानुरागिणी.

☒ एकदा जिनरथयात्रामहोत्सवं चकार, तस्या ईर्ष्यात एकया मिथ्यात्विन्या सपत्न्या ब्रह्मरथमहोत्सवः कृतः, जिनमतानुरागिण्या राज्ञ्योक्तं मम रथोऽग्रे यास्यति मिथ्यात्विन्या चोक्तं मे रथोऽग्रे गमिष्यति. तयो-र्विवादं विज्ञाय राज्ञा ते द्वे अपि तत्कार्यतो निवारिते.

☒ अथ महापद्मो निजमातृदुःखं विज्ञाय परदेशे गतस्तत्र च चक्ररत्नोत्पत्त्यनंतरं तेन षट्खंडानि

साधितानि, क्रमेण चक्रवर्त्तिनः सकलसमृद्धियुक्तोऽसौ हस्तिनागपुरे समायातः, ख्यातश्च स नवमश्चक्रवर्त्ती. पद्मोत्तरराज्ञा तस्मै राज्यं दत्वा निजपुत्रविष्णुकुमारेण सह श्रीसुव्रताचार्यसमीपे दीक्षा गृहीता, अनुक्रमेण षट्-सहस्रवर्षानंतरं विचित्रतपोविधानतो विष्णुकुमारमुनेर्वैक्रियाद्यनेकलब्धिः समुत्पन्ना.

☒ अथात्र हस्तिनागपुरे नमुचिमंत्रिणा विनयादिगुणेन चक्रवर्त्ती वशीकृतः, संतुष्टेन चक्रिणोक्तं त्वं वरं मार्गय ? नमुचिनोक्तं कदाचिदवसरेऽहं वरं मार्गयिष्यामि.

☒ अथैकदा श्रीसुव्रतसूरयो हस्तिनागपुरे समागत्य चक्रिण आग्रहेण चतुर्मासं स्थिताः, विष्णुकुमार-मुनिश्च मेरुपर्वतोपरि चतुर्मासं स्थितः.

☒ अथ तान् सुव्रतसूरींस्तत्र चतुर्मासं स्थितान् ज्ञात्वा नमुचिना पूर्ववैरं संस्मृतं. ततोऽसौ चक्रिपार्श्वे समागत्य निजपूर्ववरदानमार्गणपूर्वकं कथयामास हे स्वामिन् मह्यं सप्तदिनं राज्यं समर्पय ? राजा तं राज्यं समर्प्य निजांतःपुरे तस्थौ.

☒ अथ नमुचिः सर्वदर्शनिनः समाहूय कथयामास यूयं सर्वेऽपि मम वंदनं कुरुत ? भीतैः सर्वैरप्यन्यदर्शनिभिस्तस्मै वंदनं कृतं, ततोऽनेन सुव्रतसूरयोऽपि तत्कार्यकरणाय समाहूताः, सूरिभिरुक्तं वयं मुनयः केषामपि गृहस्थानां प्रणामं न कुर्महे. तदा मंत्रिणोक्तं तर्हि मम भूमिं द्रुतं त्यजत ? सूरिभिरथ स नमु-

चिरुपलक्षितः. नमुचेरनयतः संघोऽपि सकलो दूनः.

☒ अथ सक्रोधैर्गुरुभिरुक्तमस्ति स कोऽपि य एनं शिक्षां ददाति. तदैकेन शिष्येणोक्तं स्वामिन् विष्णुकुमारमत्राह्वयत ?

☒ अथ संघाज्ञयैकः शिष्यो मेरुपर्वते श्रीविष्णुकुमारसमीपे गत्वा तस्मै सकलं वृत्तांतं निवेदयामास. तत् श्रुत्वा कोपातुरो विष्णुकुमारमुनिस्तेन निजगुरुभ्रात्रा सह हस्तिनागपुरे राजसभायां समागतस्तं दृष्ट्वा नमुचिं विना सर्वेऽपि समुत्थाय वंदयामासुः.

☒ अथ विष्णुकुमारमुनिना नमुचिमुद्दिश्योक्तं त्वं साधूनामुपद्रवं मा कुरु ! तथापि तेन न मानितं, ततो विष्णुकुमारेणोक्तं तर्हि त्व मम पादस्थानं देहि ? ततस्तेन पादत्रयाणां स्थानं दत्तं.

☒ अथ विष्णुकुमारमुनिना वैक्रियलब्ध्या स्वकीयं लक्षयोजनप्रमाणं शरीरं विहितं, पूर्वपश्चिमसमुद्रयोश्च निजपादद्वयं मुक्तं, तृतीयवारं च चरणमुत्पाट्य नमुचिशिरसि मुक्तं, तेन स मृत्वा रसातले प्राप्तस्तथापि मुनिकोपो नोपशमते.

☒ अथ सौधर्मेंद्रेण तत्रागत्योपशमयुक्तवचनैः क्रमेण मुनिं शांतिं नीतः, ततो विष्णुकुमारमुनिर्निज-

मूलरूपं विधाय गुरुपार्श्वे समागत्यालोचनां जग्राह. प्रांतेऽनशनं विधाय स मोक्षे गतः ॥

॥ इति तपःकुलके श्रीविष्णुकुमारमुनिकथा ॥

मूलम्—किं बहुणा भणिएणं। जं कस्सवि किंवि सुहयंवि ॥
दीसइ तिहुअणमज्झे । तत्थ तवो कारणं चेव ॥२०॥

व्याख्या—बहु कथनेन किं? यत् यस्य कस्यापि कथमपि यत् किंचिदपि त्रिभुवनमध्ये सुखं दृश्यते तत्र तप एव कारणं ज्ञेयं ॥ २० ॥

॥ इति श्रीतपःकुलकं समाप्तं ॥

卐 卐 卐

## 卐 अथ श्रीभावकुलकं प्रारभ्यते 卐

☒ अथ भावेन विनैषां दानादीनां माहात्म्यं नास्ति, ततो भाव एव प्रवरः, तत्र मंगलाचरणाय प्रथमं श्रीपार्श्वनाथस्तुतिमाह—

मूलम्—कमठासुरेण रइअंमि । भीसणे पलयतुल्लजलबोले ॥
भावेण केवललच्छिं । विवाहिओ जयउ पासजिणो ॥ १ ॥

व्याख्या—कमठनाम्ना मेघमालिना भुवनवासिदेवेन रचिते कृते भीषणे रौद्रे प्रलयकालतुल्ये जलबोले पानीयपूरे सति भावनायां भावितायां सत्यां यः केवललक्ष्मींप्रति विवाहितः परिणीतवान् एवंविधः स श्रीपार्श्वजिनो जयतु. ॥१॥

सा कथा चेत्थं—

☒ जंबूद्वीपे भरतक्षेत्रे पोतनपुरे नगरेऽरविंदाभिधो राजा, तस्य विश्वभूतिनामा पुरोहितो बभूव. तस्यानुद्धरीनामभार्या, तस्याः कुक्षिसमुद्भवौ कमठमरुभूतिनामानौ द्वौ पुत्रावभूतां. कमठस्य वरुणाभिधा भार्यास्ति.

मरुभूतेश्च वसुंधराभिधाना भार्या वर्त्तते.

☒ अथ विश्वभूतिपुरोहितो जिनधर्ममाराध्य प्रांतेऽनशनं च विधाय सौधर्मदेवलोके देवो जातस्ततः कमठमरुभूती द्वावपि भ्रातरौ पुरोहितपदं पालयामासतुः.

☒ अथैकदा तत्र श्रीमुनिचंद्रसूरयः समागतास्तस्य धर्मोपदेशं श्रुत्वा मरुभूतिर्वैराग्यं प्राप्य विषयव्यालान्महानर्थकारकान्मत्वा तेभ्यो विमुखो जातः.

☒ अथ तस्य भार्या वसुंधरा चापल्येन कंदर्पाविर्भूततापोपशमनाय स्त्रीलंपटेन कमठेन सहानाचारं सेवितुं लग्ना, क्रमेण कमठभार्यया वरुणया तदनर्थं विज्ञाय तद्वृत्तांतो मरुभूतये निवेदितः, प्रच्छन्नस्थितेन मरुभूतिनापि तत्प्रत्यक्षं दृष्टं, ततोऽसौ कोपेन व्याकुलीभूतो निजभ्रातरं कमठं तदकार्यकरणे निवारयामास. परं लंपटेन तेन न मानितं, तदा मरुभूतिना तद्वृत्तांतोऽरविंदराज्ञे निवेदितस्ततो राजा कमठं गृहीत्वा तस्य शिरोमुंडनमुखकज्जलालेपनखरारोहणादिविडंबनां विधाय तं निजदेशान्निष्कासयामास. मनस्यतीवक्रूनोऽसौ भ्रातरि कोपं वहन् सन् शिवाख्यतापसपार्श्वे तापसीं दीक्षां जग्राह.

☒ अथैकदा मरुभूतिना चिंतितं नूनं मया भ्रात्रा सहाऽयुक्तं कृतं, ततोऽधुना तस्य समीपे गत्वाहं तस्मै क्षामयामीति विचार्य राज्ञा निवारितोऽपि स वने कमठपार्श्वे गत्वा क्षमयति हे भ्रातः केनचं

स्वीकृते मया त्वया सहाऽशोभनं यत्कृतं तन्ममापराधं क्षमस्व ? एवं तस्यामृतमधुराण्यपि वचनानि श्रुत्वा फणीव कोपाटोपकलितः कमठो विषानलज्वालानिभानि वचांसि बभाण. रे दुराचारिन् कुलांगारक त्वमितो दूरीभव ? निजमुखं त्वं मा दर्शय ? एवं तिरस्कृतो मरुभूतिस्ततो निःसृत्य मनस्यतीव खिन्नो दुर्ध्यानेन मृत्वा विंध्याचले हस्ती जातः, तं वृत्तांतं श्रुत्वाऽरविंदो नृपो वैराग्यमासाद्य दीक्षां गृहीतवान्. क्रमेण निर्मलं चारित्रं पालयतस्तस्यावधिज्ञानं समुद्भूतं.

⊠ अथ कमठभार्या वरुणा मृत्वा तत्रैव विंध्याचले हस्तिनी जाता, तया सह विविधां क्रीडां कुर्वन् स गजो निजकालं गमयति.

⊠ अथैकः सागरदत्तनामा सार्थवाहोऽरविंदमुनियुतः संघसहितोऽष्टापदयात्रायै प्रयाणमकरोत्. क्रमेण स संघः प्रयाणं कुर्वन् विंध्याचलाटव्यामेकस्य सरसस्तीरे समुत्तीर्णस्तदैषो हस्ती हस्तिनीयुतस्तत्र जलपानार्थं समायातस्तं दृष्ट्वा संघलोका भीताः पलायितुं लग्नाः, अरविंदमुनिस्तु तत्रैव कायोत्सर्गध्याने स्थितस्तस्य प्रभावतश्च स गजः शांतो जातः, ततो मुनिना ज्ञानेन तमुपलक्ष्योक्तं हे मरुभूते किं त्वं मामरविंदं नोपलक्षसीत्युक्त्वा मुनिना सर्वोऽपि पूर्वभववृत्तांतस्तस्मै कथितस्तत् श्रुत्वा हस्तिनीयुतस्य हस्तिनो जातिस्मरणज्ञानं समुत्पन्नं, ततस्ताभ्यां देशविरतिर्गृहीता.

अथ कमठतापसः क्रोधाध्मातात्मार्त्तध्यानतः कालांतरे मृत्वा विंध्याचलाटव्यां सर्पो जातस्तत्र मरु-भूतिजीवं हस्तिनं दृष्ट्वा तस्य पूर्ववैरमुल्लसितं, तेन दंशितो हस्ती विधिनानशनं विधाय कालं कृत्वा सहस्रारदेवलोके सप्तदशसागरोपमायुर्देवः समुत्पन्नः

॥ इति तृतीयो भवः ॥

सा हस्तिन्यपि प्रांतेऽनशनं विधाय द्वितीयदेवलोके देवांगना जाता. इतोऽसौ सर्पस्तत्र बहुजीव-घातं विधाय मृत्वा पंचमे नरके गतः ।

अथ पूर्वमहाविदेहे सुकच्छविजये वैताढ्यपर्वते तिलकापुर्यां विद्युद्गतिर्नामा विद्याधरनृपो राज्यं करोति, तस्य तिलकावत्यभिधाना राज्ञी वर्त्तते.

अथ स गजजीवो देवलोकाच्च्युत्वा तस्या राज्ञ्याः कुक्षौ किरणवेगेत्यभिधानपुत्रत्वेनोत्पन्नः, क्रमेण यौवनं प्राप्ताय तस्मै पित्रा पद्मावत्यभिधाना राजपुत्री परिणायिता. तया सह स किरणवेगोऽनेकसुखानि भुनक्ति.

अथैकदा तत्र श्रुतसागराभिधानो मुनिः समागतस्तस्य धर्मोपदेशं श्रुत्वा विद्युद्गती राजा पुत्राय राज्यं दत्वा संयमं गृहीतं. अनुक्रमेण किरणवेगस्य पद्मावतीराज्ञीकुक्ष्युद्भवः किरणतेजोऽभिधानः पुत्रो बभूव. एकदा तत्र सुरगुरुनामा मुनीश्वरः समागतस्तस्य च देशनां श्रुत्वा वैराग्यं प्राप्य राजा किरणतेजसे राज्यं दत्वा

दीक्षा गृहीता, पठितानि चैकादशांगानि, तपःप्रभावेण चानेकलब्धयस्तस्य समुत्पन्ना.

☒ अथैकदासौ मुनिराकाशमार्गेण पुष्करावर्त्तद्वीपे समागत्य तत्र शाश्वतचैत्यानि च वंदित्वा वैताढ्यपर्वते च समागत्य कायोत्सर्गेण तस्थौ.

☒ अथ स कमठजीवो नरकान्निःसृत्य तत्र वैताढ्यवने महासर्पो बभूव, तत्र च कायोत्सर्गस्थं तं मुनिं दृष्ट्वा स सर्पो निजपूर्वभववैरेण मुनिशरीरं वेष्टयित्वा दंशप्रहारान् दत्तवान्, मुनिरपि कालं कृत्वा द्वादशमे देवलोके गतः, सर्पोऽपि च दवदग्धः सन् पंचमे नरके गतः ।

☒ अथ जंबूद्वीपे पूर्वविदेहे सुगंधलावतीविजये शुभंकरायां नगर्यां वज्रवीर्याभिधो राजास्ति, तस्य च लक्ष्मीवत्यभिधाना राज्ञी वर्त्तते, तस्याः कुक्षौ द्वादशमदेवलोकाच्च्युतो किरणवेगजीवो वज्रनाभाभिधपुत्रत्वेनावतीर्णः. यौवनं प्राप्ताय तस्मै राज्यं दत्वा राज्ञा दीक्षा गृहीता. क्रमेण वज्रनाभोऽपि निजपुत्रचक्रायुधपुत्राय राज्यं दत्वा संयमं जग्राह. अधीतद्वादशांगो वज्रनाभमुनिरेकदा ज्वलनगिरिसमीपे कायोत्सर्गेण तस्थौ.

☒ अथ स सर्पजीवः पंचमनरकान्निःसृत्य संसारं च भ्रमित्वा तत्र भिल्लो जातस्तेन तं वाचंयमं कायोत्सर्गस्थं दृष्ट्वा पूर्ववैरानुभावेन तंप्रति बाणं मुक्तं, तेन विद्धो मुनिरालोचनापूर्वकमनशनं विधाय मृत्वा मध्यमग्रैवेयके ललितांगनामा देवो बभूव. भिल्लश्च मृत्वा नरके गतः.

☒ अथ जंबूद्वीपे महाविदेहक्षेत्रे सुरपुरीनगरे वज्रबाहुनामा राजास्ति, तस्य सुदर्शनाभिधाना राज्ञी वर्त्तते, तस्याः कुक्षौ चतुर्दशमहास्वप्नसूचितो ललितांगदेवजीवः सुवर्णबाहुनामपुत्रत्वेनोत्पन्नः, क्रमेण यौवनाभिमुखाय तस्मै राज्ञा राज्यं दत्वा दीक्षा गृहीता.

☒ अथैकदा सुवर्णबाहुराजा विपरीतशिक्षिताश्वापहृतो बहूभूमिमुल्लंघ्य सरोवरमेकं ददर्श, तत्र तेन निर्मलं जलं पीतं, तस्य सरसस्तीरे विविधाम्रनारंगलवंगदाडिमतालतमालादितर्वालिपरिमंडितनिजप्रदेशैः पथिश्रांतपांथानामाश्रयीभूतं कुंदमल्लीजातिचंपकांकुरनिचयनिर्गतपरिमलसुरभीकृतवनवातं पल्वलोद्भूतप्रफुल्लकमलालिकलितोरुभूभागमुपवनमेकं तेन दृष्टं. तत्र द्राक्षलतामंडपे तापसकन्याभिः परिवृता तारकालिभिर्वेष्टिता चंद्रकलेवैका मनोहररूपा कन्या तेन दृष्टा, तां चंद्रमुखीं विलोक्य राज्ञा चिंतितं किमियममरी वा मानुषी वर्त्तते? इत एको भ्रमरोऽन्यसुगंधिपुष्पाणि विहाय तस्या मुखकमलमलौकिकसुगंधयुक्तं मन्यमान इव झंकाररवमिषेण तद्वदनांभोजपरिमलं वर्णयन्निव कामुक इव तदोष्ठचुम्बनाभिलाषी सन् तस्या आननसमीपे भ्रमणं कृतवान्. तदा संभ्रांता सा कन्या सखीभ्यः कथयामास हे सख्यो मामस्माद्दुर्विनीताद्भ्रमराद्रक्षत? तत् श्रुत्वा सहास्याभिः सखीभिरुक्तं हे सखि दुर्विनीतानां शासने भूमिपाल एवाधिकारी, अतस्त्वं सुवर्णबाहुभूपालमाह्वय! यतस्ते तस्येन शरणमुचितमस्ति. तासामेवं नर्मयुक्तहास्यकेलिवचनं निशम्य निजहृदये प्रकटीभूतमपि मदनविकारं संगोप्य त्रपया मौनमाश्रित्य सा प्रमदा स्थिता, इतो वृक्षांतरितो राजा तासां विनोदसलापान् श्रुत्वा सहसा तत्र प्रकटीभूयोवाच

भो तापसकुमार्यः कोऽस्ति स दुर्विनीतो यो युष्माकं मुग्धानामत्र संतापकारको भवति ? तत् श्रुत्वा सर्वाः कुमार्यश्चकितास्त्रस्तहरिण्य इव संभ्रांता बभूवः.

☒ अथ तमाकारादिभिर्नृपमेवावधार्य तासु विदग्धैका सखी प्रोवाच हे राजन् स्वागतं इमामस्माकं सखीं पद्मावतीमयं दुर्विनीतो भ्रमरः संतापयति. ततो भीताया अस्या मे सख्या भवंतः सहायीभूय रक्षां कुरुत ? राज्ञोक्तं केयं पद्मावती ? तदा सखी प्रोवाच रत्नपुरनगरे रत्नशेखरनामा विद्याधरो बभूव, तस्य रत्नावलीनाम भार्या, तयोर्द्वयोः. पुत्रयोरुपर्येकेयं पद्मावत्यभिधाना पुत्री जाता.

☒ अथैकदा स विद्याधरो मृत्युमाप, तदा राज्यार्थं द्वौ भ्रातरौ विवादं कर्त्तुं लग्नौ, तेन दुःखिता राज्ञी निजपुत्रीं पद्मावतीमादायात्राश्रमे समागता.

☒ अथैकदात्र ज्ञानी मुनिः समायातस्तस्या मात्रा पृष्टश्च स जगाद अस्यास्ते तनयायाः स्वर्णबाहु-चक्री भर्त्ता भविष्यतीति. किंचाकारादिभिर्जानामि यद्यूयमेव स्वर्णबाहुचक्री स्थः, इतः पश्चात्स्थितो राज्ञः सकलोऽपि परिवारस्तत्र समागतः.

☒ अथ क्रमेण रत्नावल्या तापसैश्च स्वर्णबाहुराजानं तत्रागतं दृष्ट्वा हर्षेण सा पद्मावती तेन सह परिणायिता.

☒ अथ तया सह स्वनगरे स समागतः, क्रमेण चक्ररत्नोत्पत्त्यनंतरं तेन षट् खंडानि साधितानि.

☒ अथैकदा तत्र श्रीजगन्नाथनामा तीर्थंकरः समवसृतस्तदा चक्रवर्त्ती निजपरिवारयुतो जिनं वंदितुं समागतः. तत्र मिलितान् देवान् दृष्ट्वा क्वापि मयेदृशा देवा दृष्टाः सन्तीति चिंतयतस्तस्य जातिस्मरणज्ञानं समुत्पन्नं, प्रभोर्देशनां श्रुत्वा वैराग्येण परिवारसहितेन तेन निजपुत्राय राज्यं समर्प्य प्रभोः पार्श्वे दीक्षा गृहीता. समस्तसिद्धांतानधीत्य विंशतिस्थानकतपश्चाराध्य स तीर्थंकरनामकर्मोपार्जितवान्.

☒ अथैकदा स्वर्णबाहुमुनिः क्षीरगिरिसमीपे वने कायोत्सर्गेण तस्थौ. इतोऽसौ भिल्लजीवो नरकाच्च्युत्वा तत्रैव वने सिंहो बभूव, मुनिं दृष्ट्वा तस्य वैरमुल्लसितं, तेनासौ सिंहो मुनिं व्यापाद्य तस्य मांसं भक्षयामास. मुनिस्तु तस्योपर्यनुकम्पान्यानतो मृत्वा प्राणतदेवलोके देवत्वेन समुत्पन्नः, सिंहजीवश्च मृत्वा चतुर्थनरके गतः.

☒ अथ जंबूद्वीपे भरतक्षेत्रे काशीदेशे गंगोपकंठे वाणारसीनामनगर्यस्ति. तत्रेक्ष्वाकुवंशीयाश्वसेनाभिधो राजा राज्यं करोति, तस्य सत्यव्रतंसीभूता वामाभिधाना राज्ञी वर्त्तते. तस्याः कुक्षौ दशमदेवलोकाच्च्युतः स्वर्गोनाहुजीवश्चतुर्दशस्वप्नसूचितः पुत्रत्वेनोत्पन्नः, तदा षट्पंचाशद्दिक्कुमारिभिश्चतुःषष्टिशक्रैश्च तस्य जन्ममहोत्सवः कृतः, प्रभाते राज्ञापि जन्मोत्सवपूर्वकं तस्य श्रीपार्श्वनाथ इति नाम दत्तं. अथानुक्रमेण कल्पशाखीव वृद्धिं प्राप्नुवन्

प्रभुर्यौवनावस्थां संप्राप्तः.

☒ अथ कुशस्थलाभिधनगरे प्रसेनजितनामा नृपो राज्यं करोति. तस्य रूपसौभाग्यलावण्यैकनिधिः प्रभावतीनामा पुत्री बभूव. तयैकदा श्रीपार्श्वनाथरूपगुणादिवर्णनं श्रुत्वैवं प्रतिज्ञा कृता. यदस्मिन् भवे मम स्वामी श्रीपार्श्वनाथ एव भवतु. इतः कलिंगदेशाधिपयवनराज्ञा प्रसेनजितराज्ञे दूतं प्रेषयित्वा प्रभावती मार्गिता. प्रसेनजितराज्ञा तन्न प्रतिपन्नं. तदा कुपितः कलिंगाधिपतिर्निजसकलसैन्ययुतो भूरिभूभृतः कंपयन् कुशस्थलपुरं-प्रति चचाल. तं सैन्ययुतमायांतं श्रुत्वा प्रसेनजितराज्ञा निजमित्राश्वसेननृपंप्रति स्वकीय पुरुषोत्तमाभिधानमंत्रिणं प्रेष्य सहायो मार्गितः, तदाश्वसेनराजापि निजमित्रसहायार्थमनेकानेक तुरंगस्यंदनसुभटान्वितः कुशस्थलपुरंप्रति गमनोत्सुको बभूव.

☒ अथ तं वृत्तांतं श्रीपार्श्वनाथकुमारः श्रुत्वा पितुः पार्श्वे समागत्य विज्ञप्तिं चकार हे पितर्मयि सति संग्रामार्थं भवतां गमनमनुचितमेव, अतः कृपां विधाय मामेव तत्र प्रयाणायादेशं देहि ? राजापि तस्यात्याग्रहं विज्ञाय प्रयाणायादेशं दत्तवान्. पितुरादेशमामाद्य श्रीपार्श्वनाथः प्रयाणाभिमुखोऽभवदिति इंद्रेण प्रभुं रणप्रयाणोद्यतमवधिना विज्ञाय निजमातलिसारथियुतो दिव्यरथः प्रेषितस्तदा प्रभुरपि वैरितिमिरततिरस्काराय सूर्य इव तं दिव्यस्यंदनमारुरोह. क्रमेण नियमितप्रयाणानि कुर्वन् सकलबलयुतः प्रभुः कुशस्थलपुरपरिसरे समाजगाम.

☒ अथ भूरिसैन्यसंयुतं श्रीपार्श्वनाथं तत्र समागतं श्रुत्वा कलिंगनृपस्तस्य तेजोऽसमानो भीतः सन् कंठे कुठारं विधाय पार्श्वप्रभोश्चरणयोः पतितो निजापराधं च क्षमयित्वा पश्चाद्वलितः.

☒ अथ हर्षफुल्लितांतःकरणः प्रसेनजितराजा निजपुत्रीं प्रभावतीं पुरस्कृत्य श्रीपार्श्वप्रभोः समीपे समागत्य विज्ञपयामास, हे स्वामिन् भवदनुरक्तां ममैतां नवयौवनां पुत्रीं परिणीय मम मनोरथं सफलीकुरु! संसारविरक्तो भगवानुवाच हे राजन् मम पितुरादेशस्तव शत्रुतो रक्षणकरणरूप एवास्ति, अतोऽहमत्र कन्यापाणिग्रहणं नैव करिष्यामीत्युक्त्वा निजसैन्ययुतः श्रीपार्श्वनाथो निजनगरंप्रति प्रयाणमकरोत, वाणारस्यां चागत्य पितुः प्रणामं कृतवान्.

☒ अथ प्रभुं प्रस्थितं विज्ञाय प्रभावत्या विविधविलापान् कर्तुं प्रारब्धं, तदा प्रसेनजितराजा तामाश्वास्य सार्द्धं च गृहीत्वा स्वयं वाणारस्यामागत्याश्वसेननृपाय विज्ञप्तिं कृतवान्. प्रभुरपि ज्ञानेन निजभोग्यकर्म विज्ञाय महोत्सवपूर्वकं प्रभावतीं परिणीतवान् तया सह च प्रभुर्विषयसुखानि भुनक्ति.

☒ एकदा प्रभुः प्रभावत्या सह गवाक्षस्थो नगरशोभां विलोकयति तदैकस्यां दिशि भूरिनगरलोकान् गच्छतो दृष्ट्वा तत्कारणं सेवकाय पृष्टवान्. सेवकेनोक्तं स्वामिन् कश्चिदेकः कमठनामा पंचाग्निसाधनपरस्तापसो नगराद्बहिः समागतोऽस्ति, तं वंदितुमेते पौराः प्रयांति. तत् श्रुत्वा प्रभुरपि तत्कौतुकविलोकनकृते हस्तिस्कं-

धस्थितः प्रस्थितः, क्रमेण तत्रागत्य प्रभुणाग्निसाधनपरः स तापसो दृष्टः, ज्ञानेन चोपलक्षितो यदयं स एव सिंहजीवोऽस्तीति. तस्य पूर्वभवे सिंहीभूतस्य कमठजीवस्य वृत्तांतस्त्वित्थमस्ति. स सिंहजीवो नरकाच्च्युत्वा तीर्यग्गादिषु भ्रमित्वा कस्यैकस्य दरिद्रस्य ब्राह्मणस्य पुत्रत्वेन समुत्पन्नोऽस्ति, बालत्वे एव पित्रोर्मरणादुदरपूरणादिदुःखेन तापसो जातोऽस्ति.

☒ अथ प्रभुणा तेन प्रज्वालितकाष्टांतर्दह्यमानं सर्पं स्वज्ञानबलेन ज्ञात्वा दयार्द्रीभूतांतःकरणतस्तापसायोक्तं भो तापस त्वं हिंसात्मकं तपः कथं करोषि ? कमठतापसेनोक्तं यूयं राजपुत्रा गजाश्वादिखेलनविधावेते समर्थाः, न च दयातपोवार्त्ताविषये भवतां सामर्थ्यं. तत् श्रुत्वा प्रभुनिजसेवकेन तज्ज्वलत्काष्टं कुठारतो द्विधा कारयामास. निस्सृतश्च तस्मादर्द्धज्वलितः सर्पः, ततः प्रभुस्तं सर्पं नमस्कारमंत्रं श्रावयामास. तेन शुभध्यानेन मृत्वा स सर्पो धरणेंद्रो जातः ।

☒ अथैनं वृत्तांतं दृष्ट्वा सर्वेऽपि नगरलोकाः कमठं निंदयामासुः, एवं जनापमानतो दूनोऽसौ क्रोधांधीभूतोऽज्ञानतपांसि तप्त्वा मृत्वा च मेघकुमारदेवो जातः ।

☒ प्रभुरपि गृहे समागत्यैकदा वसंतर्त्तौ सेवकप्रेरितो वनमध्ये क्रीडार्थं गतस्तत्रैकं जिनमंदिरं चालोक्य तन्मध्ये प्रविष्टः, तत्र चित्रयुतं श्रीनेमिचरित्रं लिखितं दृष्ट्वा मनसि विस्मयं प्राप्तवान् यन्नेमिप्रभुणा

राज्यं राजीमतीं च विहाय बालब्रह्मचारित्वेनैव चारित्रं गृहीतमस्तीति.

☒ अथ वैराग्येण स्वामिना चिंतितं यद्गृहे गत्वा पितरावापृच्छ्याहमपि दीक्षामादास्ये, इति विचिंत्य यावता प्रभुर्गृहमागतस्तावता लोकांतिकदेवैरागत्य धर्मतीर्थप्रवर्त्तनाय प्रभोर्विज्ञप्तिः कृता.

☒ अथ प्रभुरपि वार्षिकदानं दत्वा चतुःषष्टींद्रकृतमहोत्सवपूर्वकं विशालाशिबिकायामारुह्योपवने समागत्य पंचमुष्टिलोचं कृत्वा पौषकृष्णैकादशीतिथौ सामायिकोच्चारं कृतवान्. तदैव प्रभोर्मनःपर्यवज्ञानं समुत्पन्नं. इंद्रादयः सर्वेऽपि सुरगणाः प्रभुं वंदित्वा नंदीश्वरे चाष्टाह्निकामहोत्सवं कृत्वा जग्मुः, द्वितीयदिवसे प्रभुः कोपटाभिधग्रामे धन्नाभिधगृहस्थगृहे क्षीरान्नेनाष्टमपारणं कृतवान्. तत्र च पंच दिव्यानि प्रकटितानि. ततस्त्र्यशीतिदिवसानि यावत्प्रभुश्छद्मस्थत्वेन विहृत्य वाणारस्यां नगर्यां बहिरुद्याने तापसाश्रमे वटवृक्षतले कायोत्सर्गेण स्थितः.

☒ अथ स कमठो मेघमाली पूर्वभववैरप्रेरितः प्रभोः परीषहं कर्त्तुमागतस्तत्रानेकविकरालगजव्याघ्रवेतालादिरूपाणि विधाय स प्रभुं भापयामास, परं तैः स्वामिनमक्षुब्धं विज्ञाय स घोरांधकारनिकरैकनिधितुल्यैर्महामेघैरंबरमाच्छादयामास, तदा ब्रह्मांडोदरविदारणैकदक्षाणि बधिरीकृतनिखिलजगज्जननिकरकर्णानि निःसत्वीभूयप्रणष्टपंचाननगणपरिपूरितगिरिकंदराणि घोरघनगर्जितानि दिग्गजानपि त्रासयामासुः. तडितो निजनिरंतरझगज्झगत्कारैर्घोरतमतमोव्याप्तगिरिगह्वरगतानपि घूकान् दिनकरोदयभ्रमं कारयामासु, भृतमुशलरूपाविच्छिन्नपतज्जलधाराभिर्मेघा वर्षया-

मासुः, कल्पांतकालोच्छलितमुक्तमर्यादो यादोनाथ इव कल्लोल्लोल्ललितं जलपूरं प्रभोर्नासाग्रं यावदागतं, तत्क्षणमेव कृतापराधजनहृदयमिव धरणेंद्रासनं चकंपे, तदैव स धरणेंद्रो निजज्ञानेन कमठकृतोपसर्गं विज्ञायाग्रमहिषीयुतस्तत्र समाजगाम, प्रभुं च वंदित्वा सहस्रपत्रकमलोपरि प्रभुमुध्धृत्य मस्तकोपरि च स निजफणामंडलच्छत्रं धृतवान्. तदग्रमहिष्यश्च तत्र नृत्यं चक्रुः, ततो धरणेंद्रः कमठंप्रति जगाद अरे दुष्ट ! त्वयैतत् किं समारब्धं? अधुनैव तव विनाशं करिष्यामीत्युक्त्वा तेन चक्रं निजकरे गृहीतं, तदा भीतः कमठः प्रभुमेव शरणीकृत्य तस्य चरणयोः प्रविष्टः प्रोवाच च हे स्वामिन् मां रक्ष रक्षेति.

⊠ धरणेंद्रेणोक्तं रे दुष्ट प्रभोः शरणग्रहणादेवाहं त्वां मुंचामीत्युक्तः कमठः प्रभुं क्षामयित्वा त्यक्तवैरभावो निजस्थाने जगाम. धरणेंद्रोऽपि परिवारयुतः प्रभुं वंदित्वा स्वस्थाने गतः, ततश्चैत्रकृष्णपंचम्यां प्रभातवेलायां प्रभोः केवलज्ञानं समुत्पन्नं, देवैरागत्य समवसरणं रचितं. तत् श्रुत्वाश्वसेनराजापि परिवारयुतो महताडंबरेण तत्रागत्य प्रभुं वंदित्वा धर्मदेशनां शुश्राव, तत्श्रवणोत्पन्नवैराग्यो राजा हस्तिसेनाख्यांगजाय राज्यं दत्वा वामाप्रभावत्यादिपरिवारयुतो दीक्षां गृहीतवान्. चिरकालं - दीक्षां प्रतिपाल्य प्रभोर्मातापितरौ चतुर्थे देवलोके गतौ. प्रभुरपि सप्ततिवर्षं यावत्केवलपर्यायं परिपाल्य सम्मेतशिखरे त्रिंशत्साधुपरिवृतो मासिकीसंलेखनायुतः श्रावणकृष्णाष्टम्यां च मोक्षे गतः ॥

॥ इति श्रीभावकुलके श्रीपार्श्वनाथकथा ॥

मूलम्—निच्चुन्नो तंबोलो । पासेण विणा न होइ जह रंगो ॥
तह दाणसीलतवभावणाओ । अहलाओ सव्व भाव विणा ॥२॥

व्याख्या—यथा चूर्णेन विना नागवल्लीदलं रंगयुतं न स्यात्तथा भावं विना सर्वा अपि दानशीलतपोभावना निष्फला ज्ञेयाः ॥ २ ॥

मूलम्—मणिमंतओसहीणं । जंततंताण देवयाणंपि ॥
भावेण विणा सिद्धि । न हु दीसइ कस्सवि लोए ॥३॥

व्याख्या—मणयश्चिंतामणिप्रमुखास्तेषां तथैव मंत्राणामोषधीनां यंत्राणां तंत्राणां देवानां चापि भावेन विना कस्यापि लोके निश्चयेन सिद्धिर्न दृश्यते. ॥ ३ ॥

मूलम्—सुहभावणावसेणं । पसन्नचंदो मुहुत्तमित्तेणं ॥
खविऊण कम्मगंठिं । संपत्तो केवलं नाणं ॥४॥

व्याख्या—शुभभावनामहिम्ना प्रसन्नचंद्रराजर्षिर्मुहूर्त्तमात्रेणापि कर्मग्रंथिं क्षपयित्वा केवलज्ञानं संप्राप्तः ॥ ४ ॥

तस्य कथा चेत्थं—

☒ पोतनपुरनगरे सोमचंद्राभिधो राजास्ति, तस्य धारिण्यभिधाना राज्ञी वर्त्तते. सैकदा राज्ञः केशपाशं सुगंधितैलादिना वासयति, तन्मध्ये चैकं श्वेतवालं दृष्ट्वा तया विनोदेनोक्तं स्वामिन्नयं यमदूतः समागतोऽस्ति. संभ्रांतेन तेनेतस्ततो विलोकितं परं कोऽपि पुरुषो न दृष्टस्तावता विस्मयमापन्नस्य राज्ञो हस्ते सा तं श्वेतवालं निष्कास्यार्पयामास, कथितं च तया स्वामिन् सैष धर्मराजदूतः समागतोऽस्ति.

☒ अथ चकितेन राज्ञा चिंतितमहो मे पूर्वजाः संसारसागरभीताः श्वेतवालदर्शनादर्वागेव प्रव्रज्याप्रवहणाधिरूढा मोक्षनगरे गताः संति, अहं त्वद्यापि विषयकर्दमनिमग्नोऽस्म्यतो मांप्रति धिगिति विचार्य स निजपुत्रप्रसन्नचंद्राय राज्यं दत्वा स्वयं धारिण्या सह तापसीं दीक्षां जग्राह.

☒ अथ प्रथमत एव गर्भवत्या धारिण्या तत्र तपोवने पुत्रैकः प्रसूतो वल्कलैराच्छादितत्वेन च तस्य वल्कलचीरीति नाम दत्तं, धारिणी च तत्र सूतिरोगेण मृत्युमाप, तदा सोमचंद्रोऽरण्यमहिषीणां दुग्धपानतस्तं वल्कलचीरिणं पोषयामास. क्रमेणासौ यौवनं प्राप्तो वनफलानयनादिभिर्निजपितुः परिचर्यां करोति. तत्र स्त्रीरहिते तपोवने वसन्नसौ स्त्रीनामापि न जानाति.

गाथा २३१

कुल-कम

☒ अथ प्रसन्नचंद्रेण श्रुतं यत्तपोवनप्रसवितो ममैको भ्रातारण्यवासी संजातोऽस्ति, परं तमत्रानीय मया तस्यै राज्यभागो देय एवेति विचार्य तेन चित्रकारमाहूयोक्तं त्वया मम पितृपादपवित्रिते तपोवने गत्वा मेऽनुजस्य यथास्थितरूपमालेख्यात्र समागत्य तच्चित्रितरूपं मह्यं समर्पणीयं. चित्रकारोऽपि तत्र गत्वा युक्त्या तस्य यथास्थितरूपमालेख्य राज्ञोऽर्पयामास, कथितं च तेन हे राजन् स तेऽनुजो नूनमरण्यवासी पशुरिवा-ऽदृष्टसंसारविभवो न कस्यापि जनस्य विश्वासं करोति, मयापि प्रच्छन्नं तरुकोटरस्थितेन फलाद्याहरणायागतस्य तस्येदं चित्रमालेखितमस्ति. निजानुजस्य चित्रालिखितरूपं दृष्ट्वाऽवर्णनीयभ्रातृस्नेहार्द्रीभूतांतःकरणो भूपो जगाद अस्ति स कोऽपि सभामध्ये यो ममैनमनुजचंद्रमत्र समानीय ममामंदानंदोदधिमुल्लासयेत् ? तदा तापसशापभया-त्सभास्थितजनमध्यात्केनापि तत्कार्यं नांगीकृतं. किंत्वेकया विदग्धया वेश्यया राज्ञे नमस्कृत्योक्तं हे स्वामिन्निदं भवदिप्सितं कार्यमहं नूनं करिष्यामीत्युक्त्वा सा निजगृहे समागता.

☒ अथ सा वेश्या स्वकीयसखीभिः सह कतिचित्पुरुषान् सार्थे गृहीत्वा तापसाश्रमसमीपे वने समा-गता. पुरुषाश्च वृक्षोपरि प्रच्छन्नतया स्थिताः सोमचंद्रगमनागमनं विलोकयंति. इतो वल्कलचीर्यपि फलादि-ग्रहणाय तत्र वने समायातस्तत्र च स्थितं वेश्यागणं तापसगणं मन्यमानो वंदित्वा पप्रच्छ भो तापसा यूयं कुतः समागताः ? वेश्याभिरुक्तं वयं पोतनपुराभिधाश्रमात्समागताः स्मः, वल्कलचीरिणोक्तं तर्हि यूयमेतानि मया समानीतानि फलानि भक्षयतेत्युक्त्वा तेन निजपार्श्वस्थफलानि तासामग्रे मुक्तानि. वेश्याभिरुक्तं वयमीदृशीरसानि

फलानि न भक्षयाम इत्युक्त्वा ताभिर्निजकरंडतो मनोहरस्वादोपेता मोदका निष्कासिता दत्ताश्च तस्मै भक्षणाय.

☒ वल्कलचीरी तान् सुगंधसुस्वादोपेतान् मोदकानास्वाद्य बिल्वादिफलेभ्यः पराङ्मुखीभूय हृष्टः सन् पृष्टवान् भो तापसाः कुत ईदृशानि सुस्वादुफलानि भवद्भिरधिगतानि ? ताभिरुक्तमस्माकमाश्रमे ईदृशानि मनोहरफलान्येवोद्भवंतीत्युक्त्वा ताभिर्निजवक्षः स्थलाद्यंगोपांगैस्तस्य स्पर्शः कृतस्तेनोक्तं भो ऋषयो भवतां शरीराणि किमतीवकोमलानि संति ? ताभिरुक्तमस्मदाश्रमफलास्वादनत ईदृशानि कोमलानि शरीराणि भवंति, चेत्तवेच्छा तर्हि त्वमप्यस्माभिः सहास्मदाश्रमे समागच्छ ? तेनोक्तमहं मम पितुरेतानि फलानि दत्वाधुनैवागत्य भवद्भिः सहागमिष्यामीत्युक्त्वा स द्रुतं निजपितुः पार्श्वे समागतः.

☒ फलानि च तस्याग्रे मुक्त्वा ततश्चलितः, सोमचंद्रेण चिंतितं कथमसावद्य पुनर्गच्छतीति चिंतयन् स तस्य पृष्टे चचाल. इतः सोमचंद्रर्षिमप्यागच्छंतं विलोक्य वृक्षस्थपुरुषा वेश्याभ्यस्तं वृत्तांतं ज्ञापयामासुस्ततस्ताः सर्वा भीतास्तैः पुरुषैर्युतास्ततो नष्ट्वा नगरे समागताः

☒ अथ वल्कलचीर्यपि द्रुतपदैश्चलन् बहुभूमिमुल्लंघितवान्. इतस्तस्य पथ्येको रथो मिलितो रथिनं चालोक्य वल्कलचीरिणोक्तं हे तात भवद्भ्योऽहं प्रणमामि, रथिनोक्तं भो तापसकुमार त्वं क्व व्रजसि ? तेनोक्तमहं पोतनपुराश्रमे व्रजामि, रथिनोक्तं वयमपि तत्रैव गच्छामः, तत् श्रुत्वा वल्कलचीर्यपि तेन सह चलितः.

☒ अथ रथमध्यस्थितां रथिप्रियामपि स ताततातेति कथयति. तदा तया निजभर्त्तारंप्रत्युक्तं हे स्वामिन्नसौ तापसकुमार कथममंगद्धं प्रजल्पति ? रथिनोक्तं हे प्रिये स्त्रीरहितेऽरण्ये वसन्नसौ मुग्धत्वेन स्त्रीपुरुषयोर्भेदं न जानाति.

☒ अथ क्रमेण चलन वल्कलचीर्यपि तेन रथिना सह पोतनपुरप्रतोलीं प्राप्तस्तदा रथिकस्तस्मै स्तोकं द्रव्यं दत्वा कथयामास भो तापसकुमार त्वमत्र कस्मैचिदेतद् द्रव्यं दत्वा तस्य स्थाने निवासं कुर्याः, यतोऽत्र विना द्रव्यं स्थानं न लभ्यते. इत्युक्त्वा स रथी निजगृहे गतः.

☒ अथ वल्कलचीर्यपि नगरमध्ये प्रविश्य मुखमूर्ध्वीकृत्येतस्ततो विलोकयन् पथि चचाल.

☒ अथ क्वाहं प्रविशामीति चिंतयन्नेकस्या वेश्याया गृहद्वारमुद्घाटितं ज्ञात्वा तच्च तापसाश्रमं जानंस्तस्मिन् प्रविश्य वेश्यायै जगाद हे तात अहं प्रणमामि गृहाणेदं द्रव्यं प्रदेहि च मे निवासस्थानं ? वेश्ययोक्तं भो तापसकुमार त्वमत्र सुखेन संतिष्ठेत्युक्त्वा मोदकादिभिस्तं सा संतोषयामास. ततः सा नापितमेकमाहूय तस्मै कथयामास, भो नापित अस्य ऋषिकुमारस्य नखकेशादीन् कर्त्तयित्वा सम्यक् कुरु ?

☒ अथ नापितेन तथाकरणानंतरं वेश्या तस्य वल्कलानि निष्कामयामास, तदा स वल्कलचीरी बाल इव रुदनं चकार, कथयामास च ममाजन्ममुनिवेषं त्वं मा निष्कामय ? तदा वेश्ययोक्तं हे ऋषिकुमार

त्वं खेदं मा कुरु ? अस्मिन्नाश्रमस्थस्यायमेव विधिरस्ति. ततः स्नानानंतरं वैश्या तस्य मनोहरवस्त्राभूषणानि परिधापयामास, ततः सा मृदंगतूर्यादिध्वनिगानपूर्वकं तेन सह निजैककन्यायाः पाणिग्रहणं कारयामास,

☒ अथ वल्कलचीर्यानयनकृते तपोवनगतया वेश्यया समागत्य सकलोदंतपूर्वकं राज्ञे निवेदितं स्वामिन् सभवदनुजोऽस्माभिः सह यावदत्रागंतुं प्रचलितस्तावत्पृष्टे समागच्छंतं सोमचंद्रर्षिं दृष्ट्वा वयं भीताः प्रणश्यात्र समागताः, सोऽप्यस्मान् गवेषयितुं वने एव भ्रमन् भविष्यति.

☒ तत् श्रुत्वा राजातीवखेदमापन्नश्चिंतयामास धिग्मां मया पितापुत्रयोर्वियोगः कारितः, किं चैकाकिनो वने भ्रमतो मम भ्रातुरपि का दशा भविष्यतीति चिंतया दुःखीभूतो नृपो नगरे नृत्यगानादि निवारयामाम, नगरलोका अपि सर्वे शोकातुरा जाताः.

☒ इतो निजकर्णशूलतुल्यं मृदंगध्वनिं श्रुत्वा राज्ञा पृष्टं यदत्र समये कोऽस्ति स सुखी यस्य गृहे वादित्रनादो जायते ? मंत्रिभिस्तच्छुद्धिकरणानंतरं द्रुतमेव सा वेश्या नृपसमीपे समागत्यावदत् हे स्वामिन् पूर्वं ममैकेन नैमित्तिकेनोक्तं यत्तापसवेषभृत्कोऽपि कुमारस्तव गृहे समेष्यति तस्मै त्वया स्वपुत्री परिणायितव्या, सोऽद्य तथोक्तः कुमारो मम गृहे समायातस्तेन मम गृहे विवाहमहोत्सवे मृदंगादिवादित्राणि वाद्यंते, भवतां च दुःखं मया न ज्ञातं, तन्मेऽपराधं यूयं ममोपरि कृपां विधाय क्षमत ?

अथ राजा तापसकुमारनामतो विस्मितस्तस्य शुद्ध्यर्थं पूर्वं तपोवनप्रेषितवेश्यां तत्र प्रेषयामास. सापि तत्र गत्वा तमुपलक्ष्य हृष्टा द्रुतं पश्चादागत्य राजानं वर्द्धापयामास हे स्वामिन् स एव तवानुजो वर्त्तते. तत् श्रुत्वातीवानंदितो भूपः स्वयं तस्य सन्मुखं गत्वा परिणीतभार्यासहितं तं हस्तिस्कंधे समारोप्य वहुमहोत्सवपूर्वकं निजगृहे समानयत.

☒ अथ क्रमेण स वल्कलचीर्यपि सर्वसंसारस्थितिनिपुणो जातः, राज्ञा चान्या अपि वह्व्यः कन्यास्तस्य परिणायितास्ताभिः सह सोऽनेकविषयसुखानि भुनक्ति.

☒ अथ सोमचंद्रर्षिर्वल्कलचीर्यन्वेषणकृते सकलेऽपि वने पर्यटनमकरोत्, किंतु कुत्रापि तमलब्ध्या खिन्नो निवृत्य पश्चान्निजाश्रमे समागत्य पुत्रविरहदुःखीतोऽनेकविधान् विलापान् कुर्वन्नंधीबभूव. कतिचिद्दिवसानंतरं प्रसन्नचंद्रराजा निजप्रधानमुखेन स्वपित्रे संदेशः प्रेषितो यद्वल्कलचीरी मम समीपे कुशलेन वर्त्ततेऽतस्तद्विषया चिंता न कर्त्तव्या. तत् श्रुत्वा सोमचंद्रर्षेः किंचिद्दुःखं स्वल्पीभूतं.

☒ अथ द्वादशवर्षानंतरमेकदा रात्रौ जागृतो वल्कलचीरी मनसि चिंतयामास यद्धिगस्ति मां कृतघ्नंप्रति, यद्येन पित्राहं बाल्ये एव मृतमातृकोऽनेककष्टसहनेनापि पोषयित्वा वर्द्धितस्तस्य मे वृद्धपितुः सेवावसरेऽहं तं वनमध्ये एव त्यक्त्वात्र विषयसुखनिमग्नीभूय स्थितोऽस्मि, अतः प्रभाते एव भ्रातरमापृच्छ्याहं तपोवने

गत्वा पितुपादपरिचर्यापरो भविष्यामीति विचिंत्य प्रभाते तेन भूपाय प्रोक्तं हे भ्रातः संप्रति मम पितुश्चरणे-क्षणाभिलापो वर्त्तते तत् श्रुत्वा प्रसन्नचंद्रेणाप्युक्तं हे भ्रातर्ममापि स एवाभिलापोऽस्ति.

⊠ अथ तौ द्वावपि भ्रातरौ निजसैन्ययुतौ ततश्चलितौ. तपोवननिकटे समागत्य तौ पादचारिणौ तपोवनमध्ये प्रविष्टौ. तदा वल्कलचीरी पूर्वं तपोवनविविधप्रदेशेषु चिरकालानुभूतबाल्यकेलीसौख्यं संस्मृत्य प्रसन्न-चंद्रंप्रति कथयामास.

⊠ हे भ्रातस्त एवैते बिल्वादिवृक्षा यत्राहं कपिवदारूढोऽनेकफलान्यविदम्. तान्येवेमानि सरांसि येषां स्फटिकनिर्मलसलिले मया हंसलीलानुभवो विहितः, त एवेमे हरिणा यैः सह मया चिरकालं यावत्क्रीडा कृताभूत्, ता एवैता महिष्यो याभिर्निजपीयूषनिभैः क्षीरैर्मातृवन्मे पोषणं विहितमित्यादिवर्णनैर्निजभ्रातुर्मानस-माह्लादयन् क्रमेण वल्कलचीरी बंधूपेतो निजतातचरणांभोजेभ्रमरलीलायितं कुर्वन् कथयामास च हे तात पूज्य-पादानां भवतां चिर्कालाच्चरणारविंदसेवनवंचितः कृतघ्नोऽयं भवत्पुत्रो वल्कलचीरी घोरसंसारसागरे निमज्जन् पताकाद्यंकितभवच्चरणप्रवहणं शरणीकर्त्तुं समागतोऽस्तीत्युक्त्वा तेन निजमस्तकं सोमचंद्रर्षिचरणयोर्न्यस्तं. सोमचंद्र-र्षिरपि तस्य विनयांचितवचनानि श्रुत्वातीवहर्षोद्भवनतो विघटितनिजनयनतिमिरपटलैर्हर्षाश्रुजलनिकरैश्चिरकालघोरसं-सारस्थित्युत्पन्नतच्छरीरमालिन्यापनोदार्थमिव तं संस्नपयामास.

☒ ततः प्रसन्नचंद्रोऽपि हर्षाश्रुदंभतश्चिरविरहदुद्भवदुःखसमूहं बहिर्निष्कासयन्निव तातपादारविंदयोर्निजमस्तकं विन्यस्य जगाद हे तात वल्कलचीर्यपहरणतः कृतभवदपराधभारतो विनम्रीभूतोऽयं प्रसन्नचंद्रोप्यनृणीभवनाय भवच्चरणसेवनाभिलाषैकमानसः समागतोऽस्ति.

☒ अथ नयनपटलापहारतो दूरीभूतनिजांधत्वः सोमचंद्रर्षिरपि साक्षान्निजविनयिपुत्रौ नयनगोचरीकृत्याशीर्वाददानपूर्वकमुवाच भो पुत्रौ प्रयाति किं युवयोः कालः सुखसमाधिना ? ताभ्यामुक्तं पूज्यताततपदानां प्रसादादावां सुखिनौ स्व इत्युक्त्वा वल्कलचीर्युटजमध्ये प्रविश्य पूर्वसंस्कारतः सरजस्कानि निजपात्रविशेषाणि निजात्मलग्नकर्माणीव प्रमार्जितानि संतीति विचारयतस्तस्य जातिस्मरणज्ञानं समुत्पन्नं, दृष्टश्च तेन गृहीतदीक्षो निजपूर्वभवः, क्रमेण तदैव शुक्लध्यानोपगतोऽसौ वल्कलचीरी तत्रैव केवलज्ञानमाप्तवान्, देवैरागत्य तस्य मुनिवेषदानपूर्वकं महोत्सवः कृतः, श्रुत्वा च तस्य धर्मदेशनां सोमचंद्रप्रसन्नचंद्राभ्यां सम्यक्त्वं गृहीतं. इतः श्रीमहावीरप्रभुस्तत्र पोतनपुरे समवसृतस्तदा सोमचंद्रर्षिणा तापसीं दीक्षां विहाय प्रभोरग्रे जैनदीक्षा गृहीता. वल्कलचीर्यपि तत्र समागत्य केवलिसंसदि स्थितः, प्रसन्नचंद्रनृपोऽपि निजातिबलाल्पवयबालपुत्रायापि राज्यं दत्वा मंत्र्यादिभिश्च तं पुत्रं संरक्षितं विधाय संसारसमुद्रतरणैकाभिलाषी तरीनिभां दीक्षां प्रभोरग्रे गृहीतवान्.

☒ अथ प्रभुरपि परिवारयुतस्ततो विहृत्य निजदेशनामृतवर्षणैरनेकभव्यजनान् गतसंसारतापान् कुर्वन्

क्रमेण निजचरणन्यासै राजगृहोद्यानमलंचकार. तदा प्रसन्नचंद्रराजर्षिः प्रभोराज्ञामादायैकपादस्थः सूर्याभिमुखीकृत-नयनऊर्ध्वहस्तो ध्यानलीनो राजमार्गे एव तस्थिवान्. इतः श्रेणिकराजा प्रभुवंदनार्थं निजसकलदलयुतो नगर-मध्यात्प्रभुपवित्रितोद्यानगमनकृते प्रयाणमकरोत्.

अथ श्रेणिकसैन्याग्रगामिनौ सुमुखदुर्मुखाभिधानौ द्वौ श्रेणिकनृपसेवकौ क्रमेण चलंतौ प्रसन्नचंद्र-राजर्षिपवित्रितस्थाने समाजग्मतुः, तत्रैकाग्रमानसेनातापनागृहणतत्परं तं मुनिशेखरं दृष्ट्वा तयोरेकः सुमुखनामा नृपसेवको जगाद अहो धन्योऽयं येन दुष्करमपि कार्यमंगीकृत्य निजात्मसाधनं समारब्धमस्ति. तदा दुर्मुखो निजाभिधानं सार्थकं कुर्वन् जगाद हे मित्र नास्य मुनेरयं तपोधर्मस्तस्येदं सकलमपि क्रियाविधानं निष्फलमेव. यदनेन प्रसन्नचंद्रनृपेण निजबालपुत्रं राज्ये विन्यस्य दीक्षा गृहीतास्ति. किं च बिडालानां दुग्धमिव तेन निजपुत्रराज्यादीनां रक्षणकार्यं मंत्रिणां समर्पितमस्ति, परं न च जानात्ययं राजर्षिर्यत्ते दुरात्मानो मंत्रिणः कपट-पाटवोपेतदुष्टलुंटाका इव तस्य बालतनयं व्यापाद्य राज्ञीश्च स्वाधिनीकृत्य राज्यं च निजहस्ते गृहीत्वाऽचिरादेव प्रजायां दारिद्र्यदानमुपदीकरिष्यंति. ततश्च तस्य वंशोच्छेदपूर्वकं मुक्ताभिलाषो निरर्थक एव भविष्यति.

अथेति वार्त्तयतोस्तयोर्वचनमरुल्लहरी श्रीप्रसन्नचंद्रराजर्षेः कर्णकोटरे प्रविश्य तन्मानसहृद्यालवालसमु-द्भूतं धर्मध्यानांकुरं शिथिलीकृतानित्यभावनामूलं कंपयंत्याच्छादनीभूतसमताभस्म दूरीकृत्य दुर्ध्यानधूलमालाकुलां

☒ तत् श्रुत्वाऽवर्णनीयविस्मयमापन्नेन राज्ञा पृष्टं स्वामिन्नस्य महदंतरितवृत्तांतस्य कारणं मयि कृपां विधाय यूयं कथयत ? तदा प्रभुस्तस्य सुमुखदुर्मुखाभिधतत्सेवकमुखनिःसृतवचनैर्ध्यानपरावर्त्तनादिपूर्वोक्तवृत्तांतकथन-पुरस्सरं कथयामास हे राजन्नेव स राजर्षिर्मनसा युद्धं कुर्वन् निःक्षीणनिजसर्वास्त्रो मुकुटेनापि शत्रुजिघांसनोद्यतो यावन्मस्तके निजहस्तं न्यस्तवांस्तावन्मस्तकं तु लुंचितं ज्ञात्वा निजवाचंयमत्वं च संस्मृत्य पुनरनित्यतादिभावनाजलै-र्हृदयोद्भूतदुर्ध्यानानलमुपशामयंस्तत्रैव मां मनसि ध्यायन्नालोचनां जग्राह. क्रमेण च दुर्ध्यानं परित्यज्य शुभध्यानं प्राप्तवान्.

☒ इतो देवदुंदुभेर्ध्वनिं श्रुत्वा तेनोक्तमयं ध्वनिः कुतः श्रूयते ? स्वामिनोक्तं तस्यैव प्रसन्नचंद्रमुनेः केवलज्ञानं समुत्पन्नमस्ति, तस्य महिमार्थं गच्छद्भिर्देवैः कृतोऽयं देवदुंदुभिनादः श्रूयते. तत् श्रुत्वा श्रेणिको-ऽप्यानंदं प्राप्तः.

☒ अथ क्रमेण सोमचंद्रराजर्षेरपि केवलज्ञानं समुत्पन्नं. एवं वल्कलचीर्यादयस्ते त्रयोऽपि केवलपर्यायं परिपाल्य मोक्षे गताः

॥ इति श्रीप्रसन्नचंद्रराजर्षिकथा. ॥

कोपानलज्वालां प्रकटयामास.

☒ तेनासौ विचारयामास येभ्यो मंत्रिभ्यो मया भूरिसन्मानपूर्वकं संपदो दत्वा विश्वासपात्रसुजनांश्च तान् विचिंत्यैतत्पुत्रराज्यादिरक्षणकार्यं समर्पितं, त एव यदि दुष्टीभूय मम पुत्रादिविनाशनपरा भविष्यंति तर्हि निःकृपीभूय स्वयमेवाहं तेषामित्थं निषुदनं विधास्ये. एवं चिंतयन्नसौ मनसैव केवलं शस्त्रादिभिस्तेषां मारणं समारब्धवान्.

☒ अनुक्रमेण श्रेणिकनृपो हस्तिस्कंधस्थस्तत्र समागतो दृष्ट्वा च ध्यानैकाग्रमानसं प्रसन्नचंद्रराजर्षिं स्वयं हस्तिस्कंधादुत्तीर्य तत्प्रशंसापूर्वकं वंदित्वाऽग्रे चचाल. क्रमेण श्रीवीरप्रभोः समीपे समागत्य वंदनां च कृत्वोचितस्थानस्थो धर्मदेशनां शुश्राव. देशनांते नृपेण पृष्टं हे भगवन् पथि समागच्छता मया दुष्करतपःक्रियाधिरूढो यदा प्रसन्नचंद्रराजर्षिर्वंदितस्तदैव चेदसौ कालधर्मं प्राप्नुयात्तर्हि क्व व्रजेत ? भगवतोक्तं हे नृप तदासौ सप्तमे नरके व्रजेत्.

☒ तत् श्रुत्वाऽतीवविस्मितेन राज्ञा चिंतितं हंतेदृग्दुष्करतपोध्यानाधिरूढमुनेरपि गतिः सप्तमनरकरूपा कथं संभवति? परं नूनं प्रभुणा युक्तमेव प्रोक्तं भविष्यतीति क्षणं वितर्क्य तेन पुनः पृष्टं स्वामिन्नधुना चेत्कालं कुर्यात्तर्हि क्व व्रजेत् ? प्रभुणोक्तमधुना मृतोऽसौ पंचमेऽनुत्तरविमाने व्रजेत्.

कथं संभाति ? परं नूनं ... मृतोऽसौ ...
... क कोन ?





मूलम्—सुरसुसंतो पाए। गुरुणीणं गरहिऊण निअदोसे ॥
उप्पन्नदिव्वनाणा । मिगावई जयउ सुहभावा ॥ ५ ॥

व्याख्या—गुरुण्याः श्री चंदनबालाया पादौ चरणौ शुश्रूषमाणा सेवमाना, अर्थात्तस्याः पादयोर्निजशिरः संस्थाप्य क्षमां मार्गयंती निजदोषाणां गर्हणां कुर्वंती दिव्यज्ञानं केवलज्ञानं प्राप्नुवंती एवंविधा शुद्धभावा सा मृगावती जयतु. तस्या मृगावत्या वृत्तांतो विस्तरतः पूर्वं शीलकुलकाधिकारे कथितोऽस्ति. ॥ ५ ॥

मूलम्—भयवं इलाइपुत्तो । गुरुए वंसंमि जो समारूढो ॥
दट्ठूण मुणिवरिंदं । सुहभावओ केवली जाओ ॥ ६ ॥

व्याख्या—यो महति वंशे समारूढः सन् मुनिवरेंद्रं दृष्ट्वा शुभभावात् केवली जातः स इलापीपुत्रनामा भगवान् जयतीति शेष इति. ॥ ६ ॥

तस्य कथा चेत्थं—

⊠ सुंदराभिधग्रामे द्विज एको वसति, तेन श्रीसुव्रताचार्यसमीपे देशनां श्रुत्वा स्वस्त्रीसहितेन दीक्षा गृहीता.

⊠ अथ सा ब्राह्मणी चारित्रं पालयंति चिंतयति यदस्मिन् धर्मे स्नानादिशुद्धिर्नास्ति, एवं चिंतयत्या तया नीचगोत्रकर्मोपार्जितं. प्रांते च तदनालोच्यानशनपूर्वकं कालं कृत्वा सा देवलोके देवांगना जाता. ब्राह्मणोऽपि संयममाराध्यानशनेन कालं कृत्वा तत्रैव देवोऽभूत्. इतश्चैलावर्द्धनाभिधपुरे इलादेव्यभिधदेव्या एकं सप्रभावं स्थानं वर्त्तते, तत्रैका व्यवहारिभार्या सर्वदा तस्याः पूजां विधाय पुत्रं याचते. क्रमेण स द्विजजीवो देवलोकाच्च्युतस्तस्याः कुक्षौ गर्भत्वेनावातरत्. इलापुत्र इति च तस्य नाम दत्तं, क्रमेण च स यौवनं प्राप्तः, इतः ब्राह्मणीजीवोऽपि पूर्वबद्धनीचगोत्रकर्मोदयेन देवलोकाच्च्युतो नटस्यैकस्य गृहे पुत्रीत्वेन समुत्पन्नः, क्रमेण सा नटपुत्री यौवनं प्राप्यातीवरूपलावण्याद्युपेता जाता.

⊠ अथैकदा स नटो निजकुटुंबयुत आजीविकार्थं निजकलादर्शनायेलावर्द्धनपुरे समागतः

⊠ अथ चतुष्पथमध्ये स नटो वंशारूढो लोकानां पुरो निजांगमोटनादिकलां दर्शयति. इतस्तत्रागतेलापुत्रेण सा महारूपयौवनवती नटपुत्री दृष्टा, तां दृष्ट्वा मोहितोऽसौ मदनशरविद्धो निजगृहे समागत्य जीर्ण-

☒ अथ स नटनायको निजकुटुम्बयुतो नगरे नगरे भ्रमन् क्रमेण बेन्नातटनगरे समायातस्तत्र च तेन नटकुटुम्बेन राज्ञोऽग्रे नृत्यं प्रारब्धं. तदवसरे राजा निजरूपयौवनलावण्यादिगुणगणैर्जितनाकिनितंबिनीमिलापुत्रभार्यां दृष्ट्वा मोहितो मदनशरव्याकुलीभूतश्चिंतयामास चेदमाविलापुत्रो वंशाग्रभागात्पतित्वा म्रियेत तदाहमेतां सुन्दरीं लब्धुं समर्थो भवेयमिति विचित्य तेनेलापुत्राय कथितं हे नटोत्तम त्वं वंशाग्रे गत्वा पट्टोपरिस्थो निजाः सर्वाः कलाः प्रदर्शय ? यथाहं तुष्टीभूय तुभ्यं भूरिदानं यच्छामि. तत् श्रुत्वा द्रव्यलोभाभिभूतेनेलापुत्रेण तथैव कृतं. कुशलत्वेन च वंशाग्रादुत्तीर्य स राज्ञोऽग्रे दानं मार्गयामास.

☒ कुटिलमानसेन राज्ञोक्तं मया व्यग्रचित्ततया तव नृत्यकला सम्यग् दृष्टा, ततः पुनस्तव नृत्यकलां मा दर्शयेत्युक्त इलाकुमारः स्थितोऽपि पुनर्वंशाग्रे गत्वा पट्टोपरिस्थो निजसकलनृत्यकलाः कृत्वा समुत्तीर्णः.

☒ अथ तथैव तृतीयवारमपि कर्तुं नृपेणादिष्ट इलाकुमारस्तस्येंगिताकारादिचेष्टाभिर्ज्ञाततद्दुष्टाभिलाषो वंशाग्रे गत्वा नगरस्वरूपं विलोकयामास. इतस्तेनैकव्यवहारिणो गृहे साधुगृहार्थं समागतो दृष्टस्तदा व्यवहारिभार्या महारूपयौवनवती विविधभूषणालंकारालंकृतदेहा मुनये मोदकान् प्रतिलाभयति. परं निर्विकारो मुनिस्तु न्यस्ताधोदृष्टिः सन् तस्याः सन्मुखमपि नावलोकयति. एवं तस्य मुनेर्निर्विकारतया हृदि विस्मित इलापुत्रो निजहृदि चिंतयामास, यन्मयापि कदाचिदेवंविधो वेषो दृष्टोऽस्तीति चिंतयतस्तस्य जातिस्मरणज्ञानमुत्पन्नं.

मंचकोपरि सुप्तो मात्रादिपृष्टोऽपि किंचिन्न जल्पति. ततोऽत्याग्रहेण पित्रा पृष्टोऽसौ निजमनोरथं कथयामास.

⊠ तदा पित्रोक्तं हे पुत्र एषां नीचकुलोत्पन्नानां स्पर्शेनापि वयमपवित्रीभवामस्तर्हि विवाहस्य का वार्त्ता ? अहं त्वामतियौवनरूपलावण्यादिगुणगणालंकृतां सुकुलोद्भवां व्यवहारिपुत्रीं परिणाययिष्यामि. एवं बहुधोक्तोऽप्यसौ कथयामास ममान्यकन्येच्छा नास्ति, चेदसौ नटपुत्री मम न मिलिष्यति तदाहं प्राणत्यागं करिष्यामि. तत् श्रुत्वाऽनन्योपायः श्रेष्टी तस्य नटनायकस्य समीपे गत्वा कथयामास हे नट त्वमिप्सितं द्रव्यं गृहीत्वापि तव पुत्रीं मम पुत्राय समर्पय ? तेनोक्तं हे श्रेष्ठिन् कन्यादानाधिगतं द्रव्यं नाहं स्वीकरोमि, परं यः कोऽपि मम गृहजामाता भविष्यति तस्मै मे कन्यामहं दास्यामि, चेत्तव पुत्रस्य तथेच्छा भवेत्तर्हि मम पुत्रीमपि तस्मै समर्पयिष्यामि.

⊠ तत् श्रुत्वा चिंतातुरः श्रेष्टी गृहे समागत्य पुत्रंप्रति कथयामास हे पुत्र मया स नटनायको बहुधा लोभितोऽपि निजपुत्रीं नार्पयति, कथयति च यो मम गृहजामाता भविष्यति तस्यैवाहं पुत्रीं दास्यामीति. तत् श्रुत्वेलापुत्रेणोक्तं हे पितरहं तथैव करोमि ममाज्ञां देहि ? नोचेदहं प्राणत्यागं करिष्यामीत्युक्त्वा पित्रादिकुटुंबिभिर्बहु निवार्यमाणोऽपीलापुत्रो नटेभ्यो मिलितः, नटोऽपि तस्य निजपुत्रीं समर्प्य तं च गृहजामातरं कृत्वा रक्षितवान्. क्रमेणेलापुत्रोऽपि तया नटपुत्र्या सह विविधभोगान् भुंजानो वंशोपरि खेलनादिसकलनटकलाप्रवीणो बभूव.

तस्य कथा प्रथमकुलके उदाईराजर्षिकथामध्ये कथिता ॥

मूलम्—खवगनिमंतणपुव्वं । वासीभत्तेणं सुद्धभावेणं ॥
भुंजंतो वरनाणं । संपत्तो कूरगड्डुवि ॥ ८ ॥

व्याख्या—क्षपकनिमंत्रणपूर्वकमिति मासक्षपणादिकारकमुनिं प्रति वंदित्वा निमंत्र्य च वासीभक्तेन करंबादिशीतलान्नेन शुभभावपूर्वकं भुंजानः कूरगड्डुनामसाधुरपि केवलज्ञानमाप्तवान् ॥ ८ ॥

तस्य कथा चेत्थं—

⊠ एकदा विशालायां नगर्यां सुव्रताभिधानाचार्याश्चतुर्मासीं स्थितास्तस्य च तत्र बहुपरिवारो निजकर्मकंटककदंबकदाहाय निव्रदहननिभान्यनेकविधतपांसि कुर्वन् श्रुताभ्यासैकलीनो बभूव. तत्परिवारमध्ये कोऽप्येकस्तपस्विसाधुर्मासक्षपणतपः करोति. पारणकदीने च केनचिदेकेन लघुक्षुल्लकेन सहाहारार्थं गच्छति.

⊠ अथैकदाहारार्थं तेन लघुक्षुल्लकेन सह गच्छतस्तस्य तपस्विसाधोः पादतले दर्दुरिका समागतत्वात्मृता. तदा तेन क्षुल्लकेनोक्तं हे स्वामिन् भवत्पादतले ममायातेयं दर्दुरी मृता. तत् श्रुत्वा क्रुद्धेन तपस्विना भणितमिदं तु पूर्वमेव मृतास्ति, न च मे पादतलाघातेन मृतास्तीत्युक्त्वा तेन मिथ्यादुष्कृतं न दत्तं.

ततश्च तेन पूर्वभवपालितं चारित्रं माक्षान्नयनगोचरीकृतं.

☒ अथ तेन चिंतितं धिग्मां विषयलंपटं, स्त्रियो हि प्राणिनां संसारसागरे निमज्जनैकदक्षा शिलातुल्या अस्तीत्याद्यनित्यभावनां भावयतस्तस्य तत्र वंशोपर्येव केवलज्ञानं समुद्भूतं, वंशश्च सहस्रदलकमलरूपो जातो देवैश्चागत्य तस्य महोत्सवः समारब्धः, देवदत्तसाधुवेषमंगीकृत्येलापुत्रकेवलिना तत्र विषयत्यागोपदेशो दत्तस्तदा नृपप्रभृतिभूरिलोकाः प्रतिबुद्ध्य सम्यक्त्वमंगीचक्रुः, इलापुत्रस्त्रियापि दीक्षा गृहीता, ततोऽसाविलापुत्रकेवली चिरकालं केवलिपर्यायं परिपाल्य मोक्षं गतः

॥ इति श्रीभावकुलके इलापुत्रकेवलीकथा. ॥

**मूलम्—कविलो अ बंभणमुणी। असोगवणिआइमब्भयारंमि ॥**
**लाहालोहत्तिपयं। पढंतो जायजाइसरो ॥ ७ ॥**

व्याख्या—कपिलनामा द्विजपुरोहितपुत्रो मुनिरशोकवाटिकायां "जहा लाहो तहालोहो" इत्येतत्पदं पठन् भावयन् सन् जातजातिस्मरणज्ञानो जज्ञे. ततोऽसौ साधुवेषं समासाद्य कालांतरे च केवलज्ञानभाग्वान्. ॥ ७ ॥

☒ इतश्च कुम्भपुरीनगर्यां कुंभाख्यनृपस्य ललितांगनामा पुत्रः सर्पविषेण मृतः, तथा क्रुद्धेन राज्ञा लोकेभ्य आदिष्टं यद्यः कोऽपि कमपि सर्पं मारयित्वानिष्यति तमहं दीनारमेकं दास्यामि. द्रव्यलोभाभिभूता लोका दृष्टिपथमायातान् सर्वानपि सर्पान् मारयित्वा नृपाग्रे समानयंति. इतो बिलमध्यक्षिप्तमुखस्तपस्विमुनिजीवरूपोऽसौ दृष्टिविषः सर्पः केनचित्कृपीवलेन दृष्टस्तदा स तं सर्पं बिलान्निष्कासयितुं विविधानुपायानकरोत्. तदासौ सर्पश्चिंतयामास हे जीव तवाऽशुभकर्म समुदितं तस्माद्वेगं मा कुरु? ततोऽसावर्हदादिचतुर्णां शरणं विधाय सर्वजीवांश्च क्षामयित्वा "मा मम दृष्टिविषादयं कृषीवलः पंचत्वं प्राप्नोत्विति" विचिंत्य संमिलितनेत्रोऽसौ स्वयमेव बिलान्निःसृतः, कृतश्च दुष्टेन तेन कृपीवलेन खंडशो मृतश्च. इतो निजसंततीनामुच्छेदं ज्ञात्वा नागदेवेनागत्याकाशवाणी कृता हे राजन् त्वं सर्पान् मा मारय? तव पुत्रो भविष्यतीति श्रुत्वा राज्ञा सर्पमारणं निषिद्धं.

☒ अथ स सर्पजीवः कुंभराज्ञः पट्टराज्ञीकुक्षौ पूर्णे मासे च तथा सुखेन पुत्रः प्रसूतस्तस्य महोत्सवपूर्वकं च नागदत्त इति नाम स्थापितं, क्रमेणासौ नागदत्तोऽधीतसकलकलो यौवनमनुप्राप्त. कदाचिद्गवाक्षस्थो नगरशोभां विलोकयति, तदा तेनैको मुनिः पथीर्यासमितिशोधनपूर्वकं गच्छन् दृष्टस्तं दृष्ट्वेहापोहं कुर्वतो नागदत्तस्य जातिस्मरणज्ञानमुत्पन्नं, तेन स संसाराद्विरक्तीभूय चारित्रग्रहणाभिलाषी जातः,ततोऽसौ विनयपूर्वकं पितरावापृच्छ्य सद्गुरुसमीपे दीक्षां गृहीत्वेति विज्ञप्तिं चकार हे भगवन् तिर्यग्भवागतत्वेन क्षुद्वेदनीयकर्मोदयसद्भावादहं तपः कर्तुं समर्थो नास्मि, ततोऽहमाजन्म क्रोधत्यागाभिग्रहं करोमि, तत् श्रुत्वा हृष्टेन गुरुणोक्तं भो म-

ततस्तौ द्वावप्याहारमादायोपाश्रये समाजग्मतुस्तदा क्षुल्लकेन चिंतितं ध्रुवमसौ संप्रति गोचर्यालोचनसमये तत्पापमालोचयिष्यति, परं तन्मंडुकीघातोद्भूतं पापं तेन नालोचितं. तदा क्षुल्लकेन चिंतितं ध्रुवं तेन तत्पापं विस्मृतं संभवति, परमधुना पारणावसरे कथनतस्तस्य क्रोधः प्रादुर्भविष्यति, ततः प्रतिक्रमणवेलायां चेदसौ विस्मरिष्यति तदाहं तस्यैतत्स्मारयिष्यामीति विचिंत्य स मौनमाधाय स्थितः

☒ अथ संध्यासमये सर्वेऽपि मुनयः प्रतिक्रमितुं लग्नाः, आलोचनासमये च सर्वैर्निजनिजपापमालोचितं, परं तेन तपस्विना मंडुकीघातपापं नालोचितं, तदा सरलमानसेन क्षुल्लकेनोक्तं भो पूज्य अद्य यदावामाहारार्थं गतौ तदा भवत्पादतले मंडुकी मृता, ततस्तत्संबंधिपापमालोचयध्वं? तत् श्रुत्वातीवकुपितोऽसौ तपस्वी मुनिः प्रोवाच रे मूढ ईर्यापथिकीशोधनपूर्वकं गच्छतो मम पादतले मंडुकी कुतः समायाता? ततोऽनृतवचनजल्पाकस्य तव तत्फलं दर्शयामीत्युक्त्वा स क्रोधांधः पट्टकमादाय क्षुल्लकमारणाय धावितः, परं सूचिभेद्योपाश्रयमध्यस्थांधकारे तस्य शिरः स्तंभेनास्फाल्य भग्नं, मृत्वा स प्रचंडो दृष्टिविषसर्पो जातस्तत्र तस्य कथंचिज्जातिस्मरणज्ञानं समुत्पन्नं ततश्च तेन चिंतितं धिग्ममेदं क्रोधफलं समुद्भूतमतोऽस्मिन् भवेऽहं कदाचिदपि क्रोधं नो करिष्यामि, प्रासुकाहारं च भक्षयिष्यामि, देवश्च मे वीतरागः, सुसाधुश्च गुरुः, केवलिप्रणीतधर्मश्च मम शरणमिति सम्यक्त्वयुतां प्रतिज्ञां विधाय दिवसे निजमुखं च बिलमध्ये निक्षिप्य स तिष्टति, रात्रौ च प्रासुकाहारं गवेषयित्वा भक्षयति.

ह्यनुभाव तपस्विमुनिरपि क्रोधत्यागेनैव केवलमवाप्नोति, रागद्वेषयोर्जयं विना नैव सिद्धिर्भवति.

यतः—रागद्वेषौ यदि स्यातां । तपसा किं प्रयोजनं ॥
रागद्वेषौ च न स्यातां । तपसा किं प्रयोजनं ॥१॥

☒ ततो नागदत्तमुनिना गुरुवचनमंगीकृत्य क्रोधकरणप्रत्याख्यानं कृतं. तदादितोऽसौ संघमध्यात्केनचित्साधुनापि कथितं कठिनं वचनं शांतमनसा सहते, न च तस्योपरि मनागपि क्रोधं करोति, परं तपोविपनेऽशक्तोभूतः संध्यायामल्पाहारं कृत्वा सुप्तोऽप्यसौ क्षुधातुरः कष्टेन रात्रिं निर्गमयति. गडुभृतं करंबाहारं स करोति तेन तस्य कूरगडु इति नाम जातं.

☒ अथ तत्र संघाटकेऽन्ये एकमासीद्विमासीत्रिमासीचतुःमासीतपःकारकाश्चत्वारस्तपस्विनः संति, ते नित्याहारकर्तुः कूरगडुसाधोर्हास्यं कुर्वंति.

☒ एकदा स कूरगडुसाधुर्निशायां प्रथमपौरुष्यां स्वाध्यायं कृत्वा द्वितीयपौरुष्यां च ध्यानस्थितश्चिंतयति सांप्रति धिगस्तु तपसा विना नित्यमाहारलोलुपस्य मम कर्माणि कथं विलयिष्यंति ? अमी चत्वारस्तपस्विनः साधव एव धन्याः संतीत्यादि चिंतयतस्तस्य पार्श्वे शासनदेवतयागत्य वंदना कृता. तस्मै वदंतीं

शासनदेवतां निरीक्ष्य तेषां चतुर्णां तपस्विसाधूनां मनस्यतिवेर्ष्या समुत्पन्ना.

☒ अथ प्रभाते स कूरगडुमुनिर्यदाहारं समानीय भक्षयितुं लग्नस्तदा तैरीर्षालुभिर्मुनिभिस्तत्समीपे समागत्य तस्याहारमध्ये थूत्कृतं. तदा स मुनिः क्षमायुक्तश्चिंतयामास अहो मयाधमेन तेषां तपस्विमहात्मनां वैयावृत्त्यं न क्रियतेऽतस्तेषां कषायोत्पत्तिर्बभूव. ममैवायं दोष इत्याद्यनित्यभावनां भावयन् क्षपकश्रेण्यामारूढोऽसौ मुनिः केवलज्ञानमासादितवान्. तदा देवैरप्यागत्य दुंदुभिनादपूर्वकं तस्य केवलमहोत्सवः कृतस्ततो देवरचितस्वर्ण-कमलोपरिस्थितेन तेन कूरगडुकेवलिना धर्मदेशना दत्ता. ते चत्वारोऽपि तपस्विनः प्रतिबुद्धाः संतो निजात्मानं निंदंतस्तस्य पार्श्वे समागत्य विनयावनता निजापराधं क्षामयामासुः, प्रांतेऽनित्यभावनां भावयद्भिस्तैरपि केवल-ज्ञानमासादितं.

☒ अथ कूरगडुमुनिर्बहुजीवान् प्रतिबोध्यप्रांते मोक्षे गतः

॥ इति श्रीभावकुलके कूरगडुमुनि कथा ॥

## मूलम्—पूव्वभवसूरिविरइअ—नाणासाअणपभावदुम्मेहो ॥
## नियनामं झायंतो । मासतुसो केवली जाओ ॥९॥

व्याख्या—पूर्वभवे सूरिपदधारकस्तस्मिन् समये न तेन ज्ञानस्याशातना कृता, तत्प्रभावाद् बुद्धिरहित एवंविधो मासतुसनाम मुनिर्निजनाम ध्यायन् केवली जातः ॥ ९ ॥

तस्य कथा चेत्थ—

☒ पाटलीपुरनगरे द्वौ व्यवहारिभ्रातरौ वसतः, कदाचित्ताभ्यां सुगुरुसमीपे वैराग्येण दीक्षा गृहीता. तयोरेको भ्राता बहुश्रुतो जातः, क्रमेण च गुरुणा तस्मै आचार्यपदवी दत्ता.

☒ अथ सूत्रार्थपाठका सर्वेऽपि शिष्यास्तं दिवारात्रिं सेवयंति, क्षणे क्षणे संदेहान् पृच्छंति, एवं चासौ क्षणमात्रमपि विश्रामं न लभते. तदा तेन चिंतितं गुरुणा ममाचार्यपदवीं दत्वाऽध्याप्य चाहं महाक्लेशमध्ये पातितः, अनधीतोऽयं मम भ्राता धन्यो य. सुखेन संतिष्ठते निद्रां च लभते, संसारमध्ये मूर्खत्वमेव वरं, मूर्खत्वे चाष्टौ गुणाः संति यथा—

मूर्खत्वं हि सखे ममापि रुचितं यस्मिन् यदष्टौ गुणा ।
निश्चिंतो बहुभोजनोऽत्रपमना नक्तं दिवा स्वापकः ॥
कार्याकार्यविचारणांधबधिरो मानापमाने समः ।
प्रायेणामयवर्जितो दृढवपुर्मूर्खः सुखं जीवति ॥ १ ॥

इति तेन सूरिणा ज्ञानस्यावहेलना कृता.



☒ अथैकदा सर्वेऽपि मुनयः स्थंडिलचर्यादिकार्यविशेषाय बहिर्गतास्तमवसरं प्राप्य खिन्नोऽसावेकाकी नगराद्बहिर्निःसृतः. तदा कौमुदीमहोत्सवानंतरं लोकैरेकत्र स्थाने मुक्त इंद्रस्तंभस्तेन दृष्टस्तं च दृष्ट्वा तेन चिंतितमहो कौमुदीमहोत्सवे जनगणैर्वेष्टितोऽयमिंद्रस्तंभः शृंगारितोऽतीवशोभायुक्तो बभूव. अधुना त्वेकाकिस्थितस्यास्योपरि काका अपि विष्टां कुर्वंति, अतो ममापि गच्छमध्यस्थितितः श्रेय इति विचिंत्य स पश्चाद्वलित्वोपाश्रये समागतो मनसैव च स्वातिचारस्यालोचना तेन गृहिता. शुद्धं चारित्रं प्रपाल्य प्रांतेऽनशनं विधाय स देवलोके गतस्ततश्च्युतोऽसावाभीरकुले समुत्पन्नः क्रमेण च यौवनं संप्राप्तः पित्रा कन्ययैकया सह परिणायितः. क्रमेण च तस्यैका पुत्री जाता, सा यौवनं प्राप्यातीवरूपलावण्योपेता बभूव.

☒ अथैकदा स आभीरो घृतभाजनानि शकटे संस्थाप्य तां निजपुत्रीं च सार्थीकृत्य घृतविक्रयाय नगरंप्रति चलितः, सार्थे केचिदन्येप्याभीरा घृतभाजनभृतानि निजनिजशकटानि समादाय नगरंप्रति प्रस्थिताः, पथि ते यौवनोन्मत्ता आभीरास्तां महारूपवतीमाभीरपुत्रीं चपलदृग्भिर्विलोकयामासुस्ततस्तेषां व्यग्रचेतसां शकटान्यपि तत्स्पर्द्धयैवोन्मार्गगामीनि बभुवुः, पतितानि चावटमध्ये भग्नानि च तेषां मनोभिः सार्द्धं घृतभाजनानि. तद् दृष्ट्वा तस्याभीरस्य मनसि वैराग्यभावः समुल्लसितस्ततोऽसौ क्रमेण नगरे समागत्य घृतविक्रयं च कृत्वा निज-

ग्रामे समागतस्ततोऽसौ निजपुत्रीं केनाप्याभीरेण सह परिणाय्य तस्मै जामात्रे च गृहधनादि सर्वं समर्प्य स्वयं सद्गुरुसमीपे दीक्षां जग्राह.



☒ ततो योगोद्वहनक्रियासमये तेनोत्तराध्ययनानि पठितुमारब्धानि. अध्ययनत्रयाभ्यासानंतरं तस्य ज्ञानावरणीयकर्म समुदितं, तेनानवद्यं पदमप्युच्चारयितुं समर्थो नाभूत्. तदा तेन विनयावनतेन गुरवः पृष्टा हे भगवन् मयि कृपां विधाय ज्ञानावरणीयकर्मक्षयायोपायमादिशध्वं ? गुरुणोक्तं हे महानुभाव त्वमाचाम्लतपःकरणपूर्वक " मा रुष मा तुषेति " पदं पठ ? तथेति कृत्वा तत्प्रतिपन्नं.

☒ अथ क्षमासागरोऽसौ मुनिराचाम्लतपः परायणो गुरूक्तं पदं सर्वदा पठति, परं जडीभूतत्वेन तत्पदस्थाने " मासतुषेति " पदं पठितुं समारब्धं. गुरुर्वहुवारं तस्य स्पष्टतया तत्पदं कथयति परं पूर्वकृतगाढज्ञानावरणीयकर्मोदयतोऽसौ तत्पदं स्पष्टतयोच्चारयितुं न शक्नोति. तं तथोद्बोधपरं दृष्ट्वा लोका हसंति, परं क्षमासागरोऽयं तस्य मनसि मनागपि क्रोधो न प्रादुर्भवति, प्रत्युत स निजात्मगर्हणां करोति.

☒ एवमाचाम्लतपः कुर्वतस्तत्पदं नोद्गोपयतस्तस्य द्वादश वर्षाण्यतिक्रांतानि, तथापि तत्पदं ततो नोच्चरितं तस्यैव मुखे सम्यग्नायातं. लोकैस्तस्य च " मासतुषमुनिरिति " नाम दत्तं, तथापि स मुनिस्तु शुभध्याने एव स्थितो ज्ञानावरणीयकर्मदलं निर्मूलीकृत्य केवलज्ञानमाप्तवान्, देवैरागत्य तस्य महोत्सवः कृतः, प्रांते स

बहुजीवान् प्रतिबोध्य स मोक्षमासादितवान्.

॥ इति श्रीभावकुलके मासतुसकेवलिदृष्टांतः ॥

मूलम्—हत्थिंपि समारूढा । रिद्धिं दठूण उसभसामिस्स ॥
तक्खण सुहझाणेणं । मरुदेवी भगवई सिद्धा ॥१०॥

व्याख्या—हस्तिस्कंधोपरि समारूढा सती श्रीऋषभदेवप्रभोः समृद्धिं दृष्ट्वा तत्क्षणं शुभध्यानेन श्रीमरुदेवा भगवती सिद्धौ गता. ॥ १० ॥

मूलम्—पडिजागरमाणीए । जंघाबलहीणमन्निआपुत्तं ॥
संपत्तकेवलाए । नमो नमो पुप्फचूलाए ॥११॥

व्याख्या—जंघाबलहीनं चरणबलरहितमेवंविधं श्रीअन्निकापुत्राचार्यंप्रति प्रतिजागरमाणायै वैयावृत्यकरणतत्परायै ततश्च संप्राप्तकेवलायै एवंविधपुष्पचूलासाध्व्यै नमो नमः ॥ ११ ॥

तत्कथा चेत्थं—

भाग २९१

☒ उत्तरमथुरादक्षिणमथुराख्ये द्वे नगर्यौ स्तः, तत्रोत्तरमथुरावास्तव्यो देवदत्तनामैको वणिक् व्यापारार्थं दक्षिणमथुरायां समागतस्तत्र जयसिंहाख्येनैकेन व्यवहारिणा सह तस्य प्रीतिर्जाता.

☒ अथ तस्य जयसिंहस्यैकाऽन्निकाभिधा कुमारिका महारूपवती भगिनी वर्त्तते. एकदा जयसिंहनिमंत्रितो देवदत्तस्तस्य गृहे भोजनार्थं समागतस्तदा जयसिंहदेवदत्तौ भोजनं कर्त्तुमुपविष्टौ, अन्निका च तयोर्भोजनद्रव्याणि परिवेषयति.

☒ अथ देवदत्तस्तामन्निकां देवांगनामिवातीवरमणीयरूपां चरणाहितमंजीरकिंकिणीनादैश्च सुप्तमपि मदनं जागरयंतीं दृष्ट्वा मकरध्वजपारवश्यं गतः सन् भोजनास्वादमपि न ज्ञातवान्. भोजनानंतरं स निजगृहे समागत्यैकं द्विजवरं जयसिंहपार्श्वे प्रेषयित्वा तां कन्यां मार्गयामास.

☒ तदा जयसिंहेनोक्तं नूनमयं देवदत्तो गुणवान् रूपवान् द्रव्यवान् सकलकलानिपुणः कन्यायोग्य एव वरोऽस्ति, परं सोऽन्यनगरवास्तव्योऽस्ति तेन तस्मै भगिनीं दातुं मे मनस्युल्लासो न भवति, चेदसौ मम गृहजामाता भवेत्तदाहं तस्मै मम भगिनीमर्पयामि. द्विजेन सर्वोऽप्ययमुदंतो देवदत्ताय निवेदितस्तदा तेनं नि-स्पृह देवदत्तेनोक्तमेकपुत्रजन्मावधि नूनमत्राहं स्थास्यामि. ततो हृष्टेन जयसिंहेन तेन सह निजपुत्री परिणायिता. एवं स देवदत्तोऽन्निकाप्रेमपरिबद्धस्तत्रैव स्थितो निजसमयं सुखेन गमयांचकार.

फूल-
कन्

⊠ एवं बहुकालानंतरं तस्य पितुर्लेखः समायातो यत् हे पुत्र आवां वृद्धौ त्वद्विरहेणात्यंतं दुःखी-भूतौ स्वः, केवलमेकवारमेवावयोर्जीवतोस्त्वद्वदनेंदुदर्शनतस्त्वमानंदोदधिमुल्लासय ? नोचेदथावां त्वद्विरहातुरावेव यमराजदासत्वमाप्स्यावः, इत्यादिकरुणारसोपेतलेखवृत्तांतं वाचयतस्तस्य देवदत्तस्य नयनाभ्यामश्रुजलबिंदवो भूमौ पतितास्तदा निकटस्थाग्निकयोक्तं हे स्वामिन् किमस्त्येवंविधं दुःखकारणं येन भवन्नेत्रे अप्यश्रुजलाविले कृते ? तदा देवदत्तेन स लेखोऽग्निकाया हस्ते समर्पितस्तयापि तं वाचयित्वा कथितं हे स्वामिन् त्वं चिंतां मा कुरु ? अहं स्वयमेव मे भ्रातरं विज्ञप्य भवदीप्सितं कार्यं करिष्यामीत्युक्त्वा सा भ्रातुः समीपे गत्वा कथयामास हे भ्रातस्त्वया विवेकिना किमयं पणबंधः कृतः ? तव जामाता निजपितृविरहेण दुःखीभवति. किंचाहमपि श्वशुरचरणदर्शनोत्कंठितास्म्यतस्त्वमावयोः प्रस्थानादेशं देहि ? एवं तया प्रतिबोधितेन जयसिंहेनापि तत्प्रतिपन्नं.

⊠ ततो देवदत्तोऽग्निकया सहोत्तरमथुरांप्रति प्रस्थितो मार्गे चाग्निकया पूर्णावधौ प्राच्या लोकबांधव इवैको महातेजस्वी पुत्रः प्रसूतस्तदा देवदत्तेन तस्याग्निकापुत्र इत्यभिधानं दत्तं. क्रमेण देवदत्तः पत्नीपुत्रयुत उत्तरमथुरायां प्राप्तश्चिरविरहातुरयोः पित्रोर्मिलितश्च, तं च प्रियापुत्रयुतं कुशलेनागतं विलोक्य पितरावपि प्रमोदमेदुरांतःकरणौ जातौ.

⊠ अथाग्निकापुत्रः क्रमेण यौवनं प्राप्तोऽधिगतसकलकलाकलापः शशांक इव पित्रोर्हृदयकुमुदं प्रमोदविकसितं चकार. एवं यौवनवनगतोऽप्यसौ सिंह इव मन्मथव्याघ्रशरव्यतां न जगाम, वैराग्यरसामृतधारासिक्तं तस्य

हृदयं केवलं मोक्षमार्गगमनोत्सुकमेव बभूव. ततस्तेनाग्रहेणापि निजपितरावापृच्छय श्रीजयसिंहाचार्यसमीपे दीक्षा गृहीता.

☒ क्रमेणासावन्निकापुत्रमुनिर्निजदृढबुद्धिवेडया सकलसिद्धांतपारावारपारं प्राप्तस्तदा गुरुणापि तं धुर्यमिव सकलगच्छभारवहनसामर्थ्ययुतं ज्ञात्वा तस्मै आचार्यपदवी दत्ता. क्रमेणासावाचार्यार्को निजपादचारी भव्यकमलवनानि विकासयन् अनादिकालमोहनिद्रागतजंतून् विनिद्रीकुर्वन्कूटदर्शनिघूकगणान् गिरिकंदरगतान् कुर्वन्ननुक्रमेण गंगातटे पुष्पभद्रपुरे समागतः.

☒ अथ तत्र नगरे पुष्पकेतुनृपस्य पुष्पवतीराज्ञ्यैकं युगलं प्रसूतमभूत्. तस्य युगलस्य च पुष्पचूलपुष्पचूला इति नाम दत्तं. यौवनं प्राप्तयोस्तयोः परस्परमतीवस्नेहत्वेन राज्ञा विवाहो विहितः, अतो दुःखिनी पुष्पवती वैराग्येण दीक्षां जग्राह, निर्मलं चारित्रं च प्रतिपाल्य सा देवोऽभूत्.

☒ अथ पुष्पकेतुराज्ञि मृते सति पुष्पचूलो नृपोऽभवत्. इतः पुष्पवतीराज्ञीजीवदेवेन निजतनयां पुष्पचूलामासन्नसिद्धिकां ज्ञात्वा तस्यै प्रतिबोधार्थं स्वप्ने नरकदुःखपीड्यमाना नारकाः प्रदर्शिताः, तत्स्वप्नदर्शनतः संभ्रांतया राज्या निजभर्तुरग्रे स वृत्तांतो निवेदितस्तदा राज्ञा तन्निमित्तं शांतिकर्म कारितं. परं द्वितीयदिनेऽपि राज्या तथैव स्वप्नो दृष्टस्तदा राजाऽनेकशास्त्रज्ञानाहूय नरकस्वरूपं पप्रच्छ. तेषु कैश्चिद्गर्भवासरूपं कैश्चिच्च दारिद्र्यरूपं कैश्चिच्च बंधनरूपं प्रोक्तं परं पुष्पवत्या स्वप्नदृष्टं नरकस्वरूपं कथयितुं कोऽपि शक्तो न बभूव.

☒ तदा राजान्निकापुत्राचार्यमाहूय नरकस्वरूपं पृष्टवान्. तदा गुरुणा तद्यथास्थितं नरकस्वरूपं निवे-

दितं. तत् श्रुत्वा चमत्कृता पुष्पचूलोवाच हे भगवन् युष्माभिस्तत्स्वरूपं कथं ज्ञातं ? गुरुभिरुक्तं श्रुतज्ञानेन तत्सर्वमपि ज्ञायते. तदा राज्ञ्या पुनः पृष्टं हे भगवन्नेवंविधं नरकदुःखं केन कर्मणा प्राप्यते ? गुरुभिरुक्तं महापरिग्रहपंचेंद्रियवधमांसाहारादिभिर्महापापैः प्राणी पूर्वोक्तं नरकदुःखं प्राप्नोति.

☒ तत् श्रुत्वा राज्ञ्या तानि पापस्थानानि परित्यक्तानि, कतिचिद्दिवसानंतरं तया पुनः स्वप्ने स्वर्गसौख्यानि दृष्टानि. तदा राज्ञा पृष्टाः पाखंडिनः पूर्ववदेवासमंजसोत्तराणि ददुस्ततोऽसंतुष्टया राज्ञ्या पुनराचार्याः पृष्टास्तैर्दत्तं च यथास्थितोत्तरं श्रुत्वाऽतीवहृष्टा राज्ञी पप्रच्छ हे भगवन् तानि स्वर्गसुखानि कथं प्राप्यंते ? गुरुणोक्तं सम्यक्त्वयुतशुद्धचारित्रदेशविरतिपालनेन तानि सुखानि लभ्यंते.

☒ तत् श्रुत्वा वैराग्यमापन्ना राज्ञी नृपंप्रति कथयामास हे स्वामिन्नस्माद्विविधदुःखकल्लोलोच्छलितसंसारसागराद्भीताहं संयमप्रवहणं स्वीकर्त्तुमिच्छामि, ततो मामाज्ञां प्रदेहि ? राज्ञोक्तं यद्यस्मिन्नेव नगरे स्थिता त्वं मद्गृहादाहारादिग्रहणं स्वीकरोषि तर्ह्येव तुभ्यमहं दीक्षाग्रहणादेशं दास्यामि. पुष्पचूलयापि तत्प्रतिपद्य दीक्षां गृहीत्वा तत्रैव नगरे स्थितिः कृता.

☒ अथ कालांतरे वृद्धभावतोऽन्निकापुत्राचार्यस्य जंघाद्वयं बलहीनं जातं, ततोऽसावपि तत्रैव नगरे स्थितिः कृता. इत आचार्येणागामिकवर्षे दुर्भिक्षयुतं विज्ञाय निजशिष्याः परदेशे प्रेषिताः, वैयावृत्त्यार्थं रक्षितानामपि

गाथ २३२.

शिष्याणां दैवयोगेनाऽभावो जातस्तदा पुष्पचूला साध्वी तस्य वैयावृत्यं करोति. शुद्धभावेन निर्जरापेक्षया सा शुद्धान्नपानीयौषधादीन्यानीय गुरुभ्यः समर्पयति. क्रमेण शुभभावनया साऽशुभकर्माणि छेदयित्वा शुक्लध्याना- धिरूढा केवलज्ञानमाससाद.

अथ तत्केवलज्ञानबलेन सा गुरुचित्तचिंतितमाहारादि तमनापृच्छ्यैव समानयामास. तदा गुरुभिरुक्तं त्वं मया चिंतितमेवाहारं कथं समानयसि? तदा तया गुरुवैयावृत्त्यांतरायभयादुक्तं हे भगवन् समीपस्थाहं भवतां स्वभावं जानामि.

अथैकदा वर्षति मेघे तयाहारः समानीय गुरुभ्यो दत्तस्तदा गुरुणोक्तं हे महाभागे! केवलं मेघे वर्षति कथमाहारं समानयसि? अहं कारणविशेषेणैव एवाहं साध्वीसमानीताहारं स्वीकरोमि, तत्रापि त्वं मेघे वर्षति कथमाहारं समानयसि? तत् श्रुत्वा साध्व्योक्तं हे भगवन् यूयं खेदं चरणायुरोगेण पलहीनोऽस्मि, परं क्षुधापरीषहसहनेऽहं समर्थोऽस्मि. तत् श्रुत्वा साध्व्योक्तं हे भगवन् यूयं खेदं मा कुरुत? पथि यत्र यत्राचित्तकायवृष्टिर्बभूव तत्र तत्रैवाहारार्थं गतया मया गमनागमनं विहितमस्ति. गुरुणोक्तं किं तव केवलज्ञानमस्ति? यद्देवं वृषे? तयोक्तं भवत्प्रसादात्तदेव ममास्ति.

तत् श्रुत्वा विस्मितेन गुरुणा "हा मया केवल्याशातना कृता" इत्युच्चरता सा क्षामिता, पृष्टं च मम केवलज्ञानं भविष्यति न वा? तयोक्तं यूयं चिंतां मा कुरुत? युष्माकमपि गंगातटे केवलज्ञानमुत्पत्स्यते

मोक्षलक्ष्मीर्वरिष्यति. तत् श्रुत्वा गुरुणोक्तं तर्ह्यधुनैवाहं गंगां समुत्तरिष्यामीत्युक्त्वा स गंगातटे समागत्य नौमध्ये स्थितो नौरपि गंगाजले प्रस्थिता.

☒ अथ पूर्वभववैरिदेवकृतप्रयोगतो नौमध्ये यत्र यत्र पार्श्वेऽन्निकापुत्राचार्य उपविशति तत्र तत्र नदीजलमंतः समायाति ततश्च नौर्मज्जनपरा भवति, तदाऽनार्यनाविकैः स सूरिरुत्पाट्य नदीजलमध्ये क्षिप्तो धृतश्च वैरिदेवेन स शूलिकोपरि. शूलिविद्धाचार्यश्चिंतयति धिग्मां यन्मम रुधिरैरप्कायविराधना जायते, एवं शुभभावनां भावयन् सूरिरंतकृत्केवलित्वमासाद्य मोक्षे गतस्तदा देवैस्तत्रागत्य महोत्सवः कृतस्तत्र च प्रयागाभिधानं तीर्थं प्रवर्त्तितं, गंगाया अपि च माहात्म्यं वर्द्धितं.

☒ सूरिमस्तकास्थि गंगाप्रवाहेणाकृष्यमाणं दूरतस्तटोपरि पतितं, वायुयोगेन च तस्मिन् पाटलबीजं मिलितं, तस्माच्च पाटलतरुरुत्पन्नः, सुसंगतिना तत्पाटलमूलजीवश्चैकावतारी जातः, कोणिकपुत्रोदायिराज्ञा च तत्र पाटलीपुत्रनगरं स्थापितमिति.

॥ इति श्रीभावकुलकेऽन्निकाचार्यपुष्पचूला कथा ॥

मूलम्—पनरसयतावसाणं । गोयमनामेण दिन्नदिक्खाणं ॥
उपन्नकेवलनाणं । सुहभावाणं नमो ताणं ॥१२॥

व्याख्या—कोडिन्नदिन्नसेवालप्रमुखपंचदशतापसानां श्रीगौतमस्वामिना दीक्षितानां केवलज्ञानं समुत्पन्नं, एवंविधेभ्यः शुभभावेभ्यस्तेभ्यो नमोऽस्तु. ॥ १२ ॥

तेषां तापसानां कथा पूर्वमुक्तैव.

मूलम्—जीवस्स सरीराओ । भेयं नाउं समाहिपत्ताणं ॥
उप्पाडियनाणाणं । खंदकसीसाण तेसि नमो ॥१३॥

व्याख्या—जीवस्य शरीराद्भेदमंतरं ज्ञात्वा समाधिप्राप्तानां शुभभावनां भावयतां सतां येषां स्कंदकाचार्यशिष्याणां केवलज्ञानं समुत्पन्नं, तेभ्यः श्रीस्कंदकाचार्यशिष्येभ्यो नमः ॥ १३ ॥

तेषां कथा चेत्थं—

☒ श्रावस्त्यां नगर्यां जितशत्रुनामा राजा बभूव, तस्य धारिणीराज्ञीकुक्ष्युद्भवः स्कंदकनामा कुमार आसीत्, पुरंदरयशाभिधाना च पुत्र्यभवत्. सा पुत्री कुंभकारनगराधीशदंडकाग्निनामभूपेन सह राज्ञा परिणायिता, जाता च सा तस्य पट्टराज्ञी.

☒ अथैकदा दंडकाग्निनृपस्य पालकनामा पुरोहितः स्वस्वामिकार्यार्थं श्रावस्त्यां समागतः, स च महा-

मिथ्यात्वी जैनधर्मद्वेषी चाऽभव्योऽभूत्.

⊠ एकदा राजसभामध्ये धर्मगोष्टिर्जाता, तदा तेन दुष्टेन पालकेन जिनधर्मनिंदा कृता, तत् श्रुत्वा हृदि खिन्नेन स्कंदककुमारेण स पालको दयामूलजिनधर्मस्थापनपूर्वकं युक्त्या निरुत्तरीकृतस्तदा हृदयस्थद्वेषभावोऽपि स पालको मुखेन कुमारयुक्त्यादिप्रशंसां कृतवान्. ततो निवृत्तकार्यः स पालको निजकुंभकारनगरे प्रयातः.

⊠ इतो जगज्जनाज्ञानांधकारपटलानि दूरीकुर्वन् भव्याभोजराजिं विकसितां कुर्वन् कुमतान्यदर्शनितारकगणान् विलोपयन् केवलज्ञानकिरणनिकरैर्भव्यहृदालवालसमुद्भूतसम्यक्त्वांकुरान् वर्द्धयन् जिनधर्मद्वेषिजनघूकान् घनं संतापयन् श्रीमुनिसुव्रतस्वामितीर्थंकरभानुर्विहरन् सन्ननुक्रमेण श्रावस्त्यां समागतस्तदा जितशत्रुराजा स्कंदकादिपुत्रपरिवारयुतः प्रभुं वंदितुं समायातः, तत्र प्रभोर्धर्मदेशनां श्रुत्वा बहुजनाः प्रतिबोधं प्राप्ताः, स्कंदकुमारोऽपि वैराग्येण पितरावापृच्छ्य पंचशतसाधूनामाचार्यः कृतः

⊠ अथैकदा श्रीस्कंदकाचार्येण मुनिसुव्रतस्वामिनः पृष्टाः स्वामिन् भवदाज्ञा चेत्तर्ह्यहं निजभगिनीपतिं प्रतिबोधयितुं गच्छामि, तत् श्रुत्वा प्रभुणा न जल्पितं, तदा तेन पुनस्तथैवोक्तं तथापि प्रभुर्नोवाच, तदा पुनस्तेन तृतीयवारमपि तथैवोक्तं तदा स्वामिना कथितं तत्र तव प्राणांतकृदुपसर्गो भविष्यति.

⊠ स्कंदकाचार्येणोक्तं हे स्वामिन् तस्मिन्नुपसर्गे वयमाराधका भविष्यामो वा विराधका भविष्यामः?

प्रभुणोक्तं त्वां विहाय सर्वेऽप्याराधका भविष्यंति, तदा तेनोक्तं यदि सर्वेऽप्याराधका भविष्यंति, तर्हि मम न कोऽपि विशेषः, अहं च भवांतरे मोक्षं गमिष्यामीत्युक्त्वा भगवंतं च नमस्कृत्य स निजपरिवारयुतस्ततः प्रस्थितः, क्रमेण च कुंभकारनगरसमीपे समागतः, एवं तं तत्र समागच्छंतं विज्ञाय दुष्टपालकपुरोहितेन चिंतितमद्य मम वैरिणः स्कंदककुमारस्य वैरफलं दर्शयिष्यामीति विचिंत्य तेनाधमेनोपाश्रयमध्ये भूम्यंतः प्रच्छन्नतया शस्त्राणि क्षिप्तानि. ततः प्रभाते- गुरवस्तत्र समागतास्तदा हृष्टो राजा राज्ञीयुतो गुरुं वंदितुं ययौ.

⊠ गुरोरमृतधारातुल्यां देशनां श्रुत्वानंदितो राजा स्वगृहे समागत्य तस्य गुणान् वर्णयामास. तदा महाक्रूरेण पालकेन कथितं हे स्वामिन्नस्य स्वरूपं यूयं न जानीथ, मया सर्वमपि तच्चेष्टितं ज्ञातमस्ति. तत् श्रुत्वा संभ्रांतेन राज्ञोक्तं त्वया तेषां किं स्वरूपं ज्ञातमस्ति? तेनोक्तं स्वामिन्नयं यौवने खड्गधारातीव्रव्रतपालनात्खिन्नस्तव राज्यं गृहितुमत्र समागतोऽस्ति. तेन सहैते पंचशतशिष्या अपि महासुभटाः संति, स च त्वां विश्वास्य मारयिष्यति, तदा राज्ञोक्तं तेषां पार्श्वे धर्मोपकरणानि विहायान्यत् किमपि शस्त्रादिकं नास्ति. तदा पुरोहितेनोक्तं यदि मम विश्वासो न तर्हि यत्र स्थानके ते पाखंडिनः समुत्तीर्णाः संति, तां भूमिकां प्रच्छन्नं खानयित्वा त्वं विलोकय? तत् श्रुत्वा विस्मितो राजा तत्कार्यार्थं निजचरांस्तत्र रात्रौ प्रेषयामास.

⊠ तैस्तत्र गत्वा भूमिः खनिता, तन्मध्याच्च शस्त्राणि निष्कास्य तै राज्ञोऽग्रे मुक्तानि. तदवसरे मुनयः सर्वेऽपि ध्यानस्थिता न किंचिदप्यवदन्. शस्त्राणि दृष्ट्वा क्रुद्धेन राज्ञा कथितं ध्रुवमेते दुरात्मानः साधु-

रूपाः पिशाचाः संति, अतो हे पालक मयैते तुभ्यं समर्पिताः. यत्ते राचते तत्तेषां कुरु ! एवंविधं राज्ञ आदेश-मासाद्य स दुष्टः पालको नगराद्वहिरेकं घाणकं मंडयामास, साधूंश्च सर्वान् गृहीत्वा तन्मध्येऽनुक्रमेण क्षेपयामास.

☒ तदा तेन स्कंदकाचार्यप्रत्युक्तं हे स्कंदक त्वया तदा सभासमक्षं यो मम मानभंगो विहितस्तस्य फलं त्वं पश्य ! तदाचार्येण तीर्थंकरवचनं स्मृत्वा शिष्येभ्य आराधनां कारयितुं प्रारब्धं ते सर्वेऽपि घाणके निक्षिप्ताः समाधियुता अंतकृत्केवलित्वमासाद्य मोक्षे गताः, प्रांते शिष्यमेकं बालक्षुल्लकं यदा स घाणके क्षेप्तुं लग्नस्तदा मोहनीयकर्मोदयतः स्कंदकाचार्येणोक्तं प्रथमं त्वं मां निपीलय ! परं दुष्टेन पालकेन तन्नांगीकृतं, किंतु द्रुतमेव तं क्षुल्लकमुत्पाट्य स पीलयामास, तदा स क्षुल्लकोऽप्यंतकृत्केवलित्वेन सिद्धिं गतः

☒ अथ क्रोधानलज्वलितेन स्कंदकाचार्येण स्वपीलनावसरे निदानं कृतं यत्पालकयुतैतद्देशनगरराज्यादि-ज्वालकोऽहं भवामीति निदानपूर्वकं मृत्वा सोऽग्निकुमारेषु देवो जातः, इतः प्रभातो जातस्तदा गृध्रप्रमुखा जीवा मांसार्थिनस्तत्र भ्रमयामासुस्तेष्वेकेन गृध्रेणोत्पाटितं रक्तलिप्तहस्तभ्रांत्या रुधिरलिप्तं स्कंदकाचार्यरजोहरणमक-स्माद्राजभवनांगणे तस्य चंचुपुटात्पतित.

☒ अथ तस्मिन्नवसरे पुरंदरयशाराज्ञी निजभ्रातुर्वंदनार्थं गमनोत्सुकांगणे यावत्समायाता तावत्तद्रजो-हरणं तत्र पतितं दृष्ट्वा सखेदाश्चर्यं प्राप्ता मती विचारयामास यदिदं नूनं मया दत्तरत्नकंबलवेष्टितं मम भ्रातुरेव रजोहरणमस्ति. तद्रुधिरभृतं कुत अत्रागत्य पतितं ? शुद्धिकरणानंतरं हृदयस्फोटकं तं वृत्तांतं ज्ञात्वा

सा मूर्च्छिता, सखीभिः शीतलजलवायुना सचेतनीकृता च विविधविलापान् कर्त्तुं लग्ना. इतस्तत्रागतं राजानंप्रति सा कथयामास रे मूढ त्वया नीचपालकद्विजवचनतः किमेतदकार्यं कृतं ? नूनं त्वया ज्ञातव्यं यत्तव देशस्य च निर्मूलनाशः समागतोऽस्ति.

☒ अथ परमवैराग्यं प्राप्ता पुरंदरयशा शासनदेवतयोत्पाट्य भगवत्समीपे मुक्ता, तया च दीक्षा गृहीता. अथाग्निकुमारमध्योत्पन्नेन स्कंदकसूरिजीवेनावधिना स्वनिदानं सस्मृतं, तत्कालोत्पन्नक्रोधोऽसौ तत्रागत्यांबरादग्निवृष्टिं कुर्वन् महादावानलं प्रकटीकृत्य सर्वजनपश्वादियुतं तं देशं ज्वालयामास, राजादिसर्वलोका भस्मीभूताः, पालकोऽपि मृत्वा सप्तमनरकं गतस्ततस्तद्देशाटव्या दंडकारण्यमित्यभिधानं जातं, यत्राद्यापि तृणमात्रमपि न प्ररोहति.

॥ इति श्रीभावनाकुलके स्कंदकसूरिशिष्यकथा ॥

मूलम्—सिरिवद्धमाणपाए । पूअंती सिंदुवारकुसुमेहिं ॥
भावेणं सुरलोए । दुग्गयनारी सुहं पत्ता ॥१४॥

व्याख्या—श्रीवर्द्धमानचरणौ सिंदुवारकुसुमैर्भावेन पूजयंती दुर्गतानारी सुरलोके देवलोके सुखं प्राप्ता ॥ १४ ॥

तस्याः कथा चेत्थं—

☒ एकदा श्रीईक्ष्वाकुवंशमुक्ताफलोपमः केवलज्ञानविराजमानश्चतुर्दशसहस्रसाधुपट्त्रिंशत्सहस्रसाध्वीभिश्चपरि-

वृतोऽनेकवृंदारकवृंदैर्वंदितपादपद्मः श्रीमहावीरप्रभुर्विहरन् सन् काकंदीनगर्यां समवसृतस्तदा प्रभुपूजार्थं पुष्पादिपूजोपकरणसहिताननेकजनांस्तत्र गच्छतो दृष्ट्वैकया जन्मदरिद्रिण्या स्त्रिया जनैकः पृष्टो यदिमे जना क्व व्रजंतीति, तदा तेन पुरुषेणोक्तं जन्मजरामरणरोगशोकदुःखदारिद्र्याद्यनेकविधसंसारतापोपशमनैकचंद्रतुल्यं श्रीमहावीरप्रभुं पूजयितुमेते जना व्रजंति. तत् श्रुत्वाऽऽसन्नसिद्धिकया तया निजमनसि चिंतितं यदहमपि श्रीवीरप्रभुं पूजयिष्यामीति विचिंत्य साऽरण्यसुलभानि सिंदुवारकुसुमानि गृहीत्वा हर्षप्रफुल्लहृदया निजजीवितं च सफलं मन्यमाना समवसरणसमीपे समागता.

⊠ तदातिवृद्धत्वेन क्षीणे चायुषि तदैव तत्रैव स्थाने मृत्वा सा देवत्वं प्राप्ता. तदा तत्कलेवरं दृष्ट्वा सदया लोकास्तां मूर्छितां मत्वा शीतलपानीयैः सिंचयामासुः परमभव्यो बोधिबीजमिव सा चैतन्यं न प्राप्ता.

⊠ तदा लोकैः श्रीवीरप्रभुः पृष्टो हे भगवन् किमियं वृद्धा जीवति वा मृता? प्रभुणोक्तं वृद्धेयं मृत्वा देवत्वं प्राप्तास्ति. इतोऽसौ देवोऽवधिज्ञानेन श्रीवीरप्रभुं तत्र समवसृतं विज्ञाय वंदितुं समागतस्तदा पुनर्भगवतोक्तं भो लोकाः स एवैष देवोऽत्र समागतोऽस्ति.

⊠ तदा विस्मितैर्लोकैः पुनः पृष्टं हे भगवन् पूजामनोरथमात्रेणैव जीव किं देवत्वं प्राप्नोति? तदा प्रभुणोक्तं शुभध्यानवशेन जीवस्तीर्थंकरादिमहापदवीमपि प्राप्नोति, तदा देवत्वस्य तु का वार्ता? तदा पुनर्लोकैः

पृष्टं हे भगवन् तर्हि किमयं जीवो मोक्षेऽपि प्रयास्यति ? प्रभुणोक्तं इतो देवभवाच्च्युत्वायं जीवः कनकपुरे कनकध्वजाभिधो राजा भविष्यति. तत्र बहुकाल राज्यं पालयन् सन्नेकदा सोऽश्वक्रीडार्थं वनमध्ये यास्यति. ☒ तत्राग्रतस्तलस्थोऽयं दर्दुरं ग्रसंतं सर्पमेकं विलोकयिष्यति, तं सर्पमप्येकेन महासर्पेण तं महासर्पमप्येकेनाजगरेण ग्रस्यमानं दृष्टीगोचरीकरिष्यति. तदोत्पन्नवैराग्योऽयं गृहमागत्य निजपुत्राय च राज्यं दत्वा चारित्रमंगीकरिष्यति. क्रमेण विहरन् सन् सोऽयोध्यानगर्यां शक्रावतारतीर्थे कर्मक्षयं कृत्वा मोक्षे गमिष्यतीति श्रुत्वा सर्वेऽपि लोका आनंदिताः स्वस्वस्थानके गताः, प्रभुरप्यन्यत्र विजहार.

॥ इति श्रीभावकुलके दुर्गतानारीकथा ॥

मूलम्—भावेण भुवणनाहं । वंदिउं दद्दुरोवि संचलिउ ॥
मरिऊण अंतराले । नियनामंको सुरो जाउ ॥१५॥

व्याख्या—भावेन कृत्वा भुवननाथं श्रीमहावीरप्रभुं वंदितुं चलितो दर्दुरोऽप्यंतराले मृत्वा निजनामांकित एव दर्दुरांकाभिध एव देवो जातः ॥ १५ ॥

तस्य कथा चेत्थं—

⊠ कोशांब्यां नगर्यां शतानीकाभिधो राजा बभूव, तत्र चैको महादरिद्री सेडुकनामा द्विजोऽवसत्, स निर्बुद्धित्वेन द्रव्यरहितो महादुःखेन निजसमयं गमयति.

⊠ अथैकदा तस्य गर्भिण्या भार्ययोक्तं मम प्रसवसमयो निकटे वर्त्ततेऽतस्त्वं घृतगुड़गोधूमादि समानय ? तेनोक्तं विना द्रव्येणाहं तद्वस्तूनि कुतः समानयामि ? भार्ययोक्तं त्वं राज्ञः सेवां कुरु ? येन तुष्टो राजा तुभ्यं द्रव्यं दास्यति. एवं भार्यया प्रेरितोऽसौ नित्यं फलपुष्पादिभिर्नृपं सेवते.

⊠ अथैकदा चंपानगरीस्वामी दधिवाहननृपः सैन्यं गृहीत्वा कौशांबीं परिवेष्ट्य स्थितः, परं कौशांबीवप्रं गृहितुं स न समर्थो बभूव. इतो वर्षाकाले समागते सति दधिवाहनो रात्रावेव पश्चाद्वलित.

⊠ अथ सूर्योदयादर्वाक् स सेडुको यदा पुष्पग्रहणाय नगराद्बहिर्वाटिकायां गतस्तदा तेन दधिवाहन-सैन्यं ततो निर्गतं विज्ञाय द्रुतं शतानीकपार्श्वे गत्वा तद्वृत्तांतो निवेदितस्तदैव शतानीकेन तस्य पृष्टे गत्वा तस्य हस्त्यश्वादयो गृहीतास्ततो निवृत्त्य शतानीकेन सेडुकायोक्तं त्वं यथेप्सितं मार्गय ? तेनोक्तं स्वामिन्नहं मम भार्यामापृच्छ्य मार्गयिष्यामीत्युक्त्वा स द्रुतं निजगृहे भार्यासमीपे समागतः, कथितश्च तेन तस्यै सर्वोऽपि वृत्तांतस्तदा भार्यया चिंतितं चेद् बहु द्रव्यं गृहे समागमिष्यति तर्हि नूनमयं द्वितीयां भार्यां करिष्यति, ततो यथा सुखेनाजीविका भवेत्तथैवाहं करोमीति विचार्य तयोक्तं हे स्वामिन् त्वया नृपाग्रे नगरमध्ये प्रतिदिनं दीना-

रैकार्पणमहितं गृहे गृहे भोजनं मार्गणीयं. ततोऽसौ नृपसमीपे गत्वा तथा मार्गयामास, नृपेणापि तत्कथनानुसारिणी नगरमध्ये उद्घोषणा कारिता.

☒ अथ स सेडुकः प्रतिदिनं तथैव करोति, अनुक्रमेण यथा तस्य पुत्रपौत्रादिपरिवारो वर्द्धितस्तथा तथा तस्य लोभोऽपि वर्द्धितस्तेनासौ भूरिदीनारार्थी सन्नेकस्मिन्नेव दिने वमनपूर्वकमनेकगृहेषु भोजनं करोति. एवं कुर्वन्नसौ कतिचिद्दिवसानंतरं दुष्टरोगाभिभूतो जज्ञे तं कुष्टिनं विज्ञायैकदा मंत्रिणा राज्ञे प्रोक्तं स्वामिन्नस्य कुष्टिद्विजस्य सभामध्यागमनयुक्तमस्ति, तदा राज्ञा तं निष्कास्य तस्य स्थाने तत्पुत्रः स्थापितः.

☒ अथ गृहागतोऽसौ सेडुकद्विजः पुत्रैर्गृहादपि निष्कासितः सन् शून्यैकगृहे स्थितस्तत्र काष्टभाजनमध्ये तिरस्कारपूर्वकं तस्मै पुत्रैर्भोजनं दीयते, एवं वातुलकुक्कुर इव तिरस्कृतोऽसौ चिंतयति ममैते पुत्रा मयोपार्जितां लक्ष्मीं भुंजंति मां च तिरस्कुर्वंति, ततोऽहं तान् सर्वानपि कुष्टिनः करिष्यामीति विचित्य तेन पुत्रेभ्यः कथितं हे पुत्रा यूयमस्मत्कुलाचारं शृणुत ? अजमेकमानीय मंत्रैश्च तं पूतीकृत्य कुलदेवतायै च प्रकल्प्य तन्मांसं सर्वकुटुम्बिभिर्भक्षणीयं येन कुलदेव्याः संतोषो भवेत्. तत् श्रुत्वा तैरेक अजो मूल्येन समानीय मंत्रपूतीकरणाय सेडुकाय समर्पितः, सेडुकः प्रच्छन्नं तमजं निजकुष्टरुधिरादिमिश्रितभोजनं सर्वदा भोजयामास.

☒ एवं कतिचिद्दिवसानंतरं नियमितदिवसे कुटुम्बिभिस्तमजं व्यापाद्य तन्मांसं भक्षितं. ततः सेडुकस्तीर्थयात्राकृते ततो निर्गतः, पश्चादनुक्रमेण तस्य सर्वमपि कुटुम्बं कुष्टरोगाभिभूतं जातं.

☒ अथ स सेडुको भ्रमन् संस्तृषातुरः क्रमेणैकमहाटव्यां संप्राप्तस्तत्र गिरिनिर्झरपानीयभृतैकावटस्तेन दृष्टस्तत्र विविधौषधीमूलरसमिश्रितं जलं मिलितमभूत्. तृषातुरेण सेडुकेन तत्पीतं, औषधीरसमाहात्म्याच्च तस्य कुष्टरोगो गतो जातं च मनोहरं शरीरं, तदा स हृष्टः सन् निजगृहंप्रति चचाल. क्रमेण कौशांब्यामागतस्तदा लोकास्तं पृच्छंति हे सेडुक तव शरीरं कथं गतरोगं बभूव ? तेनोक्तं देवाराधनेन मे रोगो गतः, ततस्तेन गृहमागत्य पुत्रादिभ्यः प्रोक्तं किं दृष्टं युष्माभिर्ममावज्ञाफलं ? पुत्रैरुक्तं हे तात कुटुंबिनामुपरि युष्माभिः कथं विश्वासघातः कृतः ? एवं पुत्रपौरादिभिर्निंदितोऽसौ नगरप्रतोल्यां समागतः. इतस्तत्र श्री महावीरप्रभुः समवसृतस्तदा द्वारपालेनोक्तं हे सेडुक त्वमत्र मम स्थाने क्षणं तिष्ट ? अहं श्रीवीरप्रभुं वंदित्वा द्रुतमेवागच्छामीत्युक्त्वा स गतः.

☒ अथ क्षुत्तृपातुरेण सेडुकद्विजेन तत्र समीपवर्त्तिदुर्गादेवीस्थाने लोकैर्ढौकितानि वटप्रमुखद्रव्याणि भक्षितानि, ग्रीष्ममध्याह्नकालयोगेन च स भृशं तृषातुरो जातो मनसि च वापीकूपतडागादीनि ध्यायति, परं प्रतोलीं निर्जनां मुक्त्वा स कुत्रापि गंतुं समर्थो नो भवति, एवं तज्जलध्यानपरोऽसौ मृत्वा राजगृहनगरे वापिकायां गर्भजसंज्ञिपचेंद्रियदर्दुरत्वेन समुत्पन्नः.

☒ अथ प्रभुरपि ततो विहरन् राजगृहे समवसृतस्तदा जलाहरणार्थमागतानां परस्परं वार्त्तालापं कुर्वतीनां पौरस्त्रीणां मुखेभ्यः श्रीमहावीरप्रभोस्तत्रागमनं श्रुत्वा तस्य दर्दुरस्य जातिस्मरणज्ञानं समुत्पन्नं, ततश्चिंतितं

तेन यद् द्वारपालो मां प्रतोल्यां मुक्त्वा यं श्रीमहावीरं वंदितुं गतोऽभूत् स एव जगज्जंतूनां संसारसागरतः समुद्धरणक्षमः श्रीवीरप्रभुरत्र समवसृतः संभवति, मया च यदि तस्मिन्मनुष्यभवे धर्मो न कृतस्तेनैवाहं नूनं तिर्यग्भवे समागतोऽस्मि. अतोऽद्यैव श्रीवीरप्रभुं वंदिष्यामीति विमृश्य स प्रभुवंदनमनोरथयुतो वाप्या बहिर्निर्गत्य समवसरणे गमनोत्सुकः पथि गच्छति. इतः श्रेणिकराजापि प्रभुवंदनाय निजपरिवारयुतः समायाति, तदा नृपाश्वपादतले समागतोऽसौ दर्दुरो मृत्वा शुभभावनया प्रथमदेवलोके दर्दुरांकनामा देवो जातस्तत्रेंद्रेण सभायां श्रेणिकसम्यक्त्वप्रशंसाकृता, तत्परीक्षार्थं स दर्दुरांकदेवोऽवधिना प्रभुं राजगृहोद्याने समवसृतं विज्ञाय द्रुतं तत्रागत्य प्रभुं च वंदित्वा प्रभोः शरीरं चंदनादिद्रव्येण विलेपयति.

☒ श्रेणिकस्तु देवमायातस्तं कुष्टिनं कुष्टरसैः प्रभुशरीरं च विलेपयंतं पश्यति. तदा क्रुद्धेन श्रेणिकेन तस्य ग्रहणार्थं निजसेवकानां संज्ञा कृता. इतः प्रभुणा च्छिक्कृतं तदा तेन देवेनोक्तं त्वं म्रियस्व? तदैव श्रेणिकेन छिक्कृतं तदा तेनोक्तं त्वं चिरं जीव? अभयकुमारस्य च्छिक्कृत्यनंतरं तेनोक्तं म्रियस्व वा जीव? ततो यदा कालकसूकरिकेण च्छिक्कृतं तदा तेनोक्तं त्वं मा म्रियस्व मा च जीव?

☒ अथ भगवतो मरणकथनेन श्रेणिकस्तस्योपर्यत्यतं कुपितः, इतो देशनांते स यावदुत्थितस्तावत् श्रेणिककृतसंज्ञातस्तलारक्षास्तं गृहीतुं समायाताः, इतोऽसौ गगनमार्गे समुत्पतितस्तदा विस्मितेन श्रेणिकेनोक्तं हे भगवन् किमेतदाश्चर्यं? भगवता तस्य दर्दुरांकदेवस्य सकलं स्वरूपं निवेद्योक्तमयं हि देवस्तवेंद्रप्रशंसितसम्यक्त्व-

परीक्षार्थमत्रागतोऽभूत्, किं च स कुष्ठ्यपि नाभूत्, तथैव तेन मम शरीरमपि चंदनादिना लिप्तमासीत्, तत्कृतदेवमायात एव त्वयैवं दृष्टं. पुनर्मांप्रति तेन यन्म्रियस्वेति कथितं तन्मे मोक्षापेक्षया कथितं त्वांप्रति जीवेति तव भविष्यन्नरकदुःखापेक्षया कथितं. अभयकुमारंप्रति म्रियस्व वा जीवेति यत्कथितं तदत्राभयकुमारो बहुलोकोपकारान् करोति, मृतश्चासौ पंचमेऽनुत्तरविमाने गमिष्यतीत्यपेक्षया कथितं. कालकसूकरिकंप्रति यत्तेन मा म्रियस्व मा च जीवेति यदुक्तं तदत्रस्थोऽयं बहुजीवहिंसां करोति मृतश्चासौ दुर्गतिं यास्यतीत्यपेक्षया कथितं.

☒ तत् श्रुत्वा विषएणेन श्रेणिकेनोक्तं हे स्वामिन् मम भवादृशाः स्वामिनस्तर्हि मे दुर्गतिगमनं कथं? भगवतोक्तं हे राजन् त्वया सम्यक्त्वोपार्जनादर्वागेव नरकायुर्बद्धमस्ति. तदा पुनर्नृपेणोक्तं हे स्वामिन् मम तद्दुर्गतिनिवारणं कथं भवेत्? प्रभुणोक्तं यदि त्वं कपिलादास्या हस्तेन दानं दापयेस्तथैव कालकसूकरिकं जीवहिंसातः संरक्षयेस्तदैव ते नरकगत्युच्छेदो भवेत्.

☒ तत् श्रुत्वा श्रेणिकः प्रभुं वंदित्वा गृहंप्रति समागत्य कपिलायै कथयामास हे कपिले त्वं दानं देहि? तयोक्तं हे राजन्! मरणं श्रेयः परमहं दानं नैव दास्यामि. राज्ञानेके उपायाः कृताः परं तया दान नैव दत्तं. ततो राज्ञा कालकसूकरिकमाहूय कथितं त्वं हिंसां मा कुरु? तथापि तेन तन्न स्वीकृतं, तदा राज्ञासौ बद्धहस्तपादः कूपमध्ये रक्षितस्तत्रस्थोऽपि स मनसा जीवान्मारयति.

☒ अथ श्रेणिकेन प्रभोः समीपे समागत्योक्तं हे स्वामिन् कालकसूकरिको मया जीवहिंसातो रक्षि-

तोऽस्ति. प्रभुणोक्तं हे राजन् स कूपमध्यस्थितो मनसापि पंचशतमहिषवधकरणरूपां जीवहिंसां करोति.

⊠ तदा खिन्नेन श्रेणिकेनोक्तं हे स्वामिन् तर्हि किं मम नरकगमननिवारणोपायः कश्चिदपि नास्ति ? प्रभुणोक्तं हे राजन् त्वं खेदं मा कुरु ? भविष्यचतुर्विंशत्यां त्वं मादृश एव प्रथमतीर्थंकरो भविष्यसि, तत् श्रुत्वा संतुष्टो नृपो निजस्थाने जगाम, प्रभुरप्यन्यत्र विजहार.

॥ इति श्रीभावकुलके दर्दुरांकदेवकथा ॥

मूलम्—विरयाविरयसहोअर । उदगस्स भरेण भरियसरियाए ॥
भणियाए सावियाए । दिन्नो मग्गुत्ति भाववसा ॥१६॥

व्याख्या—विरताऽविरतौ द्वौ भ्रातरौ: तयोरेको भ्राता मुनिर्द्वितीयश्च श्रावकस्तौ द्वावप्युद्दिश्य श्राविकाभिर्भणितया उदकपूरेण भरितयापि नद्या भाववशान्मार्गो दत्त ईति गाथार्थः ॥ १६ ॥

भावार्थस्तु कथानकगम्यः स चेत्थं—

⊠ जयपुरनगरे सूराभिधो राजा बभूव, तस्य लघुभ्राता च सोमो युवराजपदवीं भुनक्ति.

⊠ अथैकदा तत्र श्रीसुव्रताचार्यः समागतास्तदा राजा युवराजादिपरिवारयुतो महोत्सवपूर्वकं तत्र वंदि-

तुं गतः, गुरून् च नमस्कृत्य तेन भवभयविनाशिनीति देशना श्रुता. भो भव्या इह क्रोधोग्रदावानलभस्मी-
भूतक्षमारण्ये मानमहोत्तुंगगिरिखर्वितमार्दवसरित्प्रवाहे मायाविषवल्लीमालाच्छादितसरलतालतामंडपे लोभोच्छलितोदधि
वेलाप्लावितौदार्यकल्पतरुनिकुरंबके संसारे कपटपाटवोपेतमोहलुंटाकलुंटितात्मभावधना घना जनाः क्वापि निवृत्तिस्था-
नमलभमाना महादुःखदारिद्र्योपेतावस्थायां स्थिता अनादिकालोद्भूताऽज्ञानतमसांधीभूयेतस्ततो भ्रमंतो घोरांधकार-
भूतनरकावटे पतंति.

☒ ततो विवेकिभिर्जनैर्निजनयनपाटवकृते सर्वदा सुगुरुधर्मोपदेशरूपांजनस्योपयोगः कर्त्तव्यो येनांजनेन
निर्मलीभूतनयना घोरावटादीन् दूरे त्यक्त्वा सारासारभावरूपमार्गं पश्यंतो सद्धर्मावलंबनेन क्षपकश्रेणिसमारूढा जना
अतिदूरस्थेऽपि मोक्षनगरे गंतुं समर्था भवंति. एवंविधं गुरुदत्तोपदेशं श्रुत्वा सोमराज्ञो मनसि वैराग्यो बभूव.

☒ तेनासौ गृहमागत्य निजवृद्धभ्रातरं सूरनृपंप्रति कथयामास हे भ्रातरिदं राज्यं तुभ्यं समर्प्य चरण-
करणनाराचदृढीभूतं चारित्रकवचं परिधाय रजोहरणमहामुद्गरेण ससारसमरांगणे संमुखीभूतं मोहमहामल्लसुभटं हत्वा-
ऽमंदानंदमंदिरं मोमुखे हस्तं दत्वा हसंत्यः संत्यश्चितयामासुर्यद्राज्ञा शीलं पालितमस्ति तत्तु सर्वं वयं जानीम
इति विचिंत्य कौतुकार्थिन्यस्ताः सर्वा रथस्थिताः पुनर्देवृवंदनार्थं चलिताः, नदीतटे गत्वा ताभिस्तथैवोक्तं,
तत्कालमेव नदीप्रवाहः पृथग्भूतस्तदा रथसहिताः सपरिवारास्ताः परतटे प्राप्ताः, तत्क्षणमेव पुनर्नदीपूरप्रवाहस्त-
थैव वहितुं लग्नः, विस्मिताभी राज्ञीभिरुपवने गत्वा देवृमुनिर्वंदितः श्रुतश्च तस्य धर्मोपदेशः, ततस्ताभिस्तत्र स्व-

भोजनकृते मनोहररसवती निष्पादिता प्रतिलाभितश्च भक्त्याहारादिना स मुनिः, ततः संध्यायां गृहगमनोत्सुकास्ताः परस्परं वार्त्तयितुं लग्ना यदथ वयं किं पश्चाद्वलमानास्तदेव वाक्यं कथयिष्यामः किं वान्यत् ? तदा गुरुणोक्तं भो महानुभावा यूयं किं जल्पथ ? ततस्ताभिः सर्वा वार्ता मुनेरग्रे कथितास्तदा मुनिनोक्तमथ युष्माभिर्नदीतटे गत्वैवं वक्तव्यं यदस्मद्देवा दीक्षाग्रहणादिनादारभ्य चेदनाहारिणैव स्थितं भवेत्तर्हि हे नदी देवि अस्माभिरद्यैव प्रत्यक्षं तस्मै आहारो दत्तोऽस्तीति चिंतयंत्यस्ता विस्मिताः संत्यः पुनर्नदीसमीपे समागत्य तथैव कथयामासुस्तदा पूर्ववदेव नदि द्विधा जाता. प्राप्ताश्च सर्वा अपि सरथाः परिवारयुता निजगृहे.

⊠ अथातीवविस्मिताभिस्ताभिर्मोक्षराज्यमधिगंतुमहमिच्छामि. तत् श्रुत्वा सूरनृपेणोक्तं हे बंधो त्वमिवाहमपि गुरुमुखश्रुतमाहात्म्यं मोक्षराज्यं लब्धुं वांछामि. ततो मंत्रिप्रमुखाणामाग्रहतः केवलं निजलघुबंधुवचनत एव पुत्रजन्मावधि बंधनमिव मन्यमानोऽसौ सूरनृपो राज्यं पालयामास. सोमनृपश्च दीक्षां गृहीत्वा गुरुणा सहान्यत्र विजहार. क्रमेणाधीतानेकशास्त्रोऽसौ राजर्षिर्गीतार्थो जातः

⊠ अथैकदा कतिचिद्वर्षानंतरं स सोमर्षिर्निजभ्रातुर्मिलनाय जयपुरोद्याने समागतस्तदा सूरनृपो निजमंत्र्यादिपरिवारयुतो हर्षेण तत्र गत्वा मुनिं वंदितवान्. मुनिदत्तोपदेशं श्रुत्वा भ्रातुश्चारित्रं चानुमोदयन् स गृहे समागतः. अथ द्वितीयदिने सूरनृपस्य सर्वा राज्ञ्यो देवमुनेर्वंदनार्थमुद्याने गताः. परमंतराले नदीमध्ये मेघवृष्टितो जलपूरं समागतं. ततस्ताः सर्वा अपि मुनेरवंदनतो मनसि दूनाः पश्चाद्वलित्वा गृहे समागतास्तदा राज्ञोक्तं यूयं

सर्वाः कथं पश्चादागताः ? ताभिरुक्तं स्वामिन्नंतराले नदीमध्ये भीषणं जलपूरं समागतं, तेन वयं पश्चाद्वलितास्तदा राज्ञोक्तं तज्जलपूरस्य प्रतिकारस्तु सुलभोऽस्ति. युष्माभिर्नदीतटे गत्वा वाच्यं यद् यद्दिवसादारभ्यास्मद्देवरेण दीक्षा गृहीतास्ति तद्दिवसादस्मत्पतिर्यदि ब्रह्मचारी भवेत्तर्हि हे नदीदेवि अस्माकं मार्गं देहीति कथिते सति नदी मार्गं दास्यति. तत् श्रुत्वा सर्वा राज्योर्भर्त्रे पृष्टं हे स्वामिन् कथं यूयं ब्रह्मचारिणः कथं च देवमुनिर्निराहारः ? तदा भूपेनोक्तं यूयं मुग्धा धर्मतत्त्वं न जानीथ. यदा भ्रात्रा दीक्षा गृहीता तदादितोऽहंचारित्रमनोरथरथस्थित एव गमनागमनादिसकलक्रियां करोमि, राज्ययोग्यपुत्रप्रसवावधिमेवाहं केवलं लूक्षपरिणामेनैव गृहस्थोऽस्मि, अतोऽहं युष्माभिर्भावयतिर्ज्ञेयः.

यथा—परपुंसि रता नारी । भर्त्तारमनुगच्छति ॥
तथा तत्त्वरतो योगी । संसारमनुवर्त्तते ॥ १ ॥

☒ किंच यश्चारित्रस्थितो निरवद्याहारं करोति स केवल धर्मसाधनदेहमात्रधारणाय न तु रूपकांतिपुष्टिहेतवे, " निरवज्जाहाराणं । साहूणं निच्चमेव उववासो ॥ " इति वचनान्निरवद्याहारकर्त्तारः साधवः सदैव निराहारा ज्ञेयाः. तत् श्रुत्वा हृष्टाभी राज्ञीभिर्भर्त्रोक्तं सर्वं तथेति प्रतिपन्नं.

☒ अथ कालांतरे पुत्रप्रसवानंतरं यौवनोपेताय तस्मै च राज्यं दत्वा सूरराजा दीक्षां गृहीतवान्, जातश्च

गीतार्थः, कालांतरे तौ द्वावपि भ्रातरौ केवलज्ञानमासाद्य मोक्षे गतौ.

॥ इति श्रीभावकुलके सोमराजर्षिकथा. ॥

मूलम्—सिरिचंडरुद्दगुरुणा । ताडिज्जंतोवि दंडघाएणं ॥
तक्कालं तस्सीसो । सुहलेसो केवली जाउ ॥१७॥

व्याख्या—श्रीचंडरुद्राचार्यगुरूणा दंडघातेन ताड्यमानोऽपि तस्य शिष्यस्तत्कालं शुभलेश्यातः केवलज्ञानयुतो जातः ॥१७॥

☒ एकदा चंडरुद्राभिधानाचार्या वहुपरिवारपरिवृता विशालाया उपवने समवसृताः, तेषामाचार्याणां प्रकृतिरत्यंतक्रोधाकुला बभूव, तेन तस्य परिवारस्तस्मात्स्तोकं दूरे एवावसत्. तस्य क्रोधोपेतप्रकृतितश्चलोकैस्तस्य चंडरुद्राचार्य इति नाम दत्तं. इतः कोऽपि नवपरिणीतो व्यवहारिपुत्रो निजसुहृद्गणोपेतो हास्यकुतूहलानि कुर्वन् क्रीडार्थं तत्रोद्याने समागतः, साधुवृन्दं च तत्र दृष्ट्वा वंदित्वा च ते हास्यक्रीडां कर्त्तुं लग्नाः, मित्रेणैकेन मुनिभ्यः कथितं भो मुनयो नवपरिणीतो सुहृदयमस्माकं दीक्षाग्रहणाभिलाषेणात्र समागतोऽस्ति, मुनिभिस्तेषां तद्धास्यवचनं ज्ञात्वा न किंचिदपि जल्पितं, तदा स्वध्यायभंगभीरुभिर्मुनिभिरुक्तं भो महानुभावा एतद्विषये वयं न जानीमहे, इतो दूरस्थितायास्मद्गुरवे यूयं विज्ञप्तिं कुरुत ? ततस्ते हास्यं कुर्वाणास्तत उत्थाय गुरुसमीपे गत्वा तथैव कथयामासुः,

परं गुरुणा न जल्पितं, द्विस्त्रिवारकथयतः समुत्पन्नक्रोधो गुरुर्जगौ तर्हि लोचकृते रक्षामानयत ? तैश्चापल्यभावेन रक्षानीता, तदा गुरुणापि नवपरिणीतं तं बलादपि गृहीत्वा तस्य शिरो द्रुतं द्रुतं केशोत्पाटनपूर्वकं लुंचितं विहितं. तद् दृष्ट्वा विषणास्ते सर्वेऽपि सुहृदो भयात्पलायिताः

⊠ अथ तेन नवपरिणीतशिष्येण शुभभावतश्चिंतितं हास्येनापि मयैतच्चारित्रं यल्लब्धं तन्मे नूनं महद्भाग्यं सूचयति, अधुना तस्य निर्वाहे एव मया यत्नो विधेय इति विचिंत्य तेन गुरवे निवेदितं हे भगवन् मम संबंधिनोऽज्ञानिनः संति ततोऽत्रस्थानां भवतां ते पराभवं करिष्यंति, मां च गृहीत्वैव यास्यंति, तत इत आवयोर्विहार एव योग्यस्तदा गुरुणोक्तं वृद्धत्वेनाहं रात्रौ गमनाऽसमर्थोऽस्मि, त्वं मम संतापकारकः शिष्यः क- मिलितः ? शिष्येणोक्तं हे भगवन् यूयं मम स्कंधमारोहत ? तदा गुरुस्तस्य स्कंधोपरिस्थः पथि चचाल. पथि चांधकारबाहुल्येन शिष्यस्य निम्नोच्चभूमौ गच्छतो यदा पदस्खलना भवति तदा क्रुद्धोऽसौ चंडरुद्राचार्यस्तस्य शिरसि दंडप्रहारान् करोति. तथापि क्षमावान् शिष्यो विनयेन चिंतयति यन्ममाभाग्यवशान्मत्सकाशान्मे गुरूणां दुःखं समुद्भवति, एवं पुनः पुनर्दंडप्रहारेण तस्य मस्तकतो रुधिरधारा निर्गता, तथाप्यनित्यभावनां भावयतस्तस्य क्षपकश्रेणिमारूढस्य केवलज्ञानं समुत्पन्नं.

⊠ अथ ज्ञानबलेनासौ समविषमभूमिकां पश्यन् समभूमावेव चलन् गुरुभ्यो रोचयामास. तदा गुरु-

भिक्षितितमथ केवलं प्रहारत एवासौ सम्यक् चलति. इतस्तन्मस्तकान्निःसृतया रुधिरधारया गुरुशरीरमार्द्रीभूतं, तदा तेन चिंतितमहो नवदीक्षितस्याप्यस्य कीदृशी क्षमा वर्त्तते ! अहं मूढश्च वृद्धीभूतोऽपि क्रोधमलाविलमलिनांतःकरणोऽस्मि, अतो मांप्रति धिगस्तु. ईदृक्कोपं कुर्वतो मम का गतिर्भविष्यति ? इत्यादिशुभभावनां भावयतः क्षपकश्रेणिमारूढस्य तस्य चंडरुद्राचार्यस्यापि केवलज्ञानं समुत्पन्नं. क्रमेण तौ गुरुशिष्यौ बहुजीवान् प्रतिबोध्य मोक्षे गतौ ॥

॥ इति श्रीभावकुलके चंडरुद्राचार्यशिष्यकथा ॥

मूलम्—जं न हु बंधो भणिओ । जीवस्स वधेवि समिइगुत्ताणं ॥
भावो तत्थ पमाणं । न पमाणं कायवावारो ॥१८॥

व्याख्या—समितिगुप्तानां मुनीनां जीवस्य प्राणिनो वधेऽपि यत्कर्मबंधो न भणितस्तत्र भाव एव प्रमाणं न च कायव्यापारः प्रमाणभूतः ॥ १८ ॥

मूलम्—भावुच्चिय परमत्थो । भावो धम्मस्स साहगो भणिओ ॥
सम्मत्तस्सवि बीअं । भावुच्चिय बिंति जगगुरुणो ॥१९॥

व्याख्या—परमार्थेन भाव एव प्रधानो ज्ञेयः, पुनर्धर्मसाधकोऽपि भाव एव कथितः, सम्यक्त्वस्य बीजमपि भाव एव. इति जगद्गुरवः श्रीवीतरागाः कथयंति. ॥ १९ ॥

मूलम्—किं बहुणा भणिएणं । तत्तं निसुणेह भो महासत्ता ॥
मुक्खसुहबीअभूओ । जीवाण सुहावहो भावो ॥२०॥

व्याख्या—बहुना कथनेन किं? भो महासत्वा भव्यजीवास्तत्वं परमार्थं शृणुत ? मोक्षसुखस्य बीजभूतो जीवानां स सुखावहः सुखदाता भाव एव ज्ञेयः ॥ २० ॥ अथ चतुर्धर्माणां फलमाह ॥

मूलम्—इअदानसीलतवभाव–णाओ जो कुणइ सत्तिभत्तिपरो ॥
देविंदविंदमहिअं । अइरा सो लहइ सिद्धिसुहं ॥२१॥

व्याख्या—यो भव्यप्राणी इत्थं पूर्वोक्तप्रकारेण दानशीलतपोभावनारूपं चतुर्धा धर्मं शक्त्या च भक्त्या तत्परः सन् करोति स जीवो देवेंद्रवृंदैः शक्रसमूहैर्महितं पूजितमेवंविधं सिद्धिसुहं मोक्षसुखमचिरात्स्तोककालमध्ये एव लभते. अस्यां गाथायां " देवेंद्र " इति पदेन ग्रंथकर्तृभिर्महात्मभिः निजनाम सूचितं ॥२१॥

मूलम्—भावेण भुवणनाहं । भावेण हुंति देवलोगाओ ॥
भावेण सिद्धिसुक्खं । पावंति सव्वसंपत्तिं ॥२२॥

व्याख्या—भावेन जीवः स्वर्गमर्त्यपातालात्मकत्रिभुवनस्याधिपत्यं प्राप्नोति, च पुनर्भावेन देवलोका अपि प्राणिनां सुलभा भवंति, पुनर्भावेनैव प्राणिनः सर्वसंपत्तियुतं जन्ममरणादिरहितं सिद्धिसुखं मोक्षसुखं प्राप्नुवंतीति ॥२२॥

इति श्रीतपागच्छेशभट्टारक श्रीविजयरत्नसूरीश्वरराज्ये पंडितश्रीभोजकुशलगणिशिष्य पंडितश्रीवृद्धिकुशलगणिशिष्येण पंडितलाभकुशलगणिना विरचितायां श्रीदानादिकुलकवृत्तौ भावनाकुलकं समाप्तं ।

॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथो गुरुश्रीविजयमहेन्द्रसूरिसुप्रसादात् ॥

लब्ध्वा यदीयचरणांबुजतारसारं । स्वादच्छटाधरितदिव्यसुधासमूहं ॥
संसारकाननतटे ह्यटतालिनेव । पीतो मया प्रवरबोधरसप्रवाहः ॥ १ ॥

भाव ३२२

श्री वर्द्धमान-सत्य-नीति-हर्षसूरि जैन ग्रन्थमाळा. ग्रन्थांक न. ४०

आद्य संपादक तथा प्रेरक श्री विजय महेन्द्रसूरीश्वरजी महाराज साहेब

संपादक

मुनि हेमप्रभविजय

आ ग्रंथ श्री गोंडलनिवासी श्रावक दोशी अमृतलाल पानाचंदे पोताना बावीसी अमृत प्रिन्टींग प्रेस जेतपुरमां छाप्यो.

कुल कम

卐 इति श्री दानादिकुलकवृत्तिः समाप्ता 卐